और्ध्वदेहिकविधिनिरूपके चतुर्थे पटले १४४-१५३

मृतस्य शिवारामादिप्रवेशनम् — समाधिक्रियानिरूपणम् — कर्तुः केशवपनावश्यकत्वकथनम् — केशवपनानन्तरक्रियाकथनम् — समाधौ वृषभसहितलिङ्गस्थापनावश्यकत्वनिरूपणम् — त्रिविधलिङ्ग-पितृतर्पणादिनिरूपणम् — शिवारामाद् गृहागमनक्रमकथनम् — समाधिस्थापितलिङ्गस्य आदशाहं पूजाद्यावश्यकत्वम् — आराधनविधिनिरूपणम् — सवृषं समाधिस्थलिङ्गमुद्वास्य तस्य तीर्थादिषु विसर्जनम् — गाणपत्यहोम-आनन्दहोमक्रमकथनम् — वृषोत्सर्जननिमित्तरुद्रहोम-रुद्रगणाराधननिरूपणम् — षोडशाराधनक्रमनिरूपणम् — तत्त्वसंयोजननिरूपणम् — तत्त्वसंयोजनान्तर्भूतरुद्राराधनक्रमः — लिङ्गाङ्गसङ्गिनः सापिण्ड्यनिषेधः — कलातत्त्वाराधनक्रमनिरूपणम् — कलातत्त्वसंयोजनान्तरमूनमासाद्याराधनम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रकीर्णकविधिकथने पञ्चमे पटले १५४-१६०

प्रकीर्णकविधिनिरूपणम् — पूर्वशैवोक्तपितृनामनिर्देशः — मिश्रशैवादीनां पितृगणनिरूपणम् — वीरशैवश्राद्धेष्वपसव्यादिवर्णनम् — वीरशैवश्राद्धेषु ग्राह्यद्रव्याणि — बान्धववर्गे कस्मिंश्चिन्मृते तस्य तत्त्वसंयोजनक्रमनिरूपणम् — ज्येष्ठकृतकर्मानन्तरं तदनुजकनिष्ठादिकर्तव्यनिरूपणम् — तत्त्वसंयोजनस्य दिवसनियमनिरूपणम् — तत्त्वसंयोजनषोडशाराधनयोर्व्यवस्था — तत्त्वसंयोजनमन्तरा कृतस्य कर्मणः पापजनकत्वम् — आराधनद्वैविध्यकथनम् — द्विविधकर्मणो नित्यनैमित्तिककाम्यभेदेन त्रैविध्यम् — श्राद्धपदनिर्वचनम् — श्राद्धदक्षिणादानपद्धतिग्रहणवतां कर्तव्यनिरूपणम् ।

आशौचशुद्धिकथने षष्ठे पटले १६१-१६४

आशौचविधिनिरूपणम् — जाताशौच-मृताशौचयोश्चातुर्विध्यम् — आशौचस्य दिवसव्यवस्था — बान्धववर्गे कस्मिंश्चिन्मृते आशौचादिव्यवस्था — संन्यासिप्रभृतीनामाशौचनिषेधकथनम् — यज्ञविवाहादिसमये सद्यः शौचव्यवस्था — सन्ध्यायां शिवार्चनादौ चाशौचनिषेधः ।

प्रायश्चित्त-शुद्धि-विधायके सप्तमे पटले १६५-१७२

प्रायश्चित्तविधिनिरूपणम् — उद्बन्धनमृतस्याशौचोदकादिक्रियानिषेधकथनम् — उद्बन्धनमृतस्य वहनखननादिरतानां प्रायश्चित्तम् — तप्तकृच्छ्रप्रायश्चित्तस्वरूपनिरूपणम् — शिवाश्रमनिषेविणामुद्बन्धनवाहकानां प्रायश्चित्तम् — पतितसंसर्गप्रायश्चित्तम् — शृगाल-शुनकादिदष्टस्य प्रायश्चित्तम् — चण्डालादिभिर्हतस्य वहनखननकर्तॄणां प्रायश्चित्तम् — चक्रवाकादिप्राणिहिंसकस्य प्रायश्चित्तम् — नकुलमूषकादिहिंसकस्य प्रायश्चित्तम् — चण्डालसम्भाषणादिप्रायश्चित्तम् — श्वकाकादिस्पृष्टान्नशुद्धीकरणम् — केश-कीटादिस्पृष्टान्नशुद्धीकरणम् — दूषितकूपादिजलस्य शुद्धीकरणम् — निषिद्धभूमेः शुद्धीकरणम् — शवदूषितगृहस्य शुद्धीकरणम् — मेध्यामेध्येन्द्रियनिरूपणम् — देहस्थमलशुद्धीकरणम् — चण्डालादिस्पृष्टवस्त्रादिशुद्धीकरणम् — सोमादीनां नोच्छिष्टता ।

प्रायश्चित्तविधिनिरूपकेऽष्टमे पटले १७३-१७७

महापापादिप्रायश्चित्तम् — अगम्यागमनप्रायश्चित्तम् — पितृदारादिगमनप्रायश्चित्तम् — ब्राह्मणादिस्त्रीगमनप्रायश्चित्तम् — पशु-वेश्यादिगमनप्रायश्चित्तम् —

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बलात्कारसंसर्गवतीनां स्त्रीणां प्रायश्चित्तम् — पादुकाताडन-बन्दीगृहान्नभक्षण-मांसभक्षणादि-जन्यपापप्रायश्चित्तम् — शूद्रान्न-सूतकान्नभक्षणप्राप्तपापप्रायश्चित्तम् — एकोद्दिष्ट-तत्त्वसंयोजनभुक्तान्नजन्यपापप्रायश्चित्तम् — सुरापान-लशुनादिभक्षण-जन्यपापप्रायश्चित्तम् — क्षुरकर्म-प्रेतधूमादिजन्यपातकप्रायश्चित्तम् — सावित्र्यादि-जपस्य महापातकनाशकत्वम् — श्रद्धायाः शिवसायुज्यप्रापकत्वम् — शास्त्रस्य गोपनीयता ।

परिशिष्टभागः

मूलपञ्चाक्षरमन्त्रन्यासाः
श्लोकार्धानुक्रमणी
सहायकग्रन्थसूची

❈❈❈

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्री जगद्गुरु विश्वाराध्य जनकल्याण प्रतिष्ठान द्वारा संचालित

शैवभारती शोध प्रतिष्ठान

डी० ३५/७७ जंगमवाड़ी मठ, वाराणसी-२२१००१ (उ०प्र०)

संस्थापक

श्री जगद्गुरु विश्वाराध्य ज्ञानसिंहासनाधीश्वर श्री १००८ जगद्गुरु

डॉ० चन्द्रशेखर शिवाचार्य महास्वामी जी महाराज

संरक्षक

प्रो० वि० वेङ्कटाचलम्,

कुलपति

सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी

निदेशक

पं० व्रजवल्लभ द्विवेदी

जंगमवाड़ी मठ, वाराणसी

परामर्शदात्री समिति

१. प्रो० बटुकनाथ शास्त्री खिस्ते, श्रीनिकेतनम्, एन-१६/४३ पत्रकार नगर, विनायका, वाराणसी-१०
२. डॉ० एस० बहुलकर, निदेशक दुर्लभ बौद्ध ग्रन्थ शोध योजना, केन्द्रीय तिब्बती शिक्षा संस्थान, सारनाथ, वाराणसी।
३. प्रो० रामचन्द्र पाण्डेय, बी० ३०/२२७ नगवा, वाराणसी-५
४. डॉ० सी० एस० कपाले, 'शिवरत्न' १०-२/३६ एस० बी० कालेज रोड, गुलबर्गा, कर्नाटक।
५. डॉ० एम० शिवकुमार स्वामी जी, अध्यक्ष संस्कृत विभाग, बंगलोर विश्वविद्यालय, बंगलोर, कर्नाटक।
६. डॉ० मल्लिकार्जुन परड्डी, अध्यक्ष संस्कृत विभाग, कर्नाटक विश्वविद्यालय, धारवाड़, कर्नाटक।
७. डॉ० एस० डी० पसारकर, प्राध्यापक, संगमेश्वर कालेज, सोलापुर, महाराष्ट्र।
८. पं० जी० उमापति शास्त्री, धर्मस्थल, कर्नाटक।
९. डॉ० रमा घोष, दर्शनाध्यापक आर्यमहिला महाविद्यालय, चेतगंज, वाराणसी।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चन्द्रज्ञानागमे उत्तरभागे

क्रिया-चर्यापादौ

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चन्द्रज्ञानागमः

प्रथमः पटलः

कलधौताचलोत्तुङ्गशृङ्गरिङ्गन्निकेतनम् ।
धर्ममूर्तिधरं श्रीमन्महावृषभकेतनम् ॥१॥
अनन्तरुद्रप्रमथपरिषन्निकषोज्ज्वलम् ।
अनन्तरुद्रमासाद्य धिषणो धिषणोन्नतः ॥२॥
परिस्पृशन् श्रीपदाब्जपीठं मूर्ध्ना मुहुर्मुहुः ।
बद्धाञ्जलिः सुप्रसाद्य नीचैर्वाचमुवाच ह ॥३॥

बृहस्पतिरुवाच

भगवन् करुणासिन्धो सर्वज्ञानसमाश्रय ।
नाविष्कृताश्चेद् भवता स्फुटमागमसंहिताः ॥
जगत् किलान्धतामिस्रे निमज्जेद् ज्ञानवर्जितम् ॥४॥
अविज्ञायैव यो लोके भवदागमसंहिताः ।
विपश्चितं स्वं मनुते न तस्माद् विद्यते पशुः ॥५॥

सुमेरु पर्वत के शिखर पर जिनका लीलाधाम है, धर्म की जो साक्षात् मूर्ति हैं, जिनकी ध्वजा पर महावृषभ अंकित है, भगवान् रुद्र के प्रमथ गणों की विशाल सभा में जिनकी सर्वोत्तम स्थिति है, ऐसे भगवान् [1]अनन्तरुद्र के पास आकर बुद्धिमानों में श्रेष्ठ देवगुरु बृहस्पति उनके चरणकमलों में बार बार शिर नवाते हुए हाथ जोड़ कर उनके प्रसाद की प्राप्ति के लिये विनम्रतापूर्वक इस प्रकार प्रश्न करते हैं ॥१-३॥

बृहस्पति प्रश्न करते हैं—

हे करुणा के सागर, सभी प्रकार के ज्ञान के एकमात्र आश्रय, भगवन् ! यदि आपने आगम शास्त्र की विभिन्न संहिताओं का आविष्कार न किया होता, तो ज्ञान की ज्योति के अभाव में यह सारा जगत् भयंकर गाढ अन्धकार में, अज्ञान के सागर में डूब जाता ॥४॥ आपके द्वारा उपदिष्ट आगमशास्त्र की इन संहिताओं को बिना जाने जो व्यक्ति इस लोक में अपने को विद्वान् मानता है, उससे बढ कर अज्ञानी दूसरा नहीं

---

१. अनन्त, सूक्ष्म, शिवोत्तम, एकनेत्र, एकरुद्र, त्रिमूर्ति, श्रीकण्ठ और शिखण्डी नामक आठ विद्येश्वरों के नाम सिद्धान्तशिखामणि की टीका (३।४४) तथा अन्यत्र भी मिलते हैं। इनमें अनन्त मुख्य हैं। माया को क्षुब्ध कर ये ही मलिन सृष्टि के कर्ता माने गये हैं। अनन्तरुद्र के नाम से ये ही यहां अभिप्रेत हैं।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भवत्प्रसादसंपत्त्या भवदीयागमामृतम् ।
निपीयैवामरगुरुरभवं सिद्धसाधनः ॥६॥
आकर्णिता मया भागाश्चन्द्रज्ञानागताः शुभाः ।
बहवस्तदिह ब्रूहि कृपया शिवशासनम् ॥७॥
मोक्षधर्मा विशेषेण तत्रोच्यन्त इति श्रुतम् ।
अहं श्रुतेन येन स्यां विदिताशेषवेदनः ॥८॥

अनन्तरुद्र उवाच

युक्तं पृष्टं हि सुधिया त्रिदिवेशगुरो त्वया ।
श्रृणुष्वावहितो भूत्वा वक्ष्यामि शिवशासनम् ॥९॥

पशुपतिपदार्थनिर्वचनम्

ब्रह्माद्याः स्थावरान्तन्ताश्च देवदेवस्य शूलिनः ।
पशवः परिकीर्त्यन्ते संसारवशवर्तिनः ॥१०॥
तेषां पतित्वाद् विश्वेशः शिवः पशुपतिः स्मृतः ।
मलमायादिभिः पाशैः स बध्नाति पशून् पतिः ॥११॥

है ॥५॥ आपके प्रसाद (अनुग्रह) से प्राप्त, आपके द्वारा उपदिष्ट आगमों के अमृत रस का पान करके ही मैं देवताओं का गुरु बन सका हूँ, उनकी सारी समस्याओं के समाधान में समर्थ हो सका हूँ॥६॥ [२]चन्द्रज्ञान आगम के कल्याणकारी अनेक भागों को मैंने सुना है। अब इस आगम में भगवान् शिव का जो मुख्य उपदेश है, उसे आप मुझे सुनाइये ॥७॥ मैंने सुना है कि आगम के इस भाग में विशेष रूप से मोक्ष की प्राप्ति के उपायों का वर्णन किया गया है। यदि आप इस ज्ञान को मुझे सुनाते हैं, तो मैं सभी ज्ञातव्य वस्तुओं के ज्ञान से सम्पन्न हो सकूँगा ॥८॥

अनन्तरुद्र उत्तर देते हैं—

हे देवताओं के गुरु बृहस्पति! तुम बहुत समझदार हो। तुमने सही प्रश्न किया है। तुम सावधान होकर सुनो। मैं तुम्हें शिव के इस शासन को सुनाऊँगा॥९॥

ब्रह्मा से लेकर स्थावर तृणपर्यन्त सारे प्राणी देवताओं को अनुशासित रखने वाले त्रिशूलधारी भगवान् शिव के पशु कहलाते हैं। ये पशु सदा संसार के मायाजाल में फँसे रहते हैं ॥१०॥ इस पशुओं के पति (नियामक) होने से सारे विश्व के स्वामी

---

२. 'सिद्धान्त' नाम से प्रसिद्ध २८ शैवागमों में चन्द्रज्ञान परिगणित है। राजा भोजकृत तत्त्वप्रकाश की कुमारदेव कृत टीका में इसके कुछ वचन उद्धृत हैं। लुप्तागमसंग्रह के द्वितीय भाग में ये संगृहीत हैं। प्रस्तुत ग्रन्थ इसी आगम का उत्तर भाग है। यहां बृहस्पति स्वयं स्वीकार करते हैं कि इसके अनेक भागों को मैंने सुना है। इससे भी उक्त बात की पुष्टि होती है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स एव मोचकस्तेषां भक्त्या सम्यगुपासितः ।

चतुर्विंशतितत्त्वानां पाशत्वम्

चतुर्विंशतितत्त्वानि मायाकर्मगुणा अमी ॥
विषया इति कथ्यन्ते पाशा जीवनिबन्धनाः ॥१२॥
ब्रह्मादिस्तम्बपर्यन्तान् पशून् बद्ध्वा महेश्वरः ।
पाशैरेतैः पतिर्देवः कार्यं कारयति स्वकम् ॥१३॥

परशिवस्याज्ञया सर्वज्ञतत्त्वोत्पत्तिः

तस्याज्ञया महेशस्य प्रकृतिः पुरुषोचिताम् ।
बुद्धिं प्रसूते सा बुद्धिरहङ्कारमहङ्कृतिः ॥१४॥
इन्द्रियाणि दशैकं च तन्मात्रपञ्चकं तथा ।
शासनाद् देवदेवस्य शिवस्य शिवदायिनः ॥१५॥
तन्मात्राण्यपि तस्यैव शासनेन महीयसा ।
महाभूतान्यशेषाणि भावयन्त्यनुपूर्वशः ॥१६॥

भगवान् शिव पशुपति कहलाते हैं । ये मल, माया आदि पाशों से पशुओं (जीवों) को बांधे रखते हैं, इसी लिये ये इनके पति (स्वामी) कहलाते हैं ॥११॥

भगवान् शिव ही इन जीवों को इन पाशों (बन्धनों) से मुक्त भी कराते हैं। प्रकृति आदि २४ तत्त्व ही माया और कर्म की रस्सी से बुने गये विषय रूपी वे [३]पाश हैं, जिनसे कि ये जीवों को बाँधे रहते हैं ॥१२॥ ब्रह्मा से लेकर स्तम्ब (तृण) पर्यन्त सभी पशुओं को इनके स्वामी भगवान् महेश्वर इन पाशों से बाँध कर इनसे अपना काम करवाते हैं ॥१३॥

भगवान् [४]महेश्वर की आज्ञा के अनुसार ही प्रकृति पुरुष के उपभोग के योग्य बुद्धि का प्रसवन करती है । वह बुद्धि अहंकार को पैदा करती है और उस अहंकार

---

३. मल, माया और कर्म नामक त्रिविध पाशों का उल्लेख आगे इसी पटल के ४५ वें श्लोक में किया गया है। शैव शास्त्र के सभी ग्रन्थों में इनका विवरण मिलता है। कुछ आचार्य तिरोधान शक्ति को लेकर पाशों की संख्या चार तथा अन्य महामाया का भी समावेश कर इनकी संख्या पांच मानते हैं, किन्तु काश्मीर के प्रत्यभिज्ञा दर्शन और वीरशैव दर्शन में भी इनकी संख्या तीन ही मानी गई है।

४. यहां सेश्वर सांख्य की पद्धति से सृष्टिप्रक्रिया वर्णित है। आगम शास्त्र की दृष्टि से यह भगवान् शिव के अशुद्ध सृष्टि है। शैवागमों में ३६ तत्त्व माने गये हैं। उनमें प्रथम पांच तत्त्व शुद्ध, आगे के सात तत्त्व शुद्धाशुद्ध और अन्तिम २४ तत्त्व अशुद्ध सृष्टि के अन्तर्भूत माने गये हैं। इन अन्तिम २४ तत्त्वों का ही यहां विवरण दिया गया है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ब्रह्मादीनां तृणान्तानां देहिनां देहसंगतिम् ।
महाभूतान्यशेषाणि जनयन्ति शिवाज्ञया ॥१७॥

बुद्ध्यादीनां व्यापाराः

अध्यवस्यति वै बुद्धिरहङ्कारोऽभिमन्यते ।
चित्तं चेतयते चाऽपि मनः संकल्पयत्यपि ॥१८॥
श्रोत्रादीनि च गृह्णन्ति शब्दादीन् विषयान् पृथक् ।
स्वानेव नान्यान् देवस्य दिव्येनाज्ञाबलेन वै ॥१९॥
वागादीन्यपि यान्यासंस्तानि कर्मेन्द्रियाणि च ।
यथा स्वं कर्म कुर्वन्ति नान्यत् किञ्चिच्छिवाज्ञया ॥२०॥
शब्दादयोऽपि गृह्यन्ते क्रियन्ते वचनादयः ।
अविलङ्घ्या हि सर्वेषामाज्ञा शम्भोर्गरीयसी ॥२१॥

पञ्चभूतोत्पत्तिकथनम्

अवकाशमशेषाणां भूतानां संप्रयच्छति ।
आकाशः परमेशस्य शासनादेव सर्वगः ॥२२॥

से ११ इन्द्रियों की और ५ तन्मात्राओं की सृष्टि होती है। यह सब कल्याण कारी भगवान् देवदेव शिव के आदेश के अनुसार ही सम्पन्न होता है ॥१४-१५॥ उसी भगवान् शिव के महनीय शासन में इन ५ तन्मात्राओं से पंच महाभूतों की आनुपूर्वी से उत्पत्ति होती है ॥१६॥ ये महाभूत ही शिव की आज्ञा का अनुसरण करते हुए ब्रह्मा से लेकर तृण पर्यन्त समस्त देहधारियों के नाना प्रकार के देहों को उत्पन्न करते हैं॥१७॥

बुद्धि अध्यवसाय (निश्चय) करती है। अहंकार किसी भी पदार्थ में अपनापन जोड़ता है।[5]चित्त का धर्म चेतना प्रदान करना है और मन संकल्प का जनक है ॥१८॥ श्रोत्र आदि इन्द्रियां भगवान् शिव की आज्ञा के अनुसार शब्द आदि अपने अपने विषयों का ही ग्रहण करती हैं॥१९॥ वाक् आदि जो पांच इन्द्रियां हैं, वे कर्मेन्द्रियां कहलाती हैं। ये भी शिवाज्ञा का अनुसरण करती हुईं इनके लिये निर्धारित कर्मों का ही सम्पादन करती हैं, दूसरा कोई काम नहीं करतीं ॥२०॥ शब्द आदि विषयों का श्रोत्र आदि इन्द्रियों द्वारा ग्रहण किया जाता है । वचन आदि का वाक् आदि इन्द्रियों के द्वारा

---

५. सांख्य दर्शन में बुद्धि, अहंकार और मन नामक त्रिविध अन्तःकरण ही स्वीकृत हैं। वेदान्त शास्त्र में चित्त की भी अन्तःकरण में गणना की जाती है। तदनुसार ही यहां उसका समावेश किया गया है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्राणाद्यैश्च तथा नामभेदैरन्तर्बहिर्जगत् ।
बिभर्ति सर्वं शर्वस्य शासनेन प्रभञ्जनः ॥२३॥
हव्यं वहति देवानां कव्यं कव्याशिनामपि ।
पाकाद्यं च करोत्यग्निः परमेश्वरशासनात् ॥२४॥
सञ्जीवनाद्यं सर्वस्य कुर्वन्त्यापः शिवाज्ञया ।
विश्वम्भरा जगन्नित्यं धत्ते विश्वेश्वराज्ञया ॥२५॥

दिक्पालानां शिवाज्ञयैव प्रवृत्तिः

देवान् पात्यसुरान् हन्ति त्रिलोकानभिरक्षति ।
आज्ञया तस्य देवेन्द्रः सर्वदेवैरलङ्घ्यया ॥२६॥

उच्चारण किया जाता है, क्योंकि भगवान् शिव के गंभीर अनुशासन का कोई उल्लंघन नहीं कर सकता ॥२१॥

परमेश्वर के शासन का अनुसरण करता हुआ सर्वत्र विद्यमान आकाश समस्त प्राणियों को अवकाश (आश्रय) प्रदान करता है ॥२२॥ भगवान् शर्व (शिव) के शासन में विद्यमान पवन [६]प्राण आदि नामभेद से इस सारे जगत् की बाहर और भीतर से रक्षा करता है॥२३॥ परमेश्वर के शासन के अनुसार ही अग्नि देवताओं के लिये हव्य का और कव्याशी पितरों के लिये कव्य का वहन करती है। वही अग्नि मनुष्य के भोजन पकाने का साधन भी बनती है॥२४॥ शिव की आज्ञा के अनुसार ही जल सारे प्राणियों को जीवन (तृप्ति) प्रदान करते रहते हैं। इस विश्व को धारण करने में समर्थ यह पृथ्वी भी विश्वेश्वर की आज्ञा के अनुसार ही इस जगत् को धारण करती है॥२५॥

सभी देवताओं के द्वारा अलंघ्य भगवान् की आज्ञा का अनुसरण करते हुए ही देवेन्द्र [७] देवताओं की रक्षा, असुरों का संहार और इस त्रिलोकी की रक्षा करते हैं॥२६॥

---

६. सांख्यकारिका (श्लो. २९) में प्राण, अपान आदि पांच प्राणों को अन्तःकरण की सामान्य वृत्ति माना गया है। सद्योजात शिवाचार्य भोगकारिका (श्लो. ३३) में अहंकार की संरम्भ नामक वृत्ति से पांच प्राणों की निष्पत्ति मानते हैं और अभिनव गुप्त (तन्त्रा. ९।२३१-२३३) भी इसी मत का अनुसरण करते हैं। वस्तुतः देखा जाय तो प्राण आदि के लिये उक्त स्थलों पर भी ''शारीरा वायवः'' (शरीर में स्थित वायु) इस प्रकार वायु शब्द ही प्रयुक्त है। अतः प्राण आदि को भी वायु का ही विस्तार माना जायगा।

७. इन्द्र आदि आठ दिक्पालों का यहां वर्णन किया गया है (श्लो. २६-३१)। अग्नि और पवन का ऊपर वर्णन हो जाने से यहां उनका समावेश नहीं किया गया। अमरकोश (१।६।३) में इनके नाम इस प्रकार दिये गये हैं—

इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् ।
कुबेर ईश पतयः पूर्वादीनां दिशां क्रमात् ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जीवतां व्याधिभिः पीडां मृतानां चैव यातनाः ।
अधार्मिकाणां धर्मेशः करोति शिवशासनात् ॥२७॥
निर्ऋतिर्विधिहीनानां फलं हरति कर्मणाम् ।
निशाचराधिपत्यं च कुरुते शङ्कराज्ञया ॥२८॥
आधिपत्यमपां नित्यं कुरुते वरुणोऽपि च ।
पाशैर्बध्नाति बध्यांश्च परमेश्वरशासनात् ॥२९॥
ददाति नित्यं यक्षेशो द्रविणं द्रविणेश्वरः ।
पुण्यानुरूपं भूतेभ्यः पुरशासनशासनात् ॥३०॥
करोति सम्पदः शश्वज्ज्ञानं चापि सुमेधसाम् ।
निग्रहं चाप्यसाधूनामीशानः शिवशासनात् ॥
धत्ते तु धरणीं मूर्ध्ना शेषः शिवनियोगतः ॥३१॥

शिव के शासन का अनुवर्तन करते हुए ही धर्मराज अधार्मिक व्यक्तियों को जीवितावस्था में नाना प्रकार की व्याधियों से पीड़ा पहुचाते हैं और मरने के बाद उनको नाना प्रकार की यातनाएं देते हैं ॥२७॥ बिना शास्त्रीय विधि के मनमाना आचरण करने वालों के समस्त कर्मों के फल को [८]निर्ऋति देवी (दुर्भाग्य देवता) अपहरण कर लेती है और शिव की आज्ञा से इन पर निशाचरों का आधिपत्य हो जाता है, अर्थात् ऐसे कर्म देवताओं की अपेक्षा राक्षसों के पोषक हो जाते हैं ॥२८॥ परमेश्वर के शासन के अनुसार ही वरुण देवता समुद्र आदि के जल पर अपना नियन्त्रण स्थापित करते हैं और अपराधियों की दण्ड देने के लिये उन्हें अपने वरुणपाश में बांधते हैं ॥२९॥ त्रिपुर पर अपना शासन स्थापित करने वाले भगवान् त्रिपुरारि शिव की आज्ञा के अनुसार ही यक्षेश धनपति कुबेर सभी प्राणियों को उनके पुण्य के अनुरूप नित्य धन प्रदान करते रहते हैं ॥३०॥ शिव की आज्ञा के अनुसार ही ईशान सज्जन पुरुषों को सदा सम्पत्ति और ज्ञान प्रदान करते रहते हैं और वे ही दुष्टों का निग्रह भी करते हैं। शिव के शासन के अनुसार ही भगवान् शेष अपने शिर पर पृथ्वी को धारण करते हैं। शिव की आज्ञा के अनुसार ही वे सज्जन पुरुषों को सदा सम्पत्ति और ज्ञान प्रदान करते रहते हैं। वे ही दुष्टों का निग्रह भी करते हैं ॥३१॥

---

८. निर्ऋति का अर्थ अलक्ष्मी=दरिद्रता है। ऋग्वेद में पापदेवता के अर्थ में इस शब्द का प्रयोग हुआ है—"दूतो निर्ऋत्या इदमाजगाम" (१०.१६०.१), यहां सायण का भाष्य इस प्रकार है—"निर्ऋत्याः पापदेवताया दूतोऽनुचरः"। यह नैर्ऋत्य कोण की स्वामिनी है। पीपल में इसकी पूजा का विधान है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शिवशासनादेव ब्रह्मादीनां सृष्ट्यादिकर्तृत्वम्

सृजत्यशेषमीशस्य शासनाच्चतुराननः ।
तिसृभिर्मूर्तिभिः स्वाभिः पाति चान्ते निहन्ति च ॥३२॥
विष्णुः पालयते विश्वं विश्वेश्वरनियोगतः ।
सृजते ग्रसते चापि स्वकाभिस्तनुभिस्तथा ॥३३॥
हरत्यन्ते जगत् सर्वं हरस्तस्यैव शासनात् ।
सृजत्यपि च विश्वात्मा त्रिधा भिन्नस्तु रक्षति ॥३४॥

शिवशासनादेव कालादयः प्रवर्तन्ते

कालः करोति सकलं कालः संहरति प्रजाः ।
कालः पालयते विश्वं कालकालस्य शासनात् ॥३५॥
त्रिभिरंशैर्जगद्बिभ्रत् तेजोभिर्वृष्टिमादिशन् ।
दिवि वर्षत्यसौ भानुर्देवदेवस्य शासनात् ॥३६॥

ईश्वर के शासन में स्थित होकर ही चतुर्मुख ब्रह्मा त्रिमूर्ति [९] का स्वरूप धारण कर इस सारे जगत् की सृष्टि करते हैं, वे ही इसकी रक्षा करते हैं और अन्त में उसका संहार भी कर देते हैं ॥३२॥ विश्वेश्वर से नियुक्त विष्णु इस विश्व का पालन करते हैं। अपनी विभिन्न मूर्तियों से वे इसकी सृष्टि भी करते हैं और वे ही इसको निगल भी जाते हैं ॥३३॥ उस विश्वेश्वर के शासन में ही स्थित भगवान् हर (रुद्र) अन्त में सारे जगत् का संहार कर देते हैं। अपनी त्रिधा भिन्न मूर्ति से सारे विश्व में निवास करने वाले ये शिव इसकी सृष्टि और रक्षा करने में भी समर्थ हैं ॥३४॥

काल के भी काल भगवान् शिव के शासन के अनुसार ही काल सारी प्रजा की सृष्टि करता है, वही उसका नाश भी कर डालता है और इसका पालन करने वाला भी वही है ॥३५॥ उक्त तीन अंशों (ब्रह्मा, विष्णु, रुद्र) से आप्यायित हुए सूर्यदेव भगवान् शिव के शासन में रहते हुए ही सारे जगत् को प्रकाश और वर्षा प्रदान करते हुए आकाश में विचरण करते हैं ॥३६॥ चन्द्रभूषण भगवान् शिव की आज्ञा के अनुसार ही चन्द्रदेव समस्त ओषधियों को आप्यायित करते हैं, सभी प्राणियों को प्रसन्नता प्रदान करते हैं। देवगण [१०] सोम आदि में सोमलता के रूप में इनका पान भी करते हैं ॥३७॥

---

९. कुमारसंभव महाकाव्य कें महाकवि कालिदास ने इस त्रिमूर्ति का एक ही मूर्ति के रूप में इस प्रकार वर्णन किया है—"एकैव मूर्तिर्बिभिदे त्रिधा सा सामान्यमेषां प्रथमावरत्वम्। विष्णोर्हरस्तस्य हरिः कदाचिद् वेधास्तयोस्तावपि धातुराद्यौ ॥"(७।४४)

१०. सोमयाग में सोमलता के रस की आहुति दी जाती है। सोमलता का सोम (चन्द्रमा) से संबन्ध माना जाता है। इस याग में सोमलता के रस का पान कर देवगण तृप्त होते हैं। यह लता आजकल उपलब्ध नहीं होती। इसके विकल्प के रूप में आजकल पूतीका नाम औषधि के रस की आहुति दी जाती है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुष्यत्योषधिजातानि भूतानि ह्लादयत्यपि ।
देवैश्च पीयते चन्द्रश्चन्द्रभूषणशासनात् ॥३७॥
आदित्या वसवो रुद्रा अश्विनौ मरुतस्तथा ।
खेचरा ऋषयः सिद्धा भोगिनो मनुजा मृगाः ॥३८॥

शिवशासनादेव स्थावरजङ्गमादीनां सृष्टिः

पशवः पक्षिणश्चैव कीटाद्याः स्थावराणि च ।
नद्यः समुद्रा गिरयः काननानि सरांसि च ॥३९॥
वेदाः साङ्गाश्च शास्त्राणि मन्त्राः सोममखादयः ।
कालाग्न्यादिशिवान्तानि भुवनानि सहाधिपैः ॥
ब्रह्माण्डान्यप्यसंख्यानि तेषामावरणानि च ॥४०॥
वर्तमानान्यतीतानि भविष्यन्त्यपि कृत्स्नशः ।
दिशश्च विदिशश्चैव कालभेदाः कलादयः ॥४१॥

---

[११]द्वादश आदित्य, [१२]आठ वस्तु, [१३]एकादश रुद्र [१४]दो अश्विनी कुमार, [१५]मरुद्गण, आकाशचारी जीव, ऋषिगण, सिद्धगण, सर्पगण, मनुष्य और मृगगण॥३८॥

पशु, पक्षी, कीट-पतंग, स्थावर (वृक्ष, पर्वत आदि), नदी, समुद्र, पहाड़, वन और सरोवर (तालाब) ॥३९॥ [१६]छः अंगों के साथ चार वेद [१७]नाना प्रकार के शास्त्र, नाना प्रकार के मन्त्र , सोम आदि याग, अपने अधिपतियों के साथ [१८]कालाग्नि से लेकर शिव पर्यन्त समस्त भुवन, असंख्य ब्रह्माण्ड और उनके आवरण ॥४०॥ वर्तमान,

---

११. इन्द्र, धाता, भग, त्वष्टा, मित्र, वरुण, अर्यमा, विवस्वान्, सविता, पूषा, अंशुमान् और विष्णु —ये ही बारह आदित्य हैं।

१२. महाभारत के अनुसार धर, ध्रुव, सोम, विष्णु, अनिल, अनल, प्रत्यूष और प्रभास —ये आठ वसु हैं। भागवत में इनके नाम ये हैं— द्रोण, प्राण, ध्रुव, अर्क, अग्नि, दोष, वस्तु और विभावसु।

१३. अज, एकपात्, अहिर्बुध्न्य, पिनाकी, अपराजित, त्र्यम्बक, महेश्वर, वृषाकपि, शंभु, हरण और ईश्वर—ये एकादश (ग्यारह) रुद्र हैं।

१४. अश्विनीकुमार-युगल देवताओं के वैद्य माने जाते हैं। इनके नाम नासत्य और दस्र हैं।

१५. आवह, प्रवह आदि सात वातस्कन्धों में से प्रत्येक में सात-सात मरुत् स्थित हैं। सब मिलाकर इनकी संख्या ४९ है। वेद, पुराण आदि में इनका ही मरुद्गण के रूप में वर्णन है।

१६. शिक्षा, कल्प, व्याकरण, निरुक्त, ज्योतिष और छन्द-ये वेद के छः अंग हैं।

१७. ऋक्, यजुः, साम और अथर्व—ये चार वेद हैं। ऋक्, यजुः और साम त्रयी के नाम से प्रसिद्ध हैं।

१८. कालाग्नि से लेकर अनुत्तर शिव पर्यन्त २२४ भुवनों का वर्णन शैवागमों में मिलता है। तन्त्रयात्रा (पृ. २६-२७) में इनका विवरण देखा जा सकता है। विभिन्न आगमों में इनकी विभिन्न संख्याएं भी मिलती हैं।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सर्वं शिवशासनादेव प्रवर्तते

यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा ।
तत्सर्वं शङ्करस्याज्ञाबलेन समधिष्ठितम् ॥४२॥
आज्ञाबलात्तस्य धरा स्थितेह धराधरा वारिधराः समुद्राः ।
ज्योतिर्गणाः शक्रमुखाश्च देवाः स्थिरं चरं वा चिदचिद्यदस्ति ॥४३॥

बन्धमोक्षौ

एतावतां पशूनां हि द्विपदां च चतुष्पदाम् ।
ईशः शिवो बन्धमोक्षौ तद्वशे तिष्ठतो ध्रुवम् ॥४४॥

दीक्षया शिवप्रसादप्राप्तिः

अनन्तजन्ममरणकारणात् पाशसंचयात् ।
मुमुक्षुराचरेद्दीक्षां शाम्भवीं पाशकृन्तिनीम् ॥४५॥
न विना तत्प्रसादेन प्राणिनां बन्धविच्युतिः ।
लभ्यते तत्प्रसादोऽपि नानया दीक्षया विना ॥
वेदानुशासनमिदमेतद् वै शिवशासनम् ॥४६॥

अतीत, और भविष्य में होने वाले अथवा हुए समस्त पदार्थ, दिशाएं, विदिशाएं और कला आदि कालभेद अथवा कालभेद और कलाभेद ॥४१॥

जो कुछ भी इस जगत् में दिखाई पड़ता है अथवा जिसके विषय में सुनाई पड़ता है, वह सब कुछ भगवान् शंकर की आज्ञा के बल से ही टिका हुआ है।॥४२॥ उस भगवान् शंकर की आज्ञा से ही यहां पृथिवी टिकी हुई है । धरा (पृथ्वी) को स्थिर रखने वाले पर्वत, जल को धारण करने वाले समुद्र, आकाश में स्थित चन्द्र, सूर्य, नक्षत्र आदि ज्योतिर्गण, इन्द्र आदि देवता ही क्या, इस जगत् के यावत् स्थावर-जंगम, जड़ और चेतन पदार्थ हैं, वे सब उस भगवान् शिव के शासन में ही स्थित हैं ॥४३॥

इन सब दो पैर वाले अथवा चार पैर वाले पशुओं के स्वामी भगवान् शिव ही है। इन्हीं के वश में उनके बन्ध और मोक्ष की व्यवस्था है, यह ध्रुव सत्य है ॥४४॥

अनन्त जन्म और मरण की प्रक्रिया में पशुओं के मल, माया, कर्म आदि पाश संचित होते जाते हैं । इन पाशों को काट डालने वाली दीक्षा ही मुमुक्षु (मोक्ष की इच्छावाले) के लिये एक मात्र सहारा है।॥४५॥ भगवान् शिव के [१९]प्रसाद (अनुग्रह) के सिवाय प्राणी को इन पाशों के बन्धनों से छुटकारा नहीं मिलता और उनका प्रसाद दीक्षा के बिना प्राप्त नहीं किया जा सकता । यही वेदों का अनुशासन (उपदेश) है और यही शिव की भी आज्ञा है।॥४६॥

---

१९. सृष्टि, स्थिति, संहार, निग्रह और अनुग्रह — ये भगवान् शिव के पांच कृत्य हैं। आगमशास्त्र के सभी ग्रन्थों में और शिवपुराण में भी इनका विवरण मिलता है। यहां अनुग्रह को प्रसाद कहा गया है। वीरशैव दर्शन में इस शब्द का अन्य अर्थों में भी प्रयोग मिलता है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शाम्भवव्रतस्य भवनिवारकत्वम्

वेधामनुक्रियाभिख्यदीक्षात्रितयशोभितम् ।
षडध्वशुद्धिकलितं गुरुकारुण्यसंभृतम् ॥
भस्मरुद्राक्षश्रीलिङ्गधारणात्मकमुत्तमम् ॥४७॥
शाम्भवव्रतमेतद्धि वेदशास्त्रैकचोदितम् ।
इदं शिवप्रसादैककारणं भववारणम् ॥४८॥
एकैकमपि चास्याङ्गं मुक्तिदं कीर्तितं श्रुतौ ।
किमु वाच्यं नु सर्वाङ्गकलितं मोक्षदं त्विति ॥४९॥

इति श्रीचन्द्रज्ञानागमे उत्तरभागेऽनन्तरुद्रबृहस्पतिसंवादे शिवशासने क्रियापादे शिवाधिक्यकथनं नाम प्रथमः पटलः ॥१॥

वेदों और शास्त्रों के द्वारा उपदिष्ट यह उत्तम शांभव व्रत[२०] वेधा, मनु (मन्त्र) और क्रिया नाम की त्रिविध दीक्षा [२१]से शोभित है, [२२]षडध्वशुद्धि से पवित्र है, गुरु की करुणा से ओतप्रोत है। इसमें शास्त्रोपदिष्ट विधि से भस्म, रुद्राक्ष और इष्टलिंग को धारण किया जाता है । शिव के अनुग्रह की प्राप्ति का यह व्रत एकमात्र कारण है । इसके आचरण से भक्त भवसागर से मुक्त हो जाता है ॥४७-४८॥ श्रुति (वेद और आगम शास्त्र) में इसका एक एक अंग भी मुक्ति का कारण माना गया है । फिर सभी अंगों का यदि एक साथ अनुष्ठान किया जाय, तो फिर मोक्ष की प्राप्ति के लिये कहना ही क्या है? अर्थात् अवश्य ही अतिशीघ्र मोक्ष की प्राप्ति हो जाती है ॥४९॥

इस प्रकार अनन्त रुद्र और ब्रहस्पति के संवाद के रूप में आगत श्रीचन्द्रज्ञा-नागम नामक इस शिवशास्त्र के उत्तर भाग के क्रियापाद का यह शिवाधिक्य कथन *नाम का प्रथम पटल समाप्त हुआ ।*

---

२०. यहां संक्षेप में निर्दिष्ट शांभव व्रत का इस आगम के आगे के पटलों में अष्टावरण, पंचाचार आदि के रूप में विशद विवेचन मिलता है ।

२१. वेधा, मन्त्र और क्रिया नामक त्रिविध दीक्षा का निरूपण सिद्धान्तशिखामणि (६।११-२१) में गुरुकारुण्यस्थल का वर्णन करते समय किया गया है।

२२. शिव और शक्ति का शास्त्रों में शब्द और अर्थ के जैसा अविनाभाव संबन्ध माना गया है। महाकवि कालिदास ने रघुवंश के प्रथम मंगल श्लोक में पार्वती और परमेश्वर की इसी रूप में स्तुति की है। सृष्टि के समय शब्द का वर्ण, पद और मन्त्र के रूप में तथा अर्थ का कला, तत्त्व और भुवन के रूप में विस्तार होता है। यह विस्तार ही षडध्वात्मक संसार के नाम से व्यवहृत होने लगता है। दीक्षा देते समय आचार्य शिष्य के शरीर में स्थित इन षड्विध अध्वाओं की शुद्धि का भी विधान करता है। शैव शास्त्रों में इसका विस्तार से वर्णन मिलता है। तन्त्रालोक के ६-१२ आह्निकों में षडध्वशुद्धि की प्रक्रिया विस्तार से देखी जा सकती है।

❋❋❋

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

द्वितीयः पटलः

बृहस्पतिरुवाच

सर्वज्ञानसुधाम्बोधे करुणैकविभूषण ।
शाम्भवीयव्रताङ्गानां माहात्म्यं विनिबोधय ॥१॥

अनन्तरुद्र उवाच

अष्टावरणानि

गुरुर्लिङ्गं जङ्गमश्च तीर्थं चैव प्रसादकः ।
भस्मरुद्राक्षमन्त्राश्चेत्यष्टावरणसंज्ञिताः ॥२॥
इमानि शिवभक्तानां भवदोषततेः सदा ।
निवारणैककार्याणि ख्यातान्यावरणाख्यया ॥३॥

१. गुरुस्वरूपं महिमा च

अष्टानामादितस्त्वेषां स्वरूपं महिमाऽपि च ।
संग्रहेण प्रवक्ष्यामि शृणुष्वैकाग्रचेतसा ॥४॥

बृहस्पति प्रश्न करते हैं—

हे सभी प्रकार के ज्ञानामृत के समुद्र, एकमात्र करुणा को ही भूषण के रूप में धारण करने वाले अनन्तरुद्र! आप मुझे इस शांभव व्रत के अंगों के माहात्म्य को समझाइये ॥१॥

अनन्तरुद्र उत्तर देते हैं—

गुरु, लिंग, जंगम, तीर्थ, प्रसाद, भस्म, रुद्राक्ष और मन्त्र—ये आठ अंग अष्टावरण के नाम से प्रसिद्ध हैं॥२॥ ये आठ अंग शिवभक्तों के सांसारिक दोषों के समूह को उनसे सदा दूर रखते हैं। इसीलये ये [1]आवरण के नाम से प्रसिद्ध हैं॥३॥

इन आठों का मैं क्रमशः संक्षेप में प्रारंभ से अन्त तक स्वरूप और माहात्म्य बता रहा हूँ। इसको तुम एकाग्र मन से सुनो॥४॥ मोक्ष की प्राप्ति के लिये यदि किसी को दीक्षा लेनी है, तो वह गुरु से ही मिल सकती है। बिना गुरु की सहायता के कोई

---

१. डॉ. चन्द्रशेखर शिवाचार्य महास्वामीजी ने अपने हिन्दी ग्रन्थ "अष्टावरण विज्ञान" में आवरण शब्द की व्याख्या इस प्रकार की है-"आव्रियते देहादिकं येन तद् आवरणम्" यह आवरण शब्द की व्युत्पत्ति है। इसके ढकना, छिपाना, घेरना आदि अनेक अर्थ होते हैं। आवरण के दो प्रयोजन हैं—पहला किसी को वस्तु का वास्तविक ज्ञान न होने देना और दूसरा सभी प्रकार की विनाशकारी शक्तियों से रक्षा करना। इस प्रकार आवरण शब्द से स्वरूप का आच्छादन और रक्षा का कवच—ये दोनों अर्थ सिद्ध होते हैं" (पृ.३)। प्रस्तुत प्रकरण में द्वितीय अर्थ प्रधान है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मोक्षस्य दीक्षासंप्राप्त्यै गुरुः स्यान्मूलकारणम् ।
न विना गुरुणा सिद्ध्यै साधनानि भवन्त्यलम् ॥५॥
शिष्यस्तु शिक्षणीयत्वाद् गुरुगौरवकारणम् ।
तस्मात् सर्वप्रयत्नेन गुरोर्गौरवमाचरेत् ॥६॥
यो गुरुः स शिवः प्रोक्तो यः शिवः स गुरुः स्मृतः ।
गुरुर्वा शिव एवाथ विद्याकारेण संस्थितः ॥७॥

शिव-विद्या-गुरूणां समानफलदत्वम्

यथा शिवस्तथा विद्या यथा विद्या तथा गुरुः ।
शिवविद्यागुरूणां च पूजया सदृशं फलम् ॥८॥
सर्वदेवात्मकश्चासौ सर्वमन्त्रमयो गुरुः ।
तस्मात् सर्वप्रयत्नेन तस्याज्ञां शिरसा वहेत् ॥९॥

गुर्वाज्ञापालनेन सत्फलप्राप्तिः

श्रेयोऽर्थी यदि गुर्वाज्ञां मनसाऽपि न लङ्घयेत् ।
गुर्वाज्ञापालको यस्माद् ज्ञानसंपत्तिमश्नुते ॥१०॥

भी साधन फल-प्राप्ति में सहायक नहीं हो सकता ॥५॥ शिष्य को गुरु शिक्षा देता है , शिष्य के लिये गुरु गौरव का कारण बनता है, शिष्य के गौरव को बढाता है । इस लिये शिष्य को चाहिये कि वह सभी प्रकार से गुरु के प्रति आदरभाव प्रदर्शित करे ॥६॥ जो गुरु है, वही शिव कहलाता है और जो शिव है वही गुरु माना गया है । गुरु हो अथवा शिव, विद्या (मन्त्र) के रूप में इन दोनों की स्थिति मानी गई है, अर्थात् विद्या इन दोनों से भिन्न नहीं है ॥७॥

जैसे शिव हैं, वैसी ही विद्या (मन्त्र) है और जैसी विद्या (मन्त्र) है, वैसे ही गुरु भी हैं । इस प्रकार [२]शिव, विद्या और गुरु की पूजा करने से समान फल की प्राप्ति होती है ॥८॥ गुरु सर्वदेवात्मक तथा सर्वमन्त्रात्मक हैं, अर्थात् सभी देवता और मन्त्र गुरु के शरीर में स्थित हैं । इसलिये मनुष्य को चाहिये कि वह सभी तरह से गुरु की आज्ञा को सिर नवाकर उसका पालन करे॥९॥

अपना कल्याण चाहने वाला व्यक्ति गुरु की आज्ञा का उल्लंघन करने की बात मन में भी न सोचे, क्योंकि गुरु की आज्ञा का पालन करने वाला व्यक्ति ज्ञान के खजाने को पा जाता है॥१०॥ चलते हुए, बैठ कर, सोते समय, भोजन करते समय, व्यक्ति जो कुछ काम करता है, गुरु के सामने रहने पर वह सब गुरु की आज्ञा के अनुसार

---

२. योगिनीहृदय (२.४८-६८) में निगर्भार्थ और कौलिकार्थ का निरूपण करते समय शिव, विद्या (मन्त्र) और गुरु के साथ शिष्य (आत्मा) का भी अभेद स्थापित किया गया है ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गच्छंस्तिष्ठन् स्वपन् भुञ्जन् यद्यत्कर्म समाचरेत् ।
समक्षं यदि कुर्वीत तत्सर्वं गुर्वनुज्ञया ॥११॥
गुरोर्गेहे समक्षे वा न यथेष्टासनो भवेत् ।
गुरुर्देवो यतः साक्षात् तद्गृहं देवमन्दिरम् ॥१२॥
पापिनां च यथा संगात् तत्पापफलभाग् भवेत् ।
तद्वदाचार्यसङ्गेन तद्धर्मफलभाग् भवेत् ॥१३॥
यथेह वह्निसंपर्कान्मलं त्यजति काञ्चनम् ।
तथैव गुरुसंपर्कात् पापं त्यजति मानवः ॥१४॥
यथा प्रज्वलितो वह्निर्निष्ठां काष्ठस्य निर्दहेत् ।
तथाऽयमपि सन्तुष्टो गुरुः पापं क्षणाद् दहेत् ॥१५॥

गुरोः क्रोधेन सर्वनाशः

मनसा कर्मणा वाचा गुरोः क्रोधं न कारयेत् ।
तस्य क्रोधेन दह्यन्ते ह्यायुःश्रीर्ज्ञानसत्क्रियाः ॥१६॥
तत्क्रोधकारिणो ये स्युस्तेषां यज्ञाश्च निष्फलाः ।
यमाश्च नियमाश्चैव नात्र कार्या विचारणा ॥१७॥

ही करे ॥११॥ गुरु के घर पर अथवा उसके सामने रहने पर व्यक्ति मनमाना आचरण न करे, क्योंकि गुरु साक्षात् देवता है और उसका घर साक्षात् देवमन्दिर है॥१२॥ पापियों के संसर्ग से जैसे व्यक्ति उनके पापों के फल का भोक्ता हो जाता है, उसी तरह से आचार्य के सम्पर्क से वह उसके शुभ कर्मों का भी फल प्राप्त कर सकता है॥१३॥ जैसे यहाँ संसार में अग्नि के संम्पर्क से सोना अपनी मलिनता का त्याग कर देता है, उसी तरह से गुरु के सम्पर्क से मनुष्य अपने सारे पापों का त्याग कर देता है॥१४॥ जैसे प्रज्वलित अग्नि लकड़ी को पूरी तरह से जला डालती है, उसी तरह से यह सन्तुष्ट गुरु भी व्यक्ति के सारे पापों को क्षणमात्र में भस्म कर डालता है ॥१५॥

मनुष्य को चाहिये कि वह मन, वचन और कर्म से ऐसा कोई कार्य न करे कि गुरु को क्रोध आवे, क्योंकि गुरु के क्रोध में मनुष्य की आयु, लक्ष्मी, ज्ञान और शुभ कर्म-ये सब कुछ भस्म हो जाते हैं ॥१६॥ जो मनुष्य गुरु को अकारण क्रोध दिलाता है, उसके यज्ञ-याग आदि सारे शुभ कर्म निष्फल हो जाते हैं। उसका [३]अहिंसा आदि

---

३. पातंजल योगसूत्र (२।३०) में अहिंसा, सत्य, अस्तेय, ब्रह्मचर्य और अपरिग्रह नामक पांच यम निरूपित हैं।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गुरोर्विरुद्धं यद्वाक्यं न वदेज्जातुचिन्नरः ।
वदेद् यदि महाघोरे रौरवे पतति ध्रुवम् ॥१८॥
नैर्गुण्ये ख्यापिते तस्य नैर्गुण्यशतभाग्भवेत् ।
गुणे तु ख्यापिते तद्वत् सर्वं पुण्यफलं भवेत् ॥१९॥
गुरोर्हितं प्रियं कुर्यादादिष्टो वा नरः सदा ।
असमक्षं समक्षं वा तस्य कार्यं समाचरेत् ॥२०॥

गुरोरागमने शिष्यस्याचरणम्

गुरुं स्वगृहमायान्तं दृष्ट्वा भक्तियुतो जनः ।
नत्वा तदासनं दत्त्वा चासीत तदनुज्ञया ॥२१॥
स्वाचार्यचरणद्वन्द्वप्रक्षालितजलं सदा ।
यः पिबेद् धारयेद्भक्त्या सर्वपापैः प्रमुच्यते ॥२२॥
चन्दनं चाक्षतं पुष्पं स्वर्णं ताम्बूलमम्बरम् ।
पात्रे निधाय गुरवे शिष्यो दद्यान्न पाणिना ॥२३॥

यमों और शौच आदि नियमों[४] का पालन करना भी व्यर्थ हो जाता है, इसमें कोई सन्देह नहीं है ॥१७॥ जो वाक्य गुरु के विरुद्ध जाता हो, उसका उच्चारण मनुष्य कभी न करे। यदि वह ऐसा करेगा, तो अवश्य ही रौरव नरक में गिरेगा ॥१८॥ यदि कोई व्यक्ति गुरु की निर्गुणता (दोष) का प्रचार करता है, तो वह स्वयं सैकड़ों निर्गुणताओं (दोषों) का खजाना बन जाता है। इसी तरह से गुरु के गुणों की प्रशंसा करने पर वह सभी तरह के पुण्यफल का भागी बनता है ॥१९॥ मनुष्य गुरु की आज्ञा के अनुसार अथवा बिना कुछ कहे भी सदा गुरु के हितकारी और प्रिय कार्यों को उनके सामने अथवा परोक्ष में भी सदा करता रहे ॥२०॥

गुरु को अपने घर की तरफ आते हुए देख कर मनुष्य भक्तिभावपूर्वक उनको प्रणाम करे और उनको योग्य आसन देकर उनकी आज्ञा मिलने पर स्वयं बैठे ॥२१॥ अपने आचार्य के दोनों चरणों को धोकर जो व्यक्ति उस चरणोदक को पीता है और भक्तिभावपूर्वक उससे अपने शरीर को प्रोक्षित करता है, वह सभी पापों से मुक्त हो जाता है ॥२२॥ शिष्य को चाहिये कि वह चन्दन, अक्षत, पुष्प, सुवर्ण, ताम्बूल अथवा वस्त्र, जो कुछ भी गुरु को निवेदित करे, उसे पात्र में रखकर दे, खाली हाथ से नहीं

---

४. पातंजल योगसूत्र (२.३२) में ही शौच, सन्तोष, तप, स्वाध्याय, ईश्वर प्रणिधान नामक पांच नियम बताए गये हैं। अनेक पुराणों में यम और नियम के दस-दस भेद वर्णित हैं। लकुलीश पाशुपतसूत्र के कौण्डिन्यभाष्य (१.९) में, विशुद्धमुनि के यमप्रकरण नामक ग्रन्थ में और गणकारिका एवं उसकी भासर्वज्ञ कृत टीका में भी इनका स्वरूप मिलता है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संभोजयित्वा स्वगुरुं पश्चाद् भुञ्जीत बुद्धिमान् ।
गुरोः पुरस्ताद्यो भुङ्क्ते गुरुद्रोही स उच्यते ॥२४॥
ताम्बूलमुत्तमं तस्मै ततः पात्रेण दापयेत् ।
पश्चादिष्टानि वस्तूनि दत्त्वा नत्वा क्षमापयेत् ॥२५॥
शुभकार्येषु सर्वेषु विवाहादिषु भक्तितः ।
गुरुमभ्यर्चयेच्छिष्यो वस्त्रैर्हैमाङ्गुलीयकैः ॥२६॥
दरिद्रश्चोदितेष्वेषु निजशक्तिमवञ्चयन् ।
अवश्यमर्चयेच्छिष्यो गुरुं लब्धधनेन वा ॥२७॥

गुरुयात्राफलाधिक्यम्

गुरुयात्रा देवयात्रा तीर्थयात्रेति च त्रिधा ।
आसां त्रिविधयात्राणां गुरुयात्रा फलाधिका ॥२८॥
गुरुसंदर्शनार्थाय भक्त्या यात्रां करोति यः ।
पुण्यदेही स विज्ञेयः समस्तामरवल्लभः ॥२९॥
शिष्यो गुरुस्थितं ग्रामं प्रविशन् वाहनादिकम् ।
वर्जयेद् गृहसामीप्ये तथा वै पादुकानि च ॥३०॥

॥२३॥ बुद्धिमान् व्यक्ति को चाहिये कि वह अपने गुरु को भोजन कराने के उपरान्त ही स्वयं भोजन करे। जो व्यक्ति गुरु से पहले स्वयं भोजन कर लेता है, वह गुरु-द्रोही कहलाता है॥२४॥ भोजन के उपरान्त गुरु को पात्र में रखकर उत्तम ताम्बूल देना चाहिये। इसके बाद इष्ट वस्तुओं को समर्पित कर उनसे क्षमाप्रार्थना करनी चाहिये॥२५॥ विवाह आदि सभी शुभ अवसरों कर भक्तिभाव से शिष्य को गुरु के लिये वस्त्र एवं सुवर्ण की अंगूठी आदि आभरणों को समर्पित कर उनका पूजन करना चाहिये॥२६॥ दरिद्र होने पर भी शिष्य को चाहिये कि वह अपनी शक्ति के अनुसार गुरु की ऊपर बताई गई विधि से जो कुछ उसे उपलब्ध हो, उससे अवश्य आराधना करे॥२७॥

गुरुयात्रा, देवयात्रा और तीर्थयात्रा-यह तीन प्रकार की यात्रा होती है। इन त्रिविध यात्राओं में गुरु के दर्शन के लिये की गई यात्रा सबसे अधिक फल देने वाली है ॥२८॥ जो व्यक्ति गुरु के दर्शन के लिये भक्तिपूर्वक यात्रा करता है, उसे पुण्यवान् माना जाता है। वह समस्त देवताओं का प्रिय हो जाता है॥२९॥ शिष्य को चाहिये कि वह जब उस ग्राम में प्रवेश करे, जहां कि गुरु निवास करते हैं, तब अपने वाहन से उतर जाय और गुरु के घर के पास आने पर पादुका भी उतार दे॥३०॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गुरुसेवाविधानम्

गुरुं दिदृक्षुर्यः शिष्यः सद्भक्त्याऽनुदिनं मुदा ।
रिक्तपाणिर्न संपश्येद्यथा राजा तथा गुरुः ॥३१॥
फलं प्रसूनं ताम्बूलमन्यत् किमपि वस्तु च ।
तेष्वेकं गुरवे दत्त्वा नमस्कुर्यात् ततो गुरुम् ॥३२॥
श्रीमानपि तपस्वी च शास्त्रज्ञः कुलशीलवान् ।
कुर्याद्दण्डनमस्कारं निर्लज्जो गुरुसन्निधौ ॥३३॥
उपचारेषु सर्वेषु द्वावेवात्यन्तशोभनौ ।
प्रियवाणी प्रणामश्च तौ विनाऽन्ये वृथा स्मृताः ॥३४॥

गुरुप्रदक्षिणा

अग्रे दृष्ट्वा नमस्कृत्य प्रदक्षिणमनुस्मरन् ।
प्रदक्षिणं च कुर्वीत यथा शक्त्यनुसारतः ॥३५॥
प्रदक्षिणज्ञो यो धीमान् न तु दीर्घपदं न्यसेत् ।
न गच्छेत् त्वरितो धीमान् न वदेदितरैः सह ॥३६॥
पदे पदान्तरं न्यस्य करौ चलनवर्जितौ ।
स्तुतिं वाचा हृदा ध्यानमेवं कुर्यात् प्रदक्षिणम् ॥३७॥

जो शिष्य भक्तिपूर्वक प्रतिदिन प्रसन्नता से भरा हुआ गुरु का दर्शन करना चाहता है, उसे चाहिये कि वह खाली हाथ गुरु के पास न जाय, क्योंकि राजा के समान ही गुरु भी मान्य होता है॥३१॥ अतः फल, पुष्प, ताम्बूल अथवा जो कोई भी वस्तु सरलता से मिल सके, उनमें से किसी एक को गुरु को समर्पित कर तब गुरु को प्रणाम करे ॥३२॥ शिष्य भले ही श्रीमान् हो, तपस्वी हो, शास्त्रज्ञ विद्वान् हो, कुलशील सम्पन्न हो, किन्तु उसे बिना किसी संकोच के गुरु के सामने दण्डवत् प्रणाम करना चाहिये॥३३॥ सभी प्रकार के शिष्टाचारों में दो अत्यन्त प्रशंसनीय माने जाते हैं। उनमें से एक है प्रिय वाणी और दूसरा है प्रणाम करना। इनके बिना अन्य सभी उपचार वृथा हो जाते हैं ॥३४॥

गुरु को सामने देख कर प्रणाम करना चाहिये, उनका ध्यान करना चाहिये और अपनी शक्ति के अनुसार उनकी प्रदक्षिणा भी करनी चाहिये ॥३५॥ जो बुद्धिमान् प्रदक्षिणा के क्रम को जानता है, उसे प्रदक्षिणा करते समय लम्बे डग नहीं भरने चाहिये। उसे चाहिये कि प्रदक्षिणा करते समय जल्दीबाजी न करे और न किसी से वार्तालाप ही करे ॥३६॥ एक पैर को रख लेने के बाद दूसरा पैर धीरे धीरे रखता और उठाता हुआ, दोनों हाथों को बिना हिलाये-डुलाये वाणी से स्तुति और हृदय से गुरु का ध्यान करता हुआ प्रदक्षिणा करे ॥३७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गुरोः पुरतः शिष्यस्याचरणम्

स्वगुरोः पुरतः शिष्यो नेतरान् कीर्तयेज्जनान् ।
असह्यभाषणं चैव न वदेदितरेतरम् ॥३८॥
नानृतं नाप्रियं वाक्यं न गुह्यं चापि भाषयेत् ।
नाप्रच्छन्नमुखो ब्रूयाद् गुरोरग्रे कदाचन ॥३९॥
स्वामि-भट्टारकाचार्य-देव-श्रीगुरुनामभिः ।
वाच्यः सदा गुरुः शिष्यैर्जातुचिन्नान्यनामभिः ॥४०॥
त्वंशब्दं न प्रयुञ्जीत गुरौ शिष्यः कदाचन ।
आज्ञां न लङ्घयेत् तस्य समं नोपविशेत् तथा ॥४१॥
आसनं वाहनं वस्त्रं भूषणं शयनं तथा ।
न कुर्याद् गुरुसादृश्यं गतिसिद्धिहितेप्सुभिः ॥४२॥
पात्रं स्नानजलं छायां माल्योपकरणानि च ।
भक्तिहीनोऽपि पादाभ्यां न स्पृशेन्नैव लङ्घयेत् ॥४३॥

गुरोरुपेक्षा हानिकरी

यः पश्यति गुरुं शिष्यः साधारणमनुष्यवत् ।
तस्य भक्तिर्वृथा विद्वन् भवत्यत्र न संशयः ॥४४॥

शिष्य को चाहिये कि वह अपने गुरु के सामने अन्य अनावश्यक व्यक्तियों की चर्चा न करे । इसी तरह से आपस में एक दूसरे के साथ असह्य, उत्तेजक भाषण भी न करे।॥३८॥ गुरु के साथ असत्य, अप्रिय अथवा गुह्य भाषण (कानाफूसी), कभी न करे । उसको चाहिये कि वह गुरु के सामने मुँह पर हाथ या वस्त्र रखे बिना न बोले ॥३९॥ स्वामी, भट्टारक, आचार्य, देव, श्रीगुरु जैसे नामों से ही गुरु को संबोधित करना चाहिये । शिष्यों को चाहिये कि वे इनके सिवाय अन्य किसी नाम से गुरु को संबोधित न करें।॥४०॥ शिष्य को चाहिये कि वह गुरु के प्रति [५]त्वं (तुम) शब्द का प्रयोग कभी न करे,, उसकी आज्ञा का उल्लंघन न करे और उसके साथ समान आसन पर न बैठे।॥४१॥ जो व्यक्ति अपनी सद्गति चाहता है, सिद्धि प्राप्त करना चाहता है और अपना हित चाहता है, उसे चाहिये कि वह आसन, वाहन, वस्त्र, भूषण और शयन में गुरु की बराबरी न करे।॥४२॥ जिस शिष्य की गुरु के प्रति कोई भक्ति नहीं रह गई है, उसे भी चाहिये कि गुरु के पात्र को, स्नान जल को, छाया को और माला आदि उपकरणों को पैरों से न छूए।॥४३॥

जो शिष्य गुरु के प्रति साधारण मनुष्य की जैसी दृष्टि रखता है, उसे केवल मनुष्य

---

५. "गुरुं त्वंकृत्य हुंकृत्य गुरुं निर्जित्य वादतः" गुरुगीता का यह १०४ वां श्लोक देखिये ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समस्तदेवतावासं सर्वमन्त्रास्पदं गुरुम् ।
उपेक्षते यः पापात्मा रौरकं नरकं व्रजेत् ॥४५॥

गुरुभक्तिमहिमा

गुरावत्यन्तभक्तस्य शिष्यस्येह परत्र च ।
न किञ्चिद् दुर्लभं विद्वन् समस्तं सुलभं सदा ॥४६॥
इत्थमाचारवान् भक्त्या नित्यमुद्युक्तमानसः ।
गुरुप्रियकरः शिष्यः सर्वान् धर्मांस्तथार्हति ॥४७॥

गुरुलक्षणम्

गुरुश्च गुणवान् प्राज्ञः परमान्दभासकः ।
तत्त्वविच्छिवसंसक्तो मुक्तिदो न तु चापरः ॥४८॥
शैवसिद्धान्ततत्त्वज्ञः प्रतिष्ठामन्त्रपारगः ।
मोक्षदः करुणोपेतो वीतरागो विमत्सरः ॥४९॥
क्रियादिज्ञानपर्यन्तशिवतत्त्वविनिश्चयः ।
सम्प्रदायागतज्ञानो गुरुवंशसमुद्भवः ॥५०॥

मानता है, उसकी सारी भक्ति वृथा चली जाती है। हे बृहस्पति! इसमें किसीप्रकार का संशय नहीं है॥४४॥ समस्त देवता और समस्त मन्त्र जहाँ निवास करते हैं, उस गुरु की जो व्यक्ति उपेक्षा करता है, उससे बढ कर कोई परमात्मा नहीं है। वह रौरव नरक में जाता है॥४५॥

हे विद्वन्, जिस शिष्य की गुरु के प्रति अत्यन्त भक्ति है, उसके लिये इस लोक और परलोक में कुछ भी दुर्लभ नहीं है, उसके लिये सब कुछ सुलभ हो जाता है॥४६॥ इस प्रकार के आचारों से सम्पन्न, भक्तिपूर्वक गुरु के प्रिय कार्यों को सम्पन्न करने में सदा तत्पर रहने वाला शिष्य सभी प्रकार के धर्माचरण में समर्थ हो जाता है॥४७॥

गुरु भी वही हो सकता है, जो गुणवान्, विद्वान्, परमानन्द की अनुभूति कराने में समर्थ, तत्त्ववेत्ता, शिवभक्त और मुक्ति को दिलाने में समर्थ हो। यदि ऐसा नहीं है, तो वह गुरु नहीं हो सकता॥४८॥ गुरु शैव सिद्धान्त के तत्त्वों को जानने वाला होता है, वह वह प्रतिष्ठा की विधि और मन्त्रों का जानकार होता है। वह मोक्ष की प्राप्ति कराने वाला, करुणा से सम्पन्न, वीतराग और मत्सर (ईर्ष्या) से रहित होता है॥४९॥ क्रिया से [६]ज्ञान पर्यन्त, अर्थात् शिवागम के क्रिया, चर्या, योग और ज्ञान नामक चार

---

६. "त्रिपदार्थं चतुष्पादं महातन्त्रम्" इस वाक्य की व्याख्या करते हुए सर्वदर्शनसंग्रहकार अपने ग्रन्थ के शैवदर्शन प्रकरण में पति, पशु और पाश नामक तीन पदार्थों की तथा ज्ञान, क्रिया, योग और चर्या नामक चार पादों की स्पष्ट व्याख्या प्रस्तुत करते हैं (पृ० ६५-६६)।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लिङ्गाङ्गस्थलभेदज्ञः षट्स्थलज्ञानतत्परः ।
दीक्षाकर्मादिकुशलः षडध्वज्ञानवत्सलः ॥५१॥
शिवस्य च गुरोर्भक्तः शिवैकाहितमानसः ।
शिवार्चनासक्तचित्तः शिवध्यानैकतत्परः ॥५२॥

गृहस्थस्यैव गुरुत्वसमर्थनम्

गुरुर्गृहस्थ एव स्यान्न कदाचिद्यतिर्गुरुः ।
वानप्रस्थयतीनां तु गुरुत्वं निष्फलं भवेत् ॥५३॥

गुरुतत्त्वनिर्णयः

गुरवो बहवः सन्ति शिष्यवित्तापहारकाः ।
दुर्लभोऽयं गुरुर्लोके शिष्यहृत्तापहारकः ॥५४॥
संवित्तिजननं सत्यं परानन्दसमुद्भवम् ।
तत्तत्त्वं विदितं येन स एवानन्ददर्शकः ॥५५॥
स पुनर्नाममात्रेण संवित्तिरहितस्तु यः ।
अन्यं न तारयेदज्ञः किं शिला तारयेच्छिलाम् ॥५६॥

पादों के समस्त विषयों के तत्त्वों का जिसे निश्चित ज्ञान है, गुरु परम्परा से ज़िसे ज्ञान प्राप्त हुआ है और जो गुरु वंश में उत्पन्न हुआ है।।५०।। लिंग और अंग स्थल के भेद को जो भली भांति जानता है, षट्स्थल के रहस्य को समझाने में जो सदा लगा रहता है, दीक्षा आदि कर्मों के सम्पादन में जो कुशल है और जिसको [७]षडध्व का ज्ञान अतिप्रिय है।।५१।। जो शिव और गुरु के प्रति भक्ति रखता है, एकमात्र शिव के प्रति ही जिसका मन लगा हुआ है, शिव की पूजा में ही जिसका चित्त सदा रमा रहता है और जो सदा शिव के ध्यान में तत्पर है, वही वास्तव में गुरु होता है ।।५२।।

गुरु गृहस्थ ही हो सकता है । यति को कभी गुरु नहीं बनाया जा सकता । वानप्रस्थ और यति का गुरुत्व निष्फल माना जाता है।।५३।।

शिष्य के धन का अपहरण करने वाले गुरु तो बहुत से मिल जायेंगे, किन्तु वैसा गुरु दुर्लभ है, जो शिष्य के हृदय में स्थित ताप को दूर कर सके।।५४।। संवित्ति (सत्य ज्ञान) की निष्पत्ति निश्चय ही परानन्द से उत्पन्न होती है, अर्थात् जो व्यक्ति परानन्द में निमग्न है, वही दूसरे व्यक्ति में सत्य ज्ञान को पैदा कर सकता है। इस सत्य को जो जानता है, वही गुरु शिष्य को आनन्द का दर्शन करा सकता है।।५५।। इसके विपरीत जिस गुरु में अभी स्वयं ही सत्य ज्ञान की उद्भूति (उत्पत्ति) नहीं हुई है, वह नाममात्र का गुरु है। ऐसा आज्ञानी व्यक्ति दूसरे को तार नहीं सकता। क्या एक शिला

---

७. वर्ण, पद, मन्त्र और कला, तत्त्व, भुवन नामक छः अध्वाओंका स्वरूप प्रथम पटल की २२वीं टिप्पणी में बताया जा चुका है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एषा तन्नाममात्रेण मुक्तिर्वै नाममात्रिका ।
यैः पुनर्विदितं तत्त्वं ते मुक्ता मोचयन्त्यपि ॥५७॥
तत्त्वहीने कुतो बोधः कुतो ह्यात्मपरिग्रहः ।
परिग्रहविनिर्मुक्तः पशुरित्यभिधीयते ॥५८॥
पशुभिः प्रेरितश्चापि पशुत्वं नातिवर्तते ।
तस्मात्तत्त्वं विदित्वेह मुक्तो मोचक इष्यते ॥५९॥
सर्वलक्षणयुक्तोऽपि सर्वशास्त्रं विदन्नपि ।
सर्वोपायविधिज्ञोऽपि तत्त्वहीनस्तु निष्फलः ॥६०॥

दुष्टगुरुलक्षणम्

व्यसनी वामनः कुब्जो कोपी च कुटिलः खलः ।
चपलोऽधिकहीनाङ्गः पापीयान् सूचकोऽन्त्यजः ॥६१॥
व्याधिगस्तार्किकः शूरः काकनादो बकव्रती ।
गुरुदेवद्विजातीनां निन्दको वृषलीपतिः ॥६२॥

दूसरी शिला को तार सकती है?॥५६॥ कुछ दार्शनिक मुक्तावस्था में शिला के सदृश स्थिति मानते हैं। यह कोरी नाम मात्र की स्थिति है। इसके विपरीत जो तत्त्वज्ञानी हैं, वे स्वयं मुक्त हैं और दूसरों को भी मुक्त कराते हैं॥५७॥ जो व्यक्ति तत्त्वज्ञान से रहित है, उसे [८]बोध (शिवज्ञान) कैसे हो सकता है? और उसे आत्मस्वरूप का ज्ञान भी कैसे हो सकता है? जिस व्यक्ति को आत्मस्वरूप का ज्ञान नहीं है, वह 'पशु' कहलाता है॥५८॥ एक पशु से प्रेरित दूसरे पशु का पशुत्व निवृत्त नहीं हो सकता। इस लिये तत्त्व को जानकर स्वयं मुक्त हुआ व्यक्ति ही दूसरे को मुक्त करा सकता है॥५९॥ सभी लक्षणों से युक्त, सभी शास्त्रों को और सभी उपायों एवं विधियों को जानने वाला व्यक्ति भी यदि तत्त्ववेत्ता नहीं है, तो यह सब कुछ व्यर्थ है॥६०॥

जो गुरु व्यसनी, बौना, कुबड़ा, क्रोधी, कुटिल, दुष्ट, चपल, अधिक अथवा हीन अंग वाला, पापी, चुगलखोर और अन्त्यज है॥६१॥ जो गुरु बीमार, तार्किक, पहलवान, काक जैसी कटु बोली वाला, बक के समान ध्यान लगाने वाला, गुरु, देवता और द्विजाति का निन्दक और कुलटा का पति है॥६२॥ जो व्यक्ति लम्बे होठों वाला, टेढी नाक वाला, कुष्ठी, कलहप्रिय, दूसरे की निन्दा करने वाला है, ऐसे को अपना

---

८. अष्टप्रकरण के नाम से प्रकाशित सिद्धान्त शैवागम के ग्रन्थों में अध्यवसायात्मक तथा अनध्यवसायात्मक द्विविध बोध का निरूपण किया गया है। इनमें अनध्यवसायात्मक बोध से ही शिवस्वरूप ज्ञात हो सकता है। यहां (मोक्षकारिका) के कुछ श्लोक (१०६, १११) नारदीय पुराण (१।६३।११०-१११) में भी उपलब्ध होते हैं। विशेष शब्दार्थ सूचिका की सहायता से बोध शब्द का विस्तृत विवरण प्राप्त किया जा सकता है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लम्बोष्ठो वक्रनासश्च गलीनः (लितः) कलहप्रियः ।
परापवादशीलश्च वर्जनीयो गुरुः स्मृतः ॥६३॥
अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ।
शठो मिथ्याविनीतश्च बकव्रतचरो द्विजः ॥६४॥

योग्यगुरुवरणम्

यस्यानुभवपर्यन्ता मतिस्तत्त्वे प्रतिष्ठिता ।
तस्यावलोकनाद्यैश्च परानन्दोऽभिजायते ॥६५॥
तस्माद्यस्यैव संपर्कात् प्रबोधानन्दसंभवः ।
गुरुं तमेव वृणुयान्नापरं मतिमान्नरः ॥६६॥

शिष्यलक्षणं तत्कर्तव्यं च

तत्रादावुपसंगम्य ब्राह्मणं वेदपारगम् ।
गुरुमाराधयेत् प्राज्ञं सुभगं प्रियदर्शनम् ॥६७॥
सर्वाख्येयप्रदातारं करुणाक्रान्तमानसम् ।
तोषयेत् तं प्रयत्नेन मनसा कर्मणा गिरा ॥६८॥
तावदाराधयेच्छिष्यः प्रसन्नोऽसौ भवेद्यथा ।
तस्मिन् प्रसन्ने शिष्यस्य सद्यः पाशक्षयो भवेत् ॥६९॥

गुरु नहीं बनाना चाहिये॥६३॥ जिसकी नजरें झुकी रहती हैं, जो दुराचारी है, सदा स्वार्थ सिद्ध करने में लगा रहता है, धूर्त है और मिथ्या विनय दिखाता है, ऐसे बगुलाभगत द्विज को गुरु नहीं बनाना चाहिये॥६४॥

जिसकी बुद्धि तत्त्व में प्रतिष्ठित होकर उसका साक्षात्कार करने में समर्थ हो गई है और जिसको देखने अथवा बात करने मात्र से परमानन्द की अभिव्यक्ति होती है, वही सद्गुरु वरणीय है॥६५॥ इसलिये जिसके सम्पर्क से प्रबोध और आनन्द की अनुभूति होती है, बुद्धिमान् व्यक्ति को चाहिये कि उसी को अपने गुरु के रूप में वरण करे, दूसरे को नहीं॥६६॥

इसके लिये प्रारंभ में वेदवेदान्त के पारंगत ब्राह्मण के पास जाकर बुद्धिमान्, सौभाग्यशाली, सौम्य गुरु के रूप में वरण कर उसकी आराधना करे॥६७॥ सभी प्रकार के ज्ञान के प्रदाता, करुणा से ओत-प्रोत चित्त वाले उस गुरु को मन, कर्म और वाणी से सन्तुष्ट करने का प्रयत्न करे॥६८॥ शिष्य उस गुरु की तब तक सेवा करता रहे, जब तक कि वह प्रसन्न नहीं हो जाते। गुरु के प्रसन्न हो जाने पर शिष्य के सारे पाश क्षीण हो जाते हैं॥६९॥ इसलिये शिष्य को चाहिये कि वह सभी पाशों का क्षय कर देने वाले

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तस्माद्धनानि रत्नानि क्षेत्राणि च गृहाणि च ।
भूषणानि च वासांसि यानशय्यासनानि च ॥७०॥
एतानि गुरवे दद्याद् भक्त्या वित्तानुसारतः ।
वित्तशाठ्यं न कुर्वीत यदीच्छेत् परमां गतिम् ॥७१॥
स एव जनको माता भ्राता बन्धुजनः स्वयम् ।
मित्रं धनं च यत्तस्मात् सर्वं तस्मै निवेदयेत् ॥७२॥
निवेद्य पश्चात् स्वात्मानं सान्वयं सपरिग्रहम् ।
समर्प्य सादरं तस्मै नित्यं तद्वशगो भवेत् ॥७३॥
यदा शिवाय स्वात्मानं दत्तवान् देशिकात्मने ।
तदा शैवो भवेद् देही न ततोऽस्ति पुनर्भवः ॥७४॥
देशिकाकृतिमास्थाय पशोः पाशानशेषतः ।
छित्वा परं पदं देवो नयत्येनमसंशयम् ॥७५॥

शिष्यपरीक्षा

गुरुस्तु स्वाश्रितं शिष्यं परीक्षेद् वर्षमेककम् ।
ब्राह्मणं क्षत्रियं वैश्यं द्वित्रिवर्षकमेव वा ॥७६॥

गुरु को धन, रत्न, खेत, घर, भूषण, वस्त्र, यान, शय्या, आसन आदि समर्पित करे।।७०।। अपनी धन-सम्पत्ति को ध्यान में रखते हुए शिष्य को गुरु के लिये यह सब कंजूसी दिखाये बिना भक्तिपूर्वक देना चाहिये। ऐसा करने से उसे परम गति मिलती है।।७१।। वह गुरु ही उसका पिता, माता, भ्राता है। वही उसका बन्धु, मित्र और धन भी है। इसलिये सब कुछ उसके लिये समर्पित कर देना चाहिये।।७२।। इन सबको समर्पित कर देने के बाद उसे अपने पूरे वंश और पुत्र-कलत्र आदि को भी आदरपूर्वक समर्पित कर उसकी आज्ञा के अनुसार चलना चाहिये।।७३।। जब शिष्य देशिक (गुरु) के रूप में विद्यमान शिव को अपने को [१]समर्पित कर देता है, तब वह स्वयं शिव स्वरूप हो जाता है। उसका पुनर्जन्म नहीं होता।।७४।। देशिक के रूप में भगवान् शिव ही इस पशु के समस्त पाशों को काट कर परम पद तक पहुँचा देते हैं, इसमें कोई संशय नहीं है।।७५।।

गुरु को भी चाहिये कि वह अपने पास आये ब्राह्मण शिष्य की एक वर्ष तक,

---

१. मुण्डक (३।२।३) और कठ (२।२३) उपनिषदों में उपदिष्ट-''नायमात्मा प्रवचनेन लभ्यः'' इस मन्त्र के अनुसार प्रवचन सुनने से, विविध शुभ कर्मों के अनुष्ठान से और शास्त्रों के निरन्तर श्रवण करने से भी शिवस्वरूप की प्रतीति नहीं होती। यह तो उसी को प्रतीत होता है, जिसके कि सामने स्वयं वह अपनी इच्छा से प्रकट होता है। इसके लिये शरणागति ही सबसे प्रमुख उपाय है। इसी लिये यहां गुरुस्वरूप शिव के प्रति आत्मसमर्पण की बात कही गई है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्राणद्रव्यप्रदानाद्यैरादेशैश्च समासमैः ।
उत्तमांश्चाधमे कृत्वा नीचानुत्तमकर्मणि ॥७७॥
आकृष्टास्ताडिता वा ये विषादं नैव यान्त्यपि ।
ते योग्याः सततं शुद्धाः शिवसंस्कारकर्मणि ॥७८॥
अहिंसका दयावन्तो नित्यमुद्युक्तचेतसः ।
अमानिनो बुद्धिमन्तस्त्यक्तस्पर्धाः प्रियंवदाः ॥७९॥
ऋजवो मृदवः स्वच्छा विनीताः स्थिरचेतसः ।
शौचाचारसमोपेताः शिवभक्ता द्विजातयः ॥८०॥
एवं वृत्तसमोपेता वाङ्मनःकायकर्मभिः ।
शोध्या बोध्या यथान्याय्यमिति शास्त्रविनिश्चयः ॥८१॥

गुरुमहिमा

शिवे रुष्टे गुरुस्त्राता न रुष्टे निजसद्गुरौ ।
त्राता शिवस्तदेतस्माद् गुरुपूजारतो भवेत् ॥८२॥
यः स्वस्य गुरुपूजां तु त्यक्त्वा शिवपदं यजेत् ।
पराङ्मुखः शिवस्तस्य नरकं संप्रयच्छति ॥८३॥

क्षत्रिय की दो वर्ष और वैश्य शिष्य की तीन वर्ष तक परीक्षा करे।।७६।। उस शिष्य को प्राण द्रव्य आदि देने के उलटे-सीधे आदेश देता रहे। उत्तम वंश के शिष्य को नीच कार्यों में और नीच वंश के शिष्य को उत्तम कार्यों में लगावे।।७७।। डाटने-डपटने से अथवा मारने-पीटने पर भी जो शिष्य दुःखी या क्रुद्ध न होता हो, ऐसा शिष्य शिव-दीक्षा के लिये सदा शुद्ध और योग्य अधिकारी माना जाता है।।७८।। अहिंसक, दयावान्, सदा सावधान चित्त वाले, निरभिमानी, बुद्धिमान्, ईर्ष्या-द्वेष से रहित, प्रिय वचन बोलने वाले, सरल स्वभाव के, मृदुभाषी, स्वच्छ मन के, विनीत, स्थिर चित्तवाले, शौच और आचार से सम्पन्न, शिवभक्त, द्विजाति कुलोत्पन्न, सदाचार सम्पन्न इस प्रकार के शिष्य के वाणी, मन, शरीर और कर्म का न्यायपूर्वक शोधन और बोधन करना चाहिये।।७९-८१।।

शिव के रुष्ट हो जाने पर तो गुरु शिष्य की रक्षा करना है, किन्तु सद्गुरु के रुष्ट हो जाने पर शिव उसकी रक्षा नहीं करते। इसलिये व्यक्ति गुरु की पूजा में सदा लगा रहे।।८२।। जो व्यक्ति अपने गुरु की पूजा को छोड़ कर शिव पद का यजन करता है, उसके प्रति शिव पराङ्मुख हो जाते हैं, उसे नरक का भागी बना देते हैं।।८३।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गुरुपूजाफलम्

एतत्सर्वं परिज्ञाय पूजां कुर्याद् गुरोः स्वयम् ।
गुरुः पूजाभिसंतुष्टः स्वसायुज्यं प्रयच्छति ॥८४॥
कार्तिके सोमवारे च पुष्पैः पत्रैः फलैर्यजेत् ।
शक्तश्चेत्तस्य पूजायां मासमेकमतन्द्रितः ॥
त्रिकालं वाऽथ षट्कालं प्रदोषे वा समर्चयेत् ॥८५॥
भूतिरुद्राक्षभूषाढ्यः पञ्चाक्षरमनुं जपन् ।
त्वरया गुरुसामीप्यं गतस्तत्पादपङ्कजौ ॥
नमस्कृत्वाऽऽनयेद्भक्त्या स्वगृहं प्रति तं गुरुम् ॥८६॥

गृहागतस्य गुरोः सत्कारः

आन्दोलिकायामारोप्य गजे वाऽपि तुरङ्गमे ।
अनुगच्छेत् स्वयं भक्त्या वाद्यघोषसमन्वितः ॥८७॥
गृहं नीत्वा गुरुं पश्चात् क्षालयंस्तत्पदद्वयम् ।
तेनोदकेन शिरसि संप्रोक्ष्य स्वजनैः सह ॥८८॥
दत्त्वा हस्तावलम्बं च ततो नीत्वा गृहान्तरम् ।
प्रकल्प्य चासनं श्रेष्ठं निवेश्य प्रीतिपूर्वकम् ॥
यथाविध्यवधानेन पूजयेद् गुरुमव्ययम् ॥८९॥

इन सब बातों को जान कर शिष्य को चाहिये कि वह स्वयं सदा गुरु की पूजा करे। गुरु की पूजा से सन्तुष्ट हुए भगवान् शिव उसे अपना सायुज्य देते हैं।।८४।। कार्तिक मास में सोमवार के दिन पत्र, पुष्प और फल से गुरु की पूजा करनी चाहिये । यदि समर्थ है, तो उसे पूरे मास भर निरालस्य हो गुरु का पूजन तीन काल में छः काल में अथवा प्रदोष वेला में करना चाहिये।।८५।। भस्म और रुद्राक्ष से विभूषित हो, पंचाक्षर मन्त्र का जप करते हुए, द्रुत गति से गुरु के समीप जाकर, उनके चरणकमलों में प्रणाम कर, भक्तिपूर्वक गुरु को अपने घर पर ले आना चाहिये।।८६।।

आन्दोलिका (पालकी), हाथी अथवा घोड़े पर बैठाकर बाजे-गाजे के साथ भक्तिभाव से ले जाते हुए उनके पीछे चलना चाहिये।।८७।। घर ले आकर सबसे पहले गुरु के दोनों पैरों को धोकर उस जल को बन्धु-बान्धवों के साथ अपने सिर पर छिड़कना चाहिये।।८८।। वहां से हाथ का सहारा देते हुए उन्हें घर के भीतर ले जाय, प्रीतिपूर्वक श्रेष्ठ आसन पर उन्हें बैठावे और विधिपूर्वक सावधानी से शाश्वत गुरुदेव का पूजन करे।।८९।। बुद्धिमान् शिष्य गुरु का पूजन करते समय १०८ अथवा ३६ दीपकों को यथाशक्ति प्रतिदिन प्रज्वलित करे। त्रयोदशी आदि पर्व दिनों में भव्य मण्डप

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गुरोः समर्चासमये दीपानष्टोत्तरं शतम् ।
षट्त्रिंशद्वा यथाशक्ति ज्वालयेदन्वहं बुधः ॥
त्रयोदश्यादिषु गुरुमर्चयेद् भव्यमण्टपे ॥९०॥
उक्तं यद्गुरुणा पूर्वं शक्यं वाऽशक्यमेव च ।
करोत्येव हि पूतात्मा प्राणैरपि धनैरपि ।
शरीराद्यर्थकं सर्वं गुरुं दद्यात् स शिष्यकः ॥९१॥
माहेश्वरान् सपत्नीकान् पत्न्या सह दृढव्रतः ।
पूजयेद् भोजनाद्यैश्च पञ्च वा दश वा शतम् ॥
अग्रपाकं निवेद्याग्रे भुञ्जीयाद् गुर्वनुज्ञया ॥९२॥
धनरूपैः पादुकाद्यैः पादसंग्रहणादिभिः ।
स्नानाभ्यञ्जननैवेद्यभोजनैश्चापि पूजयेत् ॥९३॥

गुरुप्रसादग्रहणम्

गुरुपूजैव पूजा स्याच्छिवस्य परमात्मनः ।
गुरुशेषं तु तत्सर्वमात्मशुद्धिकरं भवेत् ॥९४॥
तस्माद् गुरुमुखात् कर्म ज्ञानं चापि विशेषतः ।
ज्ञात्वा कर्तव्यमखिलं भोगमोक्षोपलब्धये ॥९५॥
गुरुप्रसादपात्रं यः स हि मोक्षाय कल्पते ।
न मुक्तिमूलमन्यद्धि विहाय गुरुसत्कृपाम् ॥९६॥

में गुरु का पूजन करे॥९०॥ गुरु जो कुछ करने को कहते हैं, वह शक्य हो या अशक्य, पवित्र शिष्य को चाहिये कि अपने प्राण और धन का मोह छोड़कर भी उसे पूरा करे। शिष्य को चाहिये कि वह अपना शरीर, धन आदि सब कुछ गुरु को समर्पित कर दे॥९१॥ दृढनिश्चयी शिष्य को चाहिये कि वह अपनी पत्नी के साथ सपत्नीक पाँच, दस अथवा सौ माहेश्वरों का भोजन आदि से सत्कार करे। प्रथमतः गुरु को निवेदित करने के उपरान्त ही उनकी आज्ञा से स्वयं भी भोजन करे॥९२॥ धन-धान्य, पादुका आदि प्रदान कर, पादसंवाहन कर, स्नान, उबटन आदि लगाकर, नैवेद्य और भोजन आदि के द्वारा गुरु का पूजन करे॥९३॥

गुरु पूजा ही वस्तुतः भगवान् शिव की पूजा है। गुरु जो कुछ प्रसाद छोड़ देते हैं, वही शिष्य की आत्मा की शुद्धि के लिये पर्याप्त माना जाता है॥९४॥ इसीलिये गुरु के मुख से कर्मयोग की और विशेष रूप से ज्ञानयोग की शिक्षा प्राप्त कर भोग और मोक्ष की प्राप्ति के लिये शिष्य को कर्म और ज्ञान का आचरण करना चाहिये॥९५॥ जो शिष्य गुरु की प्रसन्नता को प्राप्त करने की योग्यता अर्जित कर लेता है, वही मोक्ष

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गुरुरूपं सुराचार्य लोकानुग्रहकाङ्क्षया ।
आद्यमावरणं प्रोक्तं किमतः श्रोतुमिच्छसि ॥९७॥

इति श्रीचन्द्रज्ञानागमेऽनन्तरुद्रबृहस्पतिसंवादे शिवशासने क्रियापादे गुरुस्वरूपनिरूपणं नाम द्वितीय: पटल: ॥

का अधिकारी हो सकता है। गुरु की सत्कृपा के सिवाय मुक्ति का दूसरा कोई मार्ग नहीं है॥९६॥ हे सुराचार्य ! इस प्रकार मैंने तुमको गुरुरूप इस प्रथम आवरण का उपदेश लोक पर अनुग्रह करने की इच्छा से दिया है। इसके बाद अब तुम क्या सुनना चाहते हो॥९७॥

इस प्रकार अनन्तरुद्र और बृहस्पति के संवाद के रूप में प्रस्तुत इस चन्द्रज्ञानागम के क्रियापाद का गुरु के स्वरूप का निरूपण करने वाला यह दूसरा पटल समाप्त हुआ॥

❋❋❋

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तृतीय पटलः

बृहस्पतिरुवाच

अनन्तज्ञाननिलय लोकानुग्रहतत्पर ।
अनन्तरुद्र भगवन् धन्यो भवदनुग्रहात् ॥१॥
असीमानं वरगुरोर्भूमानं श्रीमदाननात् ।
श्रावंश्रावं निमग्नोऽस्मि निर्भरानन्दवारिधौ ॥२॥
अथ द्वितीयं शुश्रूषुः शिवलिङ्गं सुपावनम् ।
तस्य रूपं महत्त्वं च वद मे करुणाकर ॥३॥

अनन्तरुद्र उवाच

अहो निबोधयिष्यामि महालिङ्गस्य वैभवम् ।
यज्ज्ञात्वा मुच्यते जन्तुरचिरेण बृहस्पते ॥४॥

२. लिङ्गस्वरूपं महिमा च

पूर्वमेकार्णवे घोरे नष्टे स्थावरजङ्गमे ।
मध्ये समुत्थितं लिङ्गमैश्वरं तैजसं परम् ॥५॥
ज्वालामालावृतं दिव्यमप्रमेयमनामयम् ।
कल्पान्ते तत्र लीयन्ते वर्तन्ते सर्वदेवताः ॥६॥

बृहस्पति प्रश्न करते हैं—

हे अनन्त ज्ञान के खजाने भगवन् अनन्तरुद्र देव! आप सामान्य जन पर भी अनुग्रह करने के लिये सदा तत्पर रहते हैं। आपके अनुग्रह के ही कारण मैं धन्य हूँ कि आपके मुँह से श्रेष्ठ गुरु की असीमित महिमा को सुन-सुन कर गहरे आनन्द-सागर में डूब गया हूँ॥१-२॥ अब मैं सबको पवित्र कर देने वाले दूसरे आवरण शिवलिंग के स्वरूप और उसकी महिमा को सुनना चाहता हूँ। हे करुणामय आप मुझे यह सब कुछ सुनाइये॥३॥

अनन्तरुद्र उत्तर देते हैं—

हे बृहस्पति! मैं तुमको उस महालिंग के वैभव को सुनाऊँगा, जिसको जानकर जीव बिना विलम्ब के मुक्त हो जाता है॥४॥

पूर्व काल में जब कि सर्वत्र एकमात्र समुद्र का जल ही घोर गर्जन कर रहा था, स्थावर और जंगम यह सारा जगत् नष्ट हो चुका था, तब उस समुद्र के बीच में से ईश्वर का परम तेजोमंय लिंग प्रकट हुआ॥५॥ यह लिंग ज्वाला की मालाओं से आवृत था। दिव्य, अप्रमेय और अनामय (सभी प्रकार की व्याधियों से निर्मुक्त) इस लिंग में ही प्रत्येक कल्प की समाप्ति पर सारे देवता लीन होकर रहते हैं॥६॥ इस लिंग के

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हृदये चैव गायत्री सर्वदेवोत्तमोत्तमा ।
लीयन्ते मूर्ध्नि वै वेदाः सषडङ्गपदक्रमाः ॥७॥
जठरे लीयते सर्वं जगत् स्थावरजङ्गमम् ।
पुनरुत्पद्यते यस्मात् तद्ब्रह्म लिङ्गसंज्ञकम् ॥८॥
अव्यक्तं लिङ्गमाख्यातमनन्तमजरं ध्रुवम् ।
गुणत्रयं तदेवेशः सृजत्यवति हन्ति च ॥९॥

शिवलिङ्गं चतुर्विधम्

तदेव शिवलिङ्गं हि तल्लिङ्गं तु चतुर्विधम् ।
परबिन्दुः परो नादश्चापरौ बिन्दुनादकौ ॥
उपर्यधोभागनिष्ठाश्चत्वारोऽपि सुरार्चित ॥१०॥
अधः स्यादपरो बिन्दुस्तदूर्ध्वमपरो ध्वनिः ।
तदूर्ध्वं परबिन्दुः स्यात् परनादस्तदूर्ध्वगः ॥११॥

हृदय में सभी देवताओं में श्रेष्ठ गायत्री का निवास है। [१]छः अंगों और पद, क्रम आदि [२]विकृतियों के साथ सारे वेद कल्पान्त में इसके सिर में लीन हो जाते हैं।।७।। यह स्थावर-जङ्गमात्मक सारा जगत् इस लिंग के उदर में लीन हो जाता है और वहीं से पुनः पैदा भी होता है। इसी लिये इसे परब्रह्म रूपी लिंग कहते हैं।।८।। इस लिंग को ही अव्यक्त भी कहते हैं। यह अनन्त, अजर और अविकार है। यह लिंगस्वरूपी ईश्वर ही त्रिगुणात्मक शरीर धारण कर सृष्टि, पालन और संहरण कार्य का सम्पादन करता है।।९।।

वह परब्रह्म लिंग ही शिवलिंग है। इसके चार भेद होते हैं। उनके नाम पर बिन्दु, पर नाद, अपर बिन्दु और अपर नाद हैं। हे देवताओं का द्वारा पूजित बृहस्पति ! इन चारों की स्थिति ऊपर और नीचे मानी जाती है।।१०।। सब से नीचे अपर बिन्दु स्थित है। उसके ऊपर अपर नाद, उसके ऊपर पर बिन्दु और सबके ऊपर पर नाद की स्थिति मानी गई है।।११।। प्रणव अर्थात् ॐकार वेदि है और इसमें यह नादात्मक लिंग स्थित

---

१. शिक्षा, कल्प (श्रौत, गृह्य और धर्म सूत्र), व्याकरण, निरुक्त (निघण्टु सहित), ज्यौतिष, (सिद्धान्त, गणित और फलित) और छन्द-ये वेद के छः अंग हैं।

२. ''जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः। अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः।।'' इस श्लोक में वेद की आठ विकृतियां वर्णित हैं। वेदों के प्रत्येक पद को और उनके क्रम को सुरक्षित रखने के लिये वेदपाठ की ये विभिन्न पद्धतियां है। इनके ज्ञाता वेदपाठी के लिये घनान्तपाठी शब्द आज भी प्रचलित है। इन विकृतियों का सोदाहरण परिचय सातवलेकर के ऋग्वेद के संस्करण (पृ. ७९२-८०८) से प्राप्त किया जा सकता है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रणवो वेदिरस्यायं नादो लिङ्गाकृतिर्मुखे ।
बिन्दुनादमये लिङ्गे नित्यं सन्निहितः शिवः ॥१२॥

बिन्दुनादात्मकं जगत्

बिन्दुनादात्मकं सर्वं जगत् स्थावरजङ्गमम् ।
बिन्दुः शक्तिः शिवो नादः शिवशक्त्यात्मकं जगत् ॥१३॥
नादाधारमयं बिन्दुर्बिन्द्वाधारमिदं जगत् ।
जगदाधारभूतौ हि बिन्दुनादौ व्यवस्थितौ ॥१४॥
बिन्दुनादयुतं सर्वं सकलीकरणं भवेत् ।
सकलीकरणाज्जन्म जगत् प्राप्नोत्यसंशयम् ॥१५॥

बिन्दुनादात्मकं लिङ्गं जगत्कारणम्

बिन्दुनादात्मकं लिङ्गं जगत्कारणमुच्यते ।
तस्माज्जन्मनिवृत्त्यर्थं शिवलिङ्गं प्रपूजयेत् ॥१६॥
माता देवी बिन्दुरूपा नादरूपः शिवः पिता ।
पितृभ्यां दत्तमैश्वर्यं यथा भोगाय कल्प्यते ॥
तयोरैश्वर्यलाभार्थं शिवलिङ्गं प्रपूजयेत् ॥१७॥

है। हे बृहस्पति! इस बिन्दुनादमय लिंग में भगवान् शिव सदा विराजमान रहते हैं॥१२॥

यह सारा स्थावर-जंगमात्मक जगत् बिन्दुनादात्मक है। इनमें बिन्दु शक्ति है और शिव नाद है। इस तरह से यह जगत् शिवशक्त्यात्मक ही तो है॥१३॥ यहां बिन्दु नाद पर आधारित है और जगत् बिन्दु पर आधारित है। इस प्रकार बिन्दु और नाद ये दोनों इस जगत् के आधारभूत हैं॥१४॥ बिन्दु और नाद की सहायता से ही सकलीकरण सम्पन्न होता है और [3]सकलीकरण की प्रक्रिया से ही सारे जगत् की उत्पत्ति होती है, इसमें कोई सन्देह नहीं रहना चाहिये॥१५॥

बिन्दुनादात्मक यह लिंग ही सारे जगत् का कारण है, अतः इस जन्मपरम्परा से जो मुक्ति चाहता है, उसे शिवलिंग की पूजा करनी चाहिये॥१६॥ बिन्दुरूपा देवी पार्वती माता और नादस्वरूपी शिव पिता हैं। मातापिता के द्वारा दिया गया ऐश्वर्य जैसे इस लोक में भोग का सम्पादक है, वैसे ही शिव और शक्ति के ऐश्वर्य की प्राप्ति के

---

३. सकलीकरण की प्रक्रिया का विशद स्वरूप सोमशम्भुपद्धति (कर्मकाण्डक्रमावली) के पाण्डिचेरी संस्करण के प्रथम भाग के प्रथम परिशिष्ट में देखिये। विभिन्न मन्त्रों के द्वारा साधक का अपने देह को विद्यामय बना देता ही सकलीकरण विधि का मुख्य उद्देश्य है। "हृदयादिकरान्तेषु कनिष्ठाद्यङ्गुलीषु च। हृदादिमन्त्रविन्यासः सकलीकरणं मतम्॥" (सोमशम्भुपद्धति, श्लो. १४५)।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मातापितृरूपं शिवलिङ्गम्

सा देवी जगतां माता स शिवो जगतः पिता ।
पित्रोः शुश्रूषुके नित्यं कृपाधिक्यं हि वर्धते ॥
कृपयाऽन्तर्गतैश्वर्यं पूजकस्य ददाति हि ॥१८॥
तस्मादन्तर्गतानन्दलाभार्थं मुनिपुङ्गव ।
पितृमातृस्वरूपं हि शिवलिङ्गं प्रपूजयेत् ॥१९॥

महालिङ्गस्वरूपम्

निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् ।
प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम् ॥
वचसामात्मसंवेद्यं तन्महालिङ्गमुच्यते ॥२०॥
ऋतं सत्यं परं ब्रह्म सच्चिदानन्दलक्षणम् ।
अनन्यपरमं ब्रह्म तदतो ध्येयमास्तिकैः ॥२१॥
ततः सर्वं परित्यज्य महालिङ्गैकतत्परः ।
निर्ममो निरहङ्कारस्तद्ध्याननिरतो भवेत् ॥२२॥

लिये शिवलिंग की आराधना करे॥१७॥

वह देवी सारे जगत् की माता और भगवान् शिव जगत् के पिता हैं। इस लोक में माता-पिता की सेवा करने से जैसे उनकी कृपा में नित्य वृद्धि होती है, उसी परिपाटी से ये भी अपनी पूजा करने वाले को कृपापूर्वक सर्वविध ऐश्वर्य प्रदान करते हैं॥१८॥ इसलिये हे मुनिपुंगव! आन्तर आनन्द की प्राप्ति के लिये माता-पिता स्वरूप शिवलिंग की पूजा करनी चाहिये॥१९॥

जो निष्क्रिय, शान्त, अनिन्द्य, निरंजन स्वरूप है ; जहां सारे भेद समाप्त हो जाते हैं, जिनकी प्रतीति केवल सत्ता के रूप में ही होती है, जो अगोचर है, जो वाणी का विषय न होकर आत्मसंवेद्य है, उसे ही महालिंग कहते हैं॥२०॥ यह परब्रह्म ऋत और सत्य है, सत्, चित् और आनन्द स्वरूप हैं। इस ब्रह्म से बढ कर कोई नहीं है, अतः आस्तिक मनुष्य को सदा उसका ही ध्यान करना चाहिये॥२१॥ इसलिये सब कुछ छोड़ कर साधक को इस महालिंग की ही उपासना करनी चाहिये, ममता और अहंकार से मुक्त होकर सदा उसके ध्यान में ही लगे रहना चाहिये॥२२॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

महालिङ्गस्य त्रैविध्यम्

महालिङ्गं त्रिधा जातं सुजनानुजिघृक्षया ।
प्रथमं भावलिङ्गं तु द्वितीयं प्राणलिङ्गकम् ॥
तृतीयमिष्टलिङ्गं स्यादित्येवं त्रिविधं मतम् ॥२३॥
निष्कलं भावलिङ्गं स्याद् भावग्राह्यं परात्परम् ।
प्राणलिङ्गं मनोग्राह्यं भवेत् सकलनिष्कलम् ॥२४॥
सकलं दृक्कलाग्राह्यमिष्टलिङ्गं प्रकीर्तितम् ।
इष्टसिद्धिकरं सम्यगनिष्टपरिहारकम् ॥२५॥

षड्विधलिङ्गनिरूपणम्

भावादिलिङ्गत्रितयं द्विविधं द्विविधं भवेत् ।
भावलिङ्गं महालिङ्गप्रसादाभिख्यकं द्वयम् ॥२६॥
प्राणलिङ्गं तथा चरशिवलिङ्गद्वयं भवेत् ।
इष्टं तु गुरुलिङ्गाख्यमाचाराख्यं द्वयं भवेत् ॥२७॥
आचारलिङ्गमाख्यातं सद्योजातमुखात्मकम् ।
गुरुलिङ्गं तथा वामदेववक्त्रात्मकं भवेत् ॥२८॥
शिवलिङ्गं तथाऽघोरमुखरूपं भवेत् पुनः ।
चरलिङ्गं भवत्येव तत्पूरुषमुखात्मकम् ॥२९॥

सज्जनों पर अनुग्रह करने की दृष्टि से यह महालिंग तीन स्वरूप धारण करता है। इनमें पहला भावलिंग, दूसरा प्राणलिंग और तीसरा इष्टलिंग कहलाता है। इस प्रकार यह महालिंग तीन प्रकार का माना गया है॥२३॥ इनमें भावलिंग निष्कल है। इस परात्पर लिंग का केवल भावना से ही साक्षात्कार हो सकता है। प्राणलिंग सकल-निष्कलात्मक है। यह मनोमात्रग्राह्य है॥२४॥ इष्टलिंग सकल स्वरूप है। दृक् शक्ति की कलाओं से, अर्थात् ज्ञानेन्द्रियों से इसका ग्रहण संभव है। यह इष्टलिंग इष्ट की सिद्धि और अनिष्ट के परिहार में समर्थ है॥२५॥

ऊपर जिन भाव आदि तीन लिंगों की चर्चा आई है, इन सभी के दो-दो भेद होते हैं। भावलिंग महालिंग और प्रसादलिंग के नाम से द्विविध है॥२६॥ प्राणलिंग के चरलिंग और शिवलिंग नाम के दो भेद तथा इष्टलिंग के गुरुलिंग और आचारलिंग नामक दो भेद होते हैं॥२७॥ इनमें आचारलिंग सद्योजात मुख से अभिन्न है और गुरुलिंग वामदेव मुख स्वरूप है॥२८॥ शिवलिंग अघोरमुख स्वरूप होता है और चरलिंग तत्पुरुष मुख से अभिन्न माना जाता है॥२९॥ प्रसादलिंग ईशान मुख से अभिन्न है और महालिङ्ग तो स्वयं अखण्ड स्वरूप साक्षात् शिव ही है॥३०॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रसादलिङ्गं कथितमीशानमुखसंज्ञकम् ।
महालिङ्गं तथाऽखण्डशिवरूपं प्रकीर्तितम् ॥३०॥

इष्टलिङ्गे शिवः पूजनीयः

लिङ्गे संपूजनाद् ध्यानाच्छम्भुः सम्यक्प्रसीदति ।
ध्यायते पूज्यते चैव लिङ्गे सन्निहितः शिवः ॥३१॥
इष्टलिङ्गे ततो नित्यं पूजनीयः परः शिवः ।
ध्येयश्च सततं विद्वन् लिङ्गरूपोऽम्बिकापतिः ॥३२॥

आधारादिषु प्राणलिङ्गध्यानम्

[४]आधारे कनकप्रख्यं हृदये विद्रुमप्रभम् ।
भ्रूमध्ये दीपसंकाशं प्राणलिङ्गं प्रकीर्तितम् ॥३३॥
ज्योतिर्लिङ्गमिदं विद्वन् ध्यानस्थानं महेशितुः ।
ज्योतिर्लिङ्गं विभाव्यैव तत्र ध्येयः परः शिवः ॥३४॥
प्राणेष्वन्तर्मनःस्थानं हृदयाब्जगतं शिवम् ।
लिङ्गं यत् तदिह ग्राह्यं प्राणलिङ्गसमाह्वयम् ॥३५॥
ज्योतीरूपं तदेव स्यात् स्थानं मुख्यं महेशितुः ।
तत्र निध्यायमानं तु शम्भुर्मोचयतेऽचिरात् ॥३६॥

इन षड्विध लिंगों में उसकी पूजा और ध्यान करने से भगवान् शिव प्रसन्न होते हैं। लिंग में संनिहित होने के कारण ही भगवान् शिव का ध्यान और पूजन संभव हो पाता है॥३१॥ इसलिये भगवान् परशिव की इष्टलिंग में सदा पूजा करनी चाहिये और लिंगस्वरूप धारी भगवान् शिव का ही हे विद्वन्! सदा ध्यान करना चाहिये॥३२॥

प्राणलिंग का स्वरूप मूलाधार स्थान में सुवर्ण के समान, हृदय में विद्रुम मणि के समान और भ्रूमध्य में दीपशिखा के समान माना गया है। इसका अभिप्राय यह है कि प्राणलिंग की इसी प्रकार भावना की जाती है॥३३॥ हे विद्वन्! इस ज्योतिर्लिंग में ही भगवान् महेश्वर का ध्यान किया जाता है। इस ज्योतिर्लिंग में भावना के स्थिर होने पर ही परशिव में भी ध्यान लग सकता है॥३४॥ हृदयस्थित कमल के भीतर कल्याणकारी प्राणों का और उसके भी भीतर मन का स्थान है। प्राणलिंग नामक लिंग के इसी स्वरूप की यहां मानसिक आराधना की जाती है॥३५॥ भगवान् महेश्वर का ज्योर्तिमय यह धाम ही मुख्य स्थान माना गया है। यहां विशेष रूप से ध्यायमान भगवान् शिव ध्याता को बिना किसी विलम्ब के मुक्त कर देते हैं॥३६॥

---

४. यह श्लोक सिद्धान्तशिखामणि (६.४०) में भी पाठभेद के साथ उपलब्ध है ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भावलिङ्गलक्षणम्

सच्चित्सुखमयं शान्तमादिमध्यान्तवर्जितम् ।
निष्कलं शाम्भवं यत्तदरूपं रूपमुच्यते ॥
तद्भावनास्पदं विद्वन् भावलिङ्गं प्रकीर्तितम् ॥३७॥
भावग्राह्यं मनोऽतीतं भावाभावपरं शिवम् ।
कलासर्गकरं सत्यं भावलिङ्गं प्रकीर्तितम् ॥३८॥
प्रत्याहृतेन्द्रियग्रामैरमनस्कपदास्पदैः ।
पदे तुरीयातीताख्ये भावनीयं तु योगिभिः ॥३९॥
विस्मृतेतरभावानुभाविताखण्डतत्त्वकैः ।
योगिभिर्भाव्यते नित्यं भावलिङ्गं महात्मभिः ॥४०॥
भावलिङ्गानुभावात्तपरानन्दामृताब्धयः ।
निस्पृहा निर्भयाः शान्ता जीवन्मुक्ता न संशयः ॥४१॥

सत्, चित्, सुखमय, शान्त; आदि, मध्य और अन्त से वर्जित निष्कल—इस प्रकार यह जो भगवान् शिव का आकाररहित स्वरूप कहा गया है, उसे ही हे बृहस्पति! भावलिंग कहा जाता है, जो कि केवल भावना से ही गृहीत हो सकता है॥३७॥ मन से अतीत यह स्वरूप भाव और अभाव से परे है। यह मंगलमय स्वरूप भावनामात्र से जाना जा सकता है। [५]कलाओं की सृष्टि का यही वास्तविक कारण है। इसीलिये इसे भावलिंग कहा जाता है॥३८॥ योगी जन अपने सारे इन्द्रियसमूह को अन्तर्मुख बना कर, [६]अमनस्क स्थिति में रह कर, तुरीयातीत पद में स्थित होकर इसकी भावना करते हैं॥३९॥ अन्य समस्त सांसारिक भावों को भुला कर एकमात्र अखण्ड शिवतत्त्व की भावना में निरत महात्मा योगी जन ही इस भावलिंग का नित्य साक्षात्कार कर सकतें हैं॥४०॥ भावलिंग की भावना करते करते जिनको परमानन्दरूपी

५. निवृत्ति, प्रतिष्ठा, विद्या, शान्ति और शान्त्यतीता नामक पांच कलाओं का तो निरूपण प्रायः सभी शैवागम ग्रन्थों में मिलता है। इनके अतिरिक्त शिव के सद्योजात आदि पांच मन्त्रों में स्थित ३८ कलाओं का वर्णन नेत्रतन्त्र (२२.२६-३४) आदि में देखा जा सकता है। लिङ्गधारणचन्द्रिका में भी कलाशुद्धि प्रकरण में इनका उल्लेख है।

६. तन्त्रशास्त्र के ग्रन्थों में अमनस्क योग का विशद विवेचन मिलता है। इसी नाम का एक ग्रन्थ भी उपलब्ध है। इसकी भूमिका में श्रद्धेय श्री श्री गोपीनाथ कविराज महोदय ने इस योग का विशद स्वरूप प्रदर्शित किया है। शैव शास्त्रों में ॐ को वैदिक प्रणव, ह्रीं को शाक्त प्रणव और हूँ को शैव प्रणव कहा गया है। इनमें अ उ म् आदि तीन स्थूल अक्षरों के अतिरिक्त बिन्दु, अर्धचन्द्र, रोधिनी, नाद, नादान्त, शक्ति, समना और उन्मना नामक सूक्ष्म नाद की विभिन्न अवस्थाएं विद्यमान हैं। इनके स्वरूप, कालमान आदि का ज्ञान योगिनीहृदय, वरिवस्यारहस्य जैसे ग्रन्थों से ज्ञात हो सकता है। यहाँ बताई गई अन्तिम स्थिति उन्मना को ही हम अमनस्क स्थिति मान सकते हैं।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लिङ्गत्रयाराधनम्

ज्योतीरूपं प्राणलिङ्गं हृदयाब्जे प्रतिष्ठितम् ।
हृदये वा भ्रुवोर्मध्ये तुरीये ध्येयमास्तिकैः ॥४२॥
ध्यानस्य शम्भोः पूजायाः स्थानमिष्टं भवेद्बहिः ।
जाग्रद्दशायां संसेव्यं भोगमोक्षफलार्थिभिः ॥४३॥
तथैवान्तरगं स्थानं प्राणलिङ्गं प्रकीर्तितम् ।
सेव्यमेतत् तुरीये स्याद् भवबन्धमुमुक्षुभिः ॥४४॥
इष्टं स्थूलतनोः प्रोक्तं प्राणं सूक्ष्मतनोः स्मृतम् ।
भावाख्यं कारणस्यैवं तनुत्रयगतं त्रयम् ॥४५॥

मलत्रयक्षपणी दीक्षा

आणवं मायिकं चैव कार्मिकं च यथाक्रमम् ।
मलत्रयमनादीदं तनुत्रयगतं भवेत् ॥४६॥
तनुत्रयगतानादिमलत्रयमिदं गुरुः ।
दीक्षात्रयेण निर्दग्ध्वा लिङ्गत्रयमुपादिशेत् ॥४७॥

अमृतसागर की प्राप्ति हो गई है, ऐसे निस्पृह, निर्भय और शान्तस्वभाव के योगी जीवन्मुक्त हो जाते हैं, इसमें किसी प्रकार का संशय नहीं है॥४१॥

ऊपर वर्णित ज्योतिःस्वरूप प्राणलिंग हृदयस्थित कमल में प्रतिष्ठित है। आस्तिक जनों को इस प्राणलिंग का हृदय अथवा भ्रूमध्य में तुरीयावस्था में ध्यान करना चाहिये॥४२॥ स्थूल ध्यान का और शिव की बाह्य पूजा का आधार इष्टलिंग ही हो सकता है। अतः भोग और मोक्ष को चाहने वालों को जाग्रदवस्था में इष्टलिंग की ही आराधना करनी चाहिये॥४३॥ इसी तरह से आन्तर पूजा का स्थान प्राणलिंग है। सांसारिक बन्धनों से मुक्ति चाहने वालों को इसकी तुरीयावस्था में उपासना करनी चाहिये॥४४॥ इष्टलिंग का स्थूल शरीर से, प्राणलिंग का सूक्ष्म शरीर से और भावलिंग का संबन्ध कारण शरीर से माना गया है। इस प्रकार यह लिंग तीनों शरीरों से संबद्ध है॥४५॥

आणव, मायिक और कार्मिक — ये तीन मल अनादि काल से चले आ रहे हैं। ये तीनों मल यथाक्रम कारण, सूक्ष्म और स्थूल शरीरों से संबद्ध हैं॥४६॥ उक्त तीनों शरीरों से संबद्ध इन तीनों अनादि मलों को त्रिविध दीक्षा से भस्म कर देने के उपरान्त गुरु उक्त त्रिविध लिंगों के स्वरूप का उपदेश करते हैं॥४७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लिङ्गत्रयाराधनमहिमा

पूजयन्निष्टलिङ्गं तु निध्यायन् प्राणलिङ्गकम् ।
भावयन् भावलिङ्गं वै मृत्युपाशांश्छिनत्ति सः ॥४८॥
सर्वदेवमयं लिङ्गं तस्मिन् साक्षाच्छिवः स्वयम् ।
अनुग्रहाय वसति तस्माल्लिङ्गं प्रपूजयेत् ॥४९॥
पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च ।
लीयन्ते लिङ्गमूले तु तस्माल्लिङ्गं प्रपूजयेत् ॥५०॥
आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका ।
आलयः सर्वभूतानां लयनाल्लिङ्गमुच्यते ॥५१॥
यस्तु पूजयते नित्यं लिङ्गं त्रिभुवनेश्वरम् ।
स सर्वमोक्षराज्यस्य क्षिप्रं भवति भाजनम् ॥५२॥
सर्वे लिङ्गमया लोकाः सर्वं लिङ्गे प्रतिष्ठितम् ।
तस्मात् संपूजयेल्लिङ्गं यदीच्छेत् सिद्धिमात्मनः ॥५३॥
शिवलिङ्गस्वरूपम् च महिमानं च शाश्वतम् ।
न्यबोधयं देवगुरो किमतः श्रोतुमिच्छसि ॥५४॥

इति श्रीचन्द्रज्ञानागमे उत्तरभागे अनन्तरुद्रबृहस्पति–
संवादे शिवशासने क्रियापादे लिङ्गस्वरूप–
निरूपणं नाम तृतीयः पटलः ॥३॥

गुरु से दीक्षा और लिंगत्रय का उपदेश प्राप्त कर लेने के उपरान्त इष्टलिंग की पूजा, प्राणलिंग का ध्यान और भावलिंग की भावना करने वाला शिवभक्त मृत्यु के पाशों को काट डालता है।॥४८॥ यह लिंग सर्वदेवमय है। इसमें साक्षात् शिव स्वयं निवास करते हैं और भक्तों पर अनुग्रह करते रहते हैं। इसलिये लिंग का पूजन अवश्य करना चाहिये।॥४९॥ इस पृथिवी पर जितने भी तीर्थ हैं और पवित्र स्थान हैं, वे सब इस लिंग में ही निवास करते हैं, अतः लिंग की पूजा अवश्य करनी चाहिये।॥५०॥ आकाश को लिंग कहा जाता है और पृथिवी उसकी पीठिका है। ये ही सारे प्राणियों के आश्रय–स्थल हैं। सबको अपने में विलीन करके रखने से ही इसको लिंग कहा जाता है।॥५१॥ जो व्यक्ति तीनों भुवनों के स्वामी इस लिंग की नित्य पूजा करता है, वह सारे मोक्ष राज्य की प्राप्ति की योग्यता शीघ्र ही प्राप्त कर लेता है।॥५२॥ सारे लोक

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लिंगमय हैं। यह सारा जगत् लिंग में ही प्रतिष्ठित है। इसलिये यदि व्यक्ति अपना उद्धार चाहता है, तो उसे नित्य लिंग की पूजा करनी चाहिये।।५३।। हे देवगुरु! इस तरह से मैंने तुम्हें शिवलिंग के स्वरूप को और उसकी शाश्वत महिमा को समझा कर बताया है। अब इसके आगे तुम क्या सुनना चाहते हो।।५४।।

इस प्रकार अनन्तरुद्र और बृहस्पति के संवाद के रूप
में प्रस्तुत इस चन्द्रज्ञानागम के क्रियापाद का लिंग
के स्वरूप का निरूपण करने वाला यह
तीसरा पटल समाप्त हुआ ।।३।।

***

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चतुर्थः पटलः

बृहस्पतिरुवाच

करुणाकर सर्वज्ञ भक्तानुग्रहतत्पर ।
सर्वागमामृतनिधेऽनन्तरुद्र नमोऽस्तु ते ॥१॥
धन्योऽस्मि शिवलिङ्गस्य वैभवाकर्णनादहम् ।
लक्षणं जङ्गमस्यापि माहात्म्यं ब्रूह्यनुग्रहात् ॥२॥

अनन्तरुद्र उवाच

अहो निबोधयाम्यद्य शृणु जङ्गमवैभवम् ।
निगूढमागमान्तेषु[1] यज्ज्ञात्वाऽमृतमश्नुते ॥३॥

३. जङ्गमलक्षणं महिमा च

जङ्गमं स्थावरं चेति शम्भो रूपद्वयं स्मृतम् ।
स्थावरं च सयंव्यक्तं प्रतिष्ठितमिति द्विधा ॥४॥
स्वयंव्यक्तं तत्र भवेत् काशीविश्वेश्वरादिकम् ।
प्रतिष्ठितं कर्षणाद्यैः संस्कृतं मानुषैर्भवेत् ॥५॥

बृहस्पति प्रश्न करते हैं—

हे करुणा के सागर, सब कुछ जानने वाले, भक्तों के ऊपर अनुग्रह करने में सदा लगे रहने वाले, सभी आगमों के अमृत सागर अनन्तरुद्र देव! मैं आपको प्रणाम करता हूँ॥१॥ मैं शिवलिंग के अनन्त वैभव को सुन कर धन्य हो गया हूँ। अब मेरे ऊपर अनुग्रह कर आप मुझे जंगम का लक्षण और उसकी महिमा सुनाइये॥२॥

अनन्तरुद्र उत्तर देते हैं-

हे बृहस्पति! मैं तुम्हें जंगम के वैभव को सुनाता हूँ। इसका स्वरूप आगमों के [1]उत्तर भाग में छिपा हुआ है। जो इसको जान लेता है, वह अमृत (मोक्ष) पदवी को जाता है॥३॥

जंगम और स्थावर ये दो भगवान् शिव के रूप हैं। इनमें से स्थावर के भी दो भेद हैं — स्वयंव्यक्त और प्रतिष्ठित॥४॥ काशी विश्वेश्वर आदि का स्वरूप स्वयंव्यक्त

---

१. वेदान्त पद से जैसे वेदों के अन्तिम भाग में स्थित उपनिषदों का ग्रहण किया जाता है, उसीतरह से यहां आगमान्त पद से आगमों के उत्तर भाग का ग्रहण किया जाता है। सिद्धान्तशिखामणि (५।१४) में स्पष्ट रूप से बताया गया है कि सिद्धान्त शास्त्र के नाम प्रसिद्ध कामिकादि वातुलान्त २८ शैवागमों के उत्तर भाग में वीर शैवमत प्रतिपादित हैं।प्रस्तुत स्थल में इन्हीं आगमों का आगमान्त पद से उल्लेख हुआ है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

द्विविधो जङ्गमः

जङ्गमं द्विविधं प्रोक्तं मान्त्रिकं सहजं त्विति ।
मान्त्रिकं मन्त्रसामर्थ्यादावाहितमुदीरितम् ॥
ध्रियमाणं महाशैवैश्वरलिङ्गादिकं मुने ॥६॥
सहजं जङ्गमं माहेश्वर इत्यभिधीयते ।
माहेश्वरश्चरो भक्तः शैवो जङ्गम इत्यपि ॥
सहजस्याभिधानानि भवन्तीश्वरशासनात् ॥७॥

त्रिविधः सहजजङ्गमः

ब्रह्मचारी गृही चैव निराभारीति ते त्रयः ।
यथोत्तरं विशिष्यन्ते पूजनीया यथाविधि ॥८॥

भक्तिचिह्नानि

वक्ष्यामि भक्तिचिह्नानि प्रीती रुद्राक्षधारणे ।
भस्मत्रिपुण्ड्रे विश्वासः श्रद्धा पञ्चाक्षरे शुभे ॥९॥

है और आचार्य के द्वारा भूमिकर्षण से लेकर प्रतिष्ठा पर्यन्त [२]क्रियाकलाप द्वारा संपादित स्वरूप प्रतिष्ठित कहलाता है।।५।।

जंगम भी दो प्रकार का शास्त्रों में वर्णित है। इनके नाम मान्त्रिक और सहज हैं। मन्त्र की सामर्थ्य से आवाहित शिवस्वरूप वाला यह जंगम लिंग मान्त्रिक कहलाता है। इसी को चरलिंग भी कहते हैं। महाशैव (वीरशैव) इसे इष्टलिंग के रूप में धारण करते हैं।।६।। सहज नाम का जंगम माहेश्वर कहलाता है। माहेश्वर, चर, भक्त, शैव, जंगम ये सब ईश्वर के उपदेश के अनुसार सहज जंगम के विभिन्न नाम हैं।।७।।

इस सहज जंगम की तीन स्थितियां हैं — ब्रह्मचारी, गृही और निराभारी। इनमें एक से दूसरा श्रेष्ठ है, अर्थात् ब्रह्मचारी से गृही और गृही से निराभारी श्रेष्ठ है। इनकी विधिपूर्वक पूजा करनी चाहिये।।८।।

अब मैं तुम्हें शिव के प्रति [३]भक्ति की उत्पत्ति के लक्षण बताता हूँ। ऐसे शिवभक्त

---

२. आगमों के क्रियापाद में भूमिकर्षण से लेकर मूर्तिप्रतिष्ठा पर्यन्त कार्यकलाप का वर्णन मिलता है। क्रियापाद में इस पूरे विधिविधान का यहां स्मरण किया गया है। शिष्य दीक्षा से लेकर प्रासाद और मूर्तिनिर्माण आदि सभी संबद्ध विषयों का आगमों के क्रियापाद में विशद वर्णन मिलता है।

३. शैव शास्त्रों में शक्तिपात अर्थात् ईश्वर के अनुग्रह के सूचक चिह्नों के रूप में इस प्रकार के विवरण मिलते हैं। शक्तिपात और उसके चिह्नों का स्वरूप लुप्तागमसंग्रह, द्वितीय भाग के उपोद्घात (पृ. १५५-१५७) में देखा जा सकता है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आसक्तिः शिवशुद्धे चात्यादरो लिङ्गधारणे ।
चरान्तरे परा प्रीतिः शिवकार्ये मनोजयः ॥१०॥
शैवशास्त्रे परा श्रद्धा तदध्यापनमन्वहम् ।
स्वयमध्ययनं चापि चरलक्ष्माणि निश्चिनु ॥११॥

चर(जङ्गम)दशचिह्नानि

तेषां बाह्यानि चिह्नानि दश सन्ति बृहस्पते ।
प्रथमं भस्मरुद्राक्षलिङ्गधारणमीरितम् ॥
द्वितीयं गुरुसेवा च शिवस्तोत्रं तृतीयकम् ॥१२॥
नामोच्चारणमीशस्य चतुर्थं परिकीर्तितम् ।
पञ्चमं देवदेवस्य पूजनं समुदीरितम् ॥१३॥
षष्ठं शिवागमार्थानुसन्धानमिति चोदितम् ।
तथा शिवपुराणानां श्रवणं सप्तमं विदुः ॥१४॥
नमस्कारश्चराणां च परिकीर्तितमष्टमम् ।
नवमं शिवभक्तानां गृहभोजनमीरितम् ॥१५॥
दानं च दशमं ज्ञेयं जङ्गमे च गुरावपि ।
एवं बाह्यानि चिह्नानि कथितानि दशैव तु ॥१६॥

की रुद्राक्ष धारण में रुचि, भस्म और त्रिपुण्ड्र धारण करने में विश्वास तथा शुभ पंचाक्षर मन्त्र में श्रद्धा जाग उठती है॥९॥ उसकी शिव शब्द पर अत्यन्त आसक्ति, लिंग धारण में अति आदर तथा अन्य जंगमों के प्रति परम प्रीति जाग उठती है और वह शिव के कार्य के लिये मन पर विजय प्राप्त कर लेता है, अर्थात् सब तरफ से ध्यान हटा कर एकाग्र मन से शिव की आराधना में लग जाता है॥१०॥ शैवशास्त्र में उसकी परम श्रद्धा जाग उठती है। वह प्रतिदिन इन शास्त्रों के अध्ययन और अध्यापन में लगा रहता है। शिवभक्तिसम्पन्न जंगम में ये ही सब लक्षण प्रकट हो उठते हैं॥११॥

हे बृहस्पति! जंगमों के बाह्य दस चिह्न होते हैं। इनमें पहला चिह्न भस्म, रुद्राक्ष और लिंग को धारण करना है। दूसरा चिह्न गुरुसेवा और तीसरा शिव के स्तोत्रों का पाठ करना है॥१२॥ चौथा चिह्न ईश्वर के नामों को उच्चारण करना और पाँचवां चिह्न देवताओं के देवता शिव का पूजन करना है॥१३॥ छठा चिह्न शिवागमों के अर्थ का अनुसन्धान करना कहा गया है और सातवां चिह्न शिवपुराणों का श्रवण करना है॥१४॥ जंगमों के प्रति नमस्कार करना आठवां और नवां चिह्न अपने घर में शिवभक्तों को भोजन कराना है॥१५॥ जंगम और गुरु को अभीष्ट दान करना दसवां बाह्य चिह्न है। इस तरह से ये दस बाह्य चिह्न कहे गये हैं॥१६॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आन्तराणि त्रीणि चिह्नानि

त्रीण्यान्तराणि चिह्नानि कथितानि महात्मनाम् ।
शृणु तानि यथा विद्वन् मानसः प्रथमो जपः ॥१७॥
पूजा च मानसी ज्ञेया द्वितीया परमेशितुः ।
साक्षात्कारस्तृतीयस्तु स्वान्तरे परमेशितुः ॥१८॥
आन्तराण्यपि बाह्यानि येषां सन्ति यदा पुनः ।
तदाऽपराणि चिह्नानि दश तेषां भवन्ति हि ॥१९॥

अपराणि दश चिह्नानि

कण्ठे विकारः प्रथमं गद्गदाख्यं द्वितीयकम् ।
जिह्वास्पन्दस्तृतीयं तु स्फुरणं त्वोष्ठयोरपि ॥२०॥
कम्पनं च शरीरस्य चतुर्थं भक्तिलक्षणम् ।
रोमाञ्चः पञ्चमं षष्ठं स्वेदश्च कीर्तितम् ॥२१॥
स्खलनं सप्तमं ज्ञेयमष्टमं बाष्पनिर्गमः ।
रोदनं नवमं चिह्नं दशमं पारवश्यकम् ॥
एतानि दशचिह्नानि भक्तेरुक्तानि शूलिना ॥२२॥
उक्तान्येतानि चिह्नानि येषां सन्ति महात्मनाम् ।
ते भक्ताः शाङ्करा ज्ञेयाः सर्वलोकैकपावनाः ॥२३॥

महात्माओं के तीन आन्तर चिह्न भी शास्त्रों में बताये गये हैं। हे विद्वन्! तुम उनको सुनो। उनमें से पहला चिह्न है मानस जप॥१७॥ परमेश्वर की मानस पूजा दूसरा चिह्न है और अपने हृदय में परमेश्वर का साक्षात्कार करना तीसरा चिह्न है॥१८॥ जिन महात्माओं में ये बाह्य और आन्तर दोनों प्रकार के चिह्न विद्यमान रहते हैं, तब उनमें अन्य दस प्रकार के चिह्न भी प्रकट हो जाते हैं॥१९॥

इनमें पहला चिह्न है कण्ठ का विकार (खरास)। दूसरा चिह्न वाणी का गद्गद हो जाना है। तीसरी स्थिति में जिह्वा और ओष्ठों का परिस्पन्दन होने लगता है॥२०॥ भक्ति की परिपक्वता का चौथा चिह्न शरीर का कम्पन और पाँचवां चिह्न रोमांच है। छठी स्थिति में पसीना छूटने लगता है॥२१॥ सप्तम स्थिति में व्यक्ति अधीर हो उठता है और आठवीं में आंसू आने लगते हैं। नवीं स्थिति में भक्त रोने लगता है और दसवीं स्थिति में वह एक दम परवश हो जाता है। भगवान् त्रिशूलधारी शिव ने भक्ति के ये दस चिह्न कहे हैं॥२२॥ ऊपर बताये गये ये सब चिह्न जिन महात्माओं में प्रकट हो उठते हैं, ऐसे भगवान् शंकर के ये भक्त सभी लोकों को पवित्र बना देने में समर्थ होते हैं॥२३॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भक्तमहिमा

अपारो भक्तमहिमा तद्वक्तुं केन शक्यते ।
स्वभक्तान् देवदेवोऽपि यत् स्वस्मान्मनुतेऽधिकान् ॥२४॥
अगस्त्यः कुम्भजन्मा तु शिवभक्त्यैव केवलम् ।
पपौ समुद्रमतुलं शिवभक्त्युपबृंहितः ॥२५॥
अणुर्महत्त्वं संयाति महच्चाणुत्वमाव्रजेत् ।
स्थलं जलधितां याति जलधिः स्थलतां व्रजेत् ॥२६॥
संकल्पमात्रतो येषां शिवानुभवशालिनाम् ।
महिमा वाङ्मनोदूरस्तेषां कैर्वक्ष्यते कथम् ॥२७॥
तस्मात् सर्वोत्तमा भक्ताः शिवेनैवोदितं पुरा ।
यद्यदिच्छन्ति मे भक्तास्त्रैलोक्येऽपि च दुर्लभम् ॥
तत् सद्यः साधयिष्यामि व्रतमेतत् सदा मम ॥२८॥

चर(जङ्गम)महिमा

ऐहिकामुष्मिका भोगा मोक्षस्तत्संगतो भवेत् ।
चरसंगस्तु सर्वेषां सर्वकामफलप्रदः ॥२९॥
तत्पादपांसुभिः पूतं भवनं चेतरद् वनम् ।

भक्ति की महिमा अपार है। इसका वर्णन नहीं किया जा सकता। देव-देव भगवान् शिव ऐसे अपने भक्तों को अपने से भी बढ कर मानते हैं।।२४।। घड़े से उत्पन्न हुए महर्षि अगस्त्य केवल एक शिवभक्ति के प्रभाव से ही अपार समुद्र के जल का पान कर गये। शिवभक्ति का यह उनमें चरम उत्कर्ष माना जायगा।।२५।। शिवभक्ति की यह महिमा है कि इसके प्रभाव से अणु महान् बन जाता है और महान् अणु हो जाता है। स्थल समुद्र बन जाता है और समुद्र स्थल हो जाता है।।२६।। शिव के अनुग्रह से सम्पन्न जिन महानुभावों के संकल्पमात्र से सब कुछ संभव हो सकता है, जिनकी महिमा वाणी और मन से अतीत है, ऐसे भक्तों के विषय में कौन क्या कह सकता है।।२७।। इसीलिये शिव ने पहले ही कहा है कि मनुष्यों में भक्त सर्वश्रेष्ठ हैं। इसलिये ये जो कुछ चाहते हैं, वह भले ही त्रैलोक्य में दुर्लभ हो, उसे मैं तुरन्त प्रदान करूँगा, यह मेरा सनातन व्रत है।।२८।।

ऐहिक और पारलौकिक भोग ही नहीं, मोक्ष भी उनको अनायास मिल जायगा। इसीलिये चर जंगम की संगति सभी की सब प्रकार की कामनाओं को पूरा करने वाली है।।२९।। वास्तव में घर वही है, जो ऐसे चर भक्तों की चरणरज से पवित्र है। बाकी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तद्यथाशक्ति संपूज्या जङ्गमा हि हितेप्सुना ॥
यदमी मानुषाकाराः प्रत्यक्षपरमेश्वराः ॥३०॥

त्रिविधा चरभक्तिः

चरेऽधिका स्वेष्टलिङ्गादुत्तमा भक्तिरुच्यते ।
चरेष्टलिङ्गयोस्तुल्या मध्यमेति निगद्यते ॥३१॥
चरे न्यूना स्वेष्टलिङ्गात् कनिष्ठा भक्तिरुच्यते ।
तस्माद्धि कुशलो नित्यमुत्तमां भक्तिमाश्रयेत् ॥३२॥

चरपूजा गरीयसी

सर्वतीर्थाभिषेकाच्च सर्वयज्ञविधानतः ।
सर्वदेवाराधनाच्च चरपूजा गरीयसी ॥३३॥
दूरे विलोक्य माहेशानभिगम्याभिवाद्य च ।
गृहमानीय यष्टव्यमित्येतच्छिवशासनम् ॥३४॥
चरो लोकहितार्थी स्यादहं चरहिते रतः ।
इति चरान् सुयष्टव्यमित्येच्छिवशासनम् ॥३५॥
जङ्गमानसमर्च्यैव मत्पूजा क्रियते यदि ।
सा पूजा विफलैव स्यादित्येतच्छिवशासनम् ॥३६॥

तो सब वन के समान हैं। इसलिये जो व्यक्ति अपना कल्याण चाहता है, उसे ऐसे जंगमों की शक्ति के अनुसार पूजा करनी चाहिये, क्योंकि ये तो मनुष्य की आकृति में साक्षात् परमेश्वर ही हैं।॥३०॥

जिस व्यक्ति में अपने इष्टलिंग से बढकर चर से भक्ति है, वह उत्तम भक्ति कहलाती है। इन दोनों में समान भक्ति मध्यम कही जाती है॥३१॥ अपने इष्टलिंग से यदि चर में भक्ति न्यून है, तो यह भक्ति कनिष्ठ मानी जाती है। इसलिये समझदार व्यक्ति को चाहिये कि वह सदा उत्तम भक्ति का सहारा ले॥३२॥

चर की पूजा सभी तीर्थों में स्नान करने से, सभी प्रकार के यज्ञों का अनुष्ठान करने से और सभी देवताओं की आराधना से भी बढकर मानी गई है॥३३॥ माहेश्वर भक्तों को दूर से ही आता हुआ देखकर उनके पास पहुंच कर प्रणाम करना चाहिये और उन्हें अपने घर पर लाकर उनकी पूजा करनी चाहिये। यही शिव का शासन है॥३४॥ जंगम सारी प्रजा की हितकामना करता है और मैं उस चर की आवश्यकताओं को पूरा करने में लगा रहूँ, इसी अभिप्राय से इनकी पूजा करनी चाहिये। यही शिव -शास्त्र का आदेश है॥३५॥ जंगमों की बिना पूजा किये जो व्यक्ति मेरी पूजा करता है, तो उसकी यह पूजा निष्फल जाती है, यही शिवशास्त्र का उपदेश है॥३६॥ इसलिये

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तदात्महितमाकाङ्क्षामाणः संपूजयेच्चरान् ।
तेषां यथा मनस्तृप्तिः सैव पूजा निगद्यते ॥३७॥
इदं ते चरमाहात्म्यं भोगमोक्षार्थसिद्धिदम् ।
कथितं संग्रहेणाथ किमन्यच्छ्रोतुमिच्छसि ॥३८॥

इति चन्द्रज्ञानागमे उत्तरभागे अनन्तरुद्रबृहस्पति–
संवादे शिवशासने क्रियापादे जङ्गमस्वरूप–
निरूपणं नाम चतुर्थः पटलः ॥४॥

अपने हित की कामना वाला व्यक्ति चर की सर्वप्रथम उपासना करे। उनका मन जिस बात से सन्तुष्ट होता है, यही उनकी वास्तविक पूजा कही जाती है॥३७॥ इस तरह से हे बृहस्पति, मैंने तुमको भोग और मोक्ष की सिद्धि को देने वाले चर जंगम के माहात्म्य को संक्षेप में सुनाया है। इसके बाद अब तुम क्या सुनना चाहते हो॥३८॥

इस प्रकार अनन्तरुद्र और बृहस्पति के संवाद के रूप में
प्रस्तुत इस चन्द्रज्ञानागम के क्रियापाद का जंगम
के स्वरूप का निरूपण करने वाला यह
चौथा पटल समाप्त हुआ ॥४॥

❋ ❋ ❋

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पञ्चमः पटलः

बृहस्पतिरुवाच

अशेषज्ञाननिलय लोकानुग्रहतत्पर ।
अनन्तमहिमाम्बोधेऽनन्तरुद्र नमोऽस्तु ते ॥१॥
महिमानमिहानन्तं चराणां शिवयोगिनाम् ।
कृतकृत्योऽस्मि विश्वात्मन्नाकर्ण्य श्रीमदाननात् ॥२॥
शुश्रूषुरद्य भूमानं पादतीर्थप्रसादयोः ।
तमप्यावेद्य विश्वेश कृपयाऽनुग्रहाण माम् ॥३॥

अनन्तरुद्र उवाच

श‍ृणु ते कथयिष्यामि पादतीर्थप्रसादयोः ।
स्वरूपमपि माहात्म्यमीश्वरेण प्रकाशितम् ॥४॥

पादतीर्थस्य त्रैविध्यम्

पादतीर्थं त्रिधा शम्भोर्गुरुजङ्गमयोरपि ।
दीक्षा शिक्षा ज्ञानमिति त्रिसंज्ञं तद्भवत्यहो ॥५॥

गुरुलिङ्गजङ्गमपादोदकव्यवस्था

पादतीर्थं सदा पेयं भवबन्धमुमुक्षुभिः ।
गुरोरपीष्टलिङ्गस्य चरस्यापि विशेषतः ॥६॥

बृहस्पति प्रश्न करते हैं—

समस्त ज्ञान के भण्डार, प्राणी मात्र पर अनुग्रह करने में कटिबद्ध, अनन्त महिमा के समुद्र हे अनन्तरुद्र! मैं आपको प्रणाम करता हूँ॥१॥ हे विश्वात्मन्! चर संज्ञक (जंगम नामक) शिवयोगियों की अनन्त महिमा को आपके मुख से सुनकर मैं कृतकृत्य हो गया हूँ॥२॥ अब मैं पादतीर्थ और प्रसाद की महिमा मो सुनना चाहता हूँ। हे विश्वेश! उसे भी मुझे बता कर अनुगृहीत कीजिये॥३॥

अनन्तरुद्र उत्तर देते हैं—

हे बृहस्पति! सुनो, मैं तुम्हें भगवान् शिव के द्वारा उपदिष्ट पादतीर्थ एवं प्रसाद का स्वरूप और माहात्म्य बताता हूँ॥४॥

पादतीर्थ तीन प्रकार का होता है—इष्टलिंग का, गुरु का और जंगम का। इन्हीं को क्रमशः दीक्षा पादोदक, शिक्षा पादोदक और ज्ञान पादोदक कहा जाता है॥५॥

संसार के बन्धन से मुक्ति चाहने वालों को गुरु के, इष्टलिंग के और विशेष कर जंगम के भी पादतीर्थ का पान सदा करना चाहिये॥६॥ गुरु और जंगम के

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गुरोश्चरस्य चालाभे इष्टलिङ्गपदोदकम् ।
लब्ध्वा गुर्वादिपादोदं भावयेन्मनसैव तत् ॥७॥
चरवर्जं गुरोर्लाभे लब्ध्वा गुरुपदोदकम् ।
गुरुजङ्गमपादोदं लब्धवानिति भावयेत् ॥८॥
गुरुवर्जं चरप्राप्तौ लब्ध्वा चरपदोदकम् ।
तदेव गुरुपादोदमिति मत्वा पिबेत् तदा ॥९॥
पाद्यं दत्वा विभोस्तस्य गृह्णीयात् पादतो जलम् ।
शतधारेण मन्त्रेण पञ्चाक्षरयुतेन च ॥१०॥
धृत्वा शिरसि पादाम्बु महत्फलमवाप्नुयात् ।
ऋतं सत्यमिति प्राश्य चाऽनन्तफलमश्नुते ॥११॥
अकालमृत्युमथनं सर्वव्याधिविनाशनम् ।
सर्वपापोपशमनं शम्भोः पादोदकं शुभम् ॥१२॥
मङ्गलं मङ्गलानां च सर्वपावनपावनम् ।
दुष्टग्रहोपशमनम् इष्टसिद्धिप्रदायकम् ॥१३॥

पादोदक के न मिलने पर इष्टलिंग के पादोदक को ही लेकर उसमें गुरु और जंगम के पादोदक की भी भावना कर लेनी चाहिये॥७॥ जंगम को छोड़ केवल गुरु के मिल जाने पर भी गुरु के पादोदक को प्राप्त कर उसमें ऐसी भावना करे कि गुरु और जंगम दोनों का पादोदक मिल गया है॥८॥ गुरु को छोड़ केवल जंगम के मिल जाने पर भी जंगम के पादोदक को प्राप्त कर उसमें ऐसी भावना करे कि गुरु का पादोदक भी मिल गया है और तब उसका पान करे॥९॥ भगवान् शिव के स्वरूप गुरु को पाद्य समर्पित कर उनके चरणोदक का पंचाक्षर मन्त्र के साथ [1]शतधार मन्त्र से पात्र में उसका संग्रह चाहिये॥१०॥ उस चरणोदक को सिर पर धारण करने से महान् फल की प्राप्ति होती है और [2]ऋतं सत्यं मन्त्र से उसका पान कर अनन्त फल का भागी होता है॥११॥ इष्टलिंग का कल्याणप्रद यह पादोदक अकाल मृत्यु को रौंद देने वाला, सभी प्रकार के रोगों का नाश कर देने वाला और सभी पापों का उपशमन करने वाला है॥१२॥ यह पादोदक मंगलों का भी मंगल, सभी पावन वस्तुओं को भी पवित्र करने

---

१. पूरे मन्त्र का स्वरूप इस प्रकार है—"वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्। देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः॥" (शुक्लयजुर्वेद माध्यन्दिन संहिता, १.२)
२. पूरी ऋचा इस प्रकार है—"ऋतं सत्यं परं ब्रह्म पूरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः॥" (तैत्तिरीय आरण्यक, १०.१२.१)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सर्वदुःखप्रशमनं सर्वोपद्रवनाशनम् ।
सर्वसिद्धिप्रदं सद्यः सर्वेषां मुक्तिदायकम् ॥१४॥
एकमूर्तेस्त्रयो भागा गुरुर्लिङ्गं च जङ्गमः ।
तदेवंगुणकं ग्राह्यं गुरुजङ्गमयोरपि ॥१५॥

पादोदकमहिमा

शोषणं पापपङ्कस्य दीपनं ज्ञानतेजसः ।
गुरोः पादोदकं चित्रं संसारद्रुमनाशनम् ॥१६॥
सर्वतीर्थाभिषेके या शुद्धिर्मनसि जायते ।
गुरोरङ्घ्रिस्पर्शजले शिरसा धारिते हि सा ॥१७॥
सप्तसागरपर्यन्तं तीर्थस्नानफलं सदा ।
गुरोरङ्घ्रिपयोबिन्दुसहस्त्रांशं न पूरयेत् ॥१८॥
चरपादोदमहिमा वर्णितुं केन शक्यते ।
तद्धि मोचयितुं सद्यः शक्नुते यच्चराचरम् ॥१९॥

वाला, दुष्ट ग्रहों की शान्ति करने वाला और इष्ट सिद्धि को देने वाला है॥१३॥ यह पादोदक सभी प्रकार के दुःखों को शान्त करने वाला, सभी प्रकार के उपद्रवों का नाश करने वाला, सभी प्रकार की सिद्धियों को देने वाला और तत्काल सभी को मुक्ति दिलाने वाला है॥१४॥ गुरु, लिंग और जंगम ये एक ही भगवान् शिव के तीन स्वरूप हैं। इस लिये इष्टलिंग के पादोदक के समान गुण वाले गुरु और जंगम के पादोदक को भी ग्रहण करना चाहिये॥१५॥

यह पादोदक पापरूपी वृक्ष की जड़ को सुखा डालना है, ज्ञान की दीप्ति को बढाता है। यह गुरु का चरणोदक ऐसा विचित्र[३] है कि संसाररूपी वृक्ष का नाश कर देता है॥१६॥ सभी तीर्थों में स्नान करने से जो शुद्धि मन में उत्पन्न होती है, वह शुद्धि गुरु के चरणोदक को सिर पर धारण करने से अनायास मिल जाती है॥१७॥ सात सागरों तक पृथ्वी पर जितने भी तीर्थ हैं, उनमें स्नान करने जो फल मिलता है वह गुरु के चरणोदक की एक बूँद के सेवन से मिलने वाले फल के हजारवें भाग की बराबरी नहीं कर सकता॥१८॥ जंगम के पादोदक की महिमा का वर्णन कौन कर सकता है? क्योंकि वह तो चराचर सारे जगत् को तत्काल मुक्त करने में समर्थ है॥१९॥

---

३. लगभग इसी अभिप्राय के इस वचन को देखिये—''न केनापि श्रुतं दृष्टं वारिणा वारि शुष्यति। अहो भागीरथीवारा भवसिन्धुर्विशुष्यति ॥'' सन्त शिरोमणि मन्मथ स्वामी की इस वाणी को भी देखिये—''गंगा तीर्थी एक अवगुण । खोली जाता जाय बुडोल॥''

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

५. प्रसादस्वरूपं माहात्म्यं च

अथ वक्ष्ये प्रसादस्य रूपं तद्वैभवं शृणु ।
गुरुलिङ्गजङ्गमानां भुक्तशेषः प्रसादकः ॥२०॥

त्रिविधः प्रसादः

शुद्धसिद्धप्रसिद्धाख्यः स हि मुक्त्येकसाधनः ।
द्वयोस्त्रयाणां वा लाभे ग्राह्योऽयं पादतीर्थवत् ॥२१॥
शिवेन[४] भुक्तं भुञ्जीयात् तत्पीतं हि जलं पिबेत् ।
शिवाघ्रातं सदा जिघ्रेदेष धर्मः सनातनः ॥२२॥

शिवार्पितस्यैव प्रसादस्य परिग्राह्यत्वम्

भुञ्जते ये तु सम्मूढास्त्र्यम्बकायासमर्पितम् ।
ते भुञ्जते क्रिमीनेनांस्यधो गच्छन्ति शाश्वतम् ॥२३॥

पादतीर्थ की महिमा बताने के उपरान्त अब मैं प्रसाद का स्वरूप और उसकी महिमा को बता रहा हूँ, तुम उसे सुनो! गुरु, लिंग और जंगम को भोजन कराने के उपरान्त जो बचता है, उसे प्रसाद कहा जाता है॥२०॥

यह प्रसाद तीन प्रकार का है। इनके नाम शुद्धप्रसाद, सिद्धप्रसाद और प्रसिद्धप्रसाद हैं। यह प्रसाद मुक्ति का एकमात्र साधन है। दो अथवा तीनों के मिलने पर [५]पादोदक की प्रक्रिया के अनुसार ही इनका ग्रहण किया जाता है॥२१॥ शिव को भोग लगा कर ही स्वयं भोजन करें, उनके द्वारा पिये गये जल को ही स्वयं पिये, शिव के द्वारा आघ्रात गन्ध का ही स्वयं आघ्राण करे। यही सनातन धर्म है॥२२॥

जो मूढ व्यक्ति भगवान् शिव को बिना समर्पित किये स्वयं भोजन करते हैं, वे कृमि-कीट तथा पापपुंजों का ही भक्षण करते हैं, अर्थात् उनका भोजन करना कृमि-कीट के भक्षण के समान और [६]पापपुंज के भक्षण के समान हो जाता है। वे

---

४. यह श्लोक सिद्धान्तशिखामणि (९.७०) में पाठभेद के साथ उपलब्ध है। टीकाकार ने जाबाल श्रुति को भी उद्धृत किया है।

५. इसका अभिप्राय यह है कि गुरु का प्रसाद प्राप्त होने पर उसी में इष्टलिंग और जंगम के प्रसाद की भावना कर लेनी चाहिये। आचार दो प्रकार का है—सहजाचार और संबन्धाचार। स्वाभाविक रूप से प्राप्त किसी भी प्रसाद का ग्रहण सहजाचार तथा किसी एक प्रसाद के प्राप्त होने पर उसी में अन्य प्रसादों की भावना करना संबन्धाचार है। जैसे कि गुरु के प्रसाद के मिल जाने पर उसमें लिंग और जंगम के प्रसाद की भावना कर ली जाती है।

६. ''भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्'' (३।१३) भगवद्गीता के इस वचन का भी यही अभिप्राय है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पत्रं पुष्पं फलं तोयमन्नपानाद्यमौषधम् ।
असमर्प्य न भुञ्जीत भगवन्तं सदाशिवम् ॥२४॥
शब्दस्पर्शरूपरसगन्धतन्मात्रपञ्चकम् ।
असमर्प्य न भुञ्जीत भगवन्तमुमापतिम् ॥२५॥
यदिन्द्रियागतं किञ्चिद् यत्सुखं तच्छिवार्पितम् ।
तत्प्रसादं च भोक्तव्यं तदिन्द्रियमुखेन च ॥२६॥
संयोगेषु वियोगेषु चाणुमात्रसुखानि च ।
इष्टलिङ्गे समर्प्यैव भुञ्जीयात् तानि सन्ततम् ॥२७॥
समर्पणं द्विधा प्रोक्तं स्थूलसूक्ष्मविभेदतः ।
यच्छब्दाद्यविभागेनैवेष्टलिङ्गे समर्प्यते ॥
द्रव्यं तत्स्थूलमित्युक्तमर्चाङ्गं तत्प्रकीर्तितम् ॥२८॥
शब्दादिविषया यत्र भावेनैव न चान्यथा ।
समर्प्यंते रूपमेव तद्धि स्थूलं (सूक्ष्मं) प्रकीर्तितम् ॥२९॥
अर्चाङ्गं स्थूलमित्युक्तं सूक्ष्मं स्यादौपभोगिकम् ।
पदार्थभोगावसरे शब्दादीनां विभागतः ॥
समर्पणं हि तत्सूक्ष्ममिदं स्यात् सार्वकालिकम् ॥३०॥

अनन्त काल तक अधोगति प्राप्त करते हैं॥२३॥ अतः पत्र, पुष्प, फल, जल, अन्न, पान, औषध आदि को भगवान् सदाशिव को समर्पित किये बिना ग्रहण न करे॥२४॥ शब्द, स्पर्श, रूप, रस और गन्ध नामक पांच तन्मात्राओं का भी भगवान् उमापति को समर्पित किये बिना उपभोग न करे, अर्थात् विषयों के सूक्ष्म रूपों को भी मन में न लावे॥२५॥ जिस जिस इन्द्रिय के माध्यम से जो कुछ भी सुख मिलता है, उसे शिव को समर्पित कर देना चाहिये और तब भगवत्प्रसाद के रूप में ही उस इन्द्रिय-सुख का उपभोग करे॥२६॥ (इष्ट)संयोग और (अनिष्ट) वियोग से क्षणमात्र के लिये जो सुख मिलता है, उसका भी सदा इष्टलिंग को समर्पित करके ही उपभोग करना चाहिये॥२७॥ स्थूल और सूक्ष्म के भेद से समर्पण दो प्रकार का होता है। शब्द, स्पर्श आदि का विभाग किये बिना इष्टलिंग के प्रति जो द्रव्य समर्पित किया जाता है, उसको स्थूल कहते हैं। यह अर्चा (पूजा) का अंग माना जाता है॥२८॥ शब्द, स्पर्श आदि विषय जहां भाव के रूप में ही अर्पित किये जाते हैं, अन्य रूप में नहीं, वह सूक्ष्म समर्पण कहलाता है॥२९॥ स्थूल समर्पण अर्चा का अंग है। इसका सूक्ष्म अंग औपभोगिक कहलाता है। पदार्थों की भोग दशा में शब्द, स्पर्श आदि के विभागों का निरीक्षण करते हुए सदा सदा के लिये उनको भगवदर्पित कर दिया जाता है। यही

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यदा येनेन्द्रियेणैव विषयो ह्युपभुज्यते ।
तदिन्द्रियगते लिङ्गे ह्यर्पणं सूक्ष्ममीरितम् ॥३१॥
समर्पणविशेषं ये भक्ताः सम्यग् विजानते ।
शम्भोः प्रसादमतुलमश्रमं विन्दते हि ते ॥३२॥

प्रसादलक्षणं महिमा च

समर्पितः प्रसादैककारणत्वान्महेशितुः ।
प्रसादत्वेन विख्यातः परमानन्ददायकः ॥३३॥
ऋतं सत्यं परं ब्रह्मामृतमित्यपि गीयते ।
प्रसादस्तस्य महिमा केन वा वर्ण्यते कथम् ॥३४॥
गुरूच्छिष्टं पुरोडाशं चरस्यापि विशेषतः ।
चरगुर्वोः प्रसादस्तु ध्रुवं पावित्र्यदायकः ॥३५॥
प्रसादमहिमाऽचिन्त्यः प्रोक्तो देवगुरो तव ।
गोपनीयः प्रयत्नेन किमन्यच्छ्रोतुमिच्छसि ॥३६॥

इति श्रीचन्द्रज्ञानागमे उत्तरभागेऽनन्तरुद्रबृहस्पति-संवादे शिवशासने क्रियापादे पादोदकप्रसाद-स्वरूपनिरूपणं नाम पञ्चमः पटलः ॥५॥

उनका औपभोगिक सूक्ष्म रूप है॥३०॥ जब जिस इन्द्रिय से जिस विषय का उपभोग किया जाता है, उस इन्द्रिय में स्थित लिंग को उसे समर्पित कर देना ही सूक्ष्म समर्पण कहलाता है॥३१॥ इस सूक्ष्म समर्पण की विशेष प्रक्रिया को जो भली भांति जानते हैं, वे बिना प्रयास के शिव की अतुल प्रसन्नता को प्राप्त कर लेते हैं॥३२॥

समर्पित किये जाने के बाद जो महेश्वर की प्रसन्नता का एकमात्र कारण है, परम आनन्द का प्रदाता है, वह पदार्थ ही प्रसाद के नाम से विख्यात है॥३३॥ परब्रह्म की [७]ऋत, सत्य और अमृत के रूप में स्तुति की जाती है। इसकी महिमा का नाम ही प्रसाद है। इसकी महिमा का गुणगान कौन किस प्रकार कर सकता है॥३४॥ गुरु के द्वारा छोड़ा गया [८]पुरोडाश और विशेष रूप से जंगम का पुरोडाश अथवा इन दोनों का प्रसाद निश्चय ही पवित्रता प्रदान करने वाला है॥३५॥ इस प्रकार हे देवगुरो ! तुम्हारे

---

७. ऊपर की दूसरी टिप्पणी देखिये।

८. याग में देवता को आहुति देने के लिये जौ या चाँवल के आटे का हविर्द्रव्य के रूप में पुरोडाश बनाया जाता है। जिस वारणकाष्ठ के प्रादेश-प्रमाण के चतुरस्र पात्र में इसको रखा जाता है, उसको पुरोडाशपात्र कहते हैं।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सामने प्रसाद की इस अचिन्त्य महिमा का वर्णन किया गया। इसको प्रयत्नपूर्वक गुप्त रखना चाहिये। अब इसके बाद तुम क्या सुनना चाहते हो॥३६॥

इस प्रकार अनन्तरुद्र और बृहस्पति के संवाद रूप में प्रस्तुत श्रीचन्द्रज्ञानागम नामक शिवशास्त्र के उत्तर भाग के क्रियापाद का पादोदक और प्रसाद के स्वरूपका *निरूपण करने वाला यह पाँचवां पटल समाप्त हुआ॥*

❋ ❋ ❋

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

षष्ठः पटलः

बृहस्पतिरुवाच

अप्रमेयप्रभावाढ्य जगदीश नमोऽस्तु ते ।
श्रुत्वा प्रसादभूमानं कृतकृत्योऽस्मि साम्प्रतम् ॥१॥
षष्ठस्य भस्मनश्चापि यन्माहात्म्यमनुत्तमम् ।
तदप्यावेद्य कृपया धन्यं संपादयाद्य माम् ॥२॥

अनन्तरुद्र उवाच

ब्रह्मन्नावेदयिष्यामि भस्मसंपादनं तथा ।
धारणं वैभवं चापि सावधानमनाः शृणु ॥३॥

६. भस्माख्यं षष्ठमावरणम्

विद्याशक्तिः समस्तानां शक्तिरित्यभिधीयते ।
गुणत्रयाश्रया विद्या सा विद्या च तदाश्रया ॥४॥

गो-गोमय-गोमूत्रस्वरूपनिरूपणम्

गुणत्रयमिदं धेनुर्विद्याऽभूद्गोमयं शुभम् ।
मूत्रं चोपनिषत् प्रोक्तं कुर्याद्भस्म ततः परम् ॥५॥

भस्मसम्पादनविधिः

पञ्चाक्षरेण मन्त्रेण धेनुं तत्राभिमन्त्रयेत् ।
अष्टोत्तरशतेनाथ प्राशयेत्तु जलं तृणम् ॥६॥

बृहस्पति प्रश्न करते हैं—

हे अपरिमित प्रभाव से सम्पन्न जगत् के स्वामी अनन्तरुद्र! मैं आपको प्रणाम करता हूँ। अभी मैं प्रसाद की महिमा को सुन कर कृतकृत्य हो गया हूँ॥१॥ अब छठे भस्म नामक आवरण की श्रेष्ठ महिमा को सुनाकर आप आज मुझे धन्य बना दें॥२॥

अनन्तरुद्र उत्तर देते हैं—

हे बृहस्पति! भस्म कैसे बनाई जाती है तथा कैसे धारण की जाती है, इसकी महिमा क्या है? ये सब बातें मैं सुनाता हूँ। तुम सावधान होकर सुनो॥३॥

विद्याशक्ति समस्त पदार्थों की शक्ति मानी जाती है। यह विद्या तीनों गुणों का आधार है और इन तीनों गुणों पर विद्या आश्रित है॥४॥

ये तीन गुण ही धेनु का और विद्या कल्याणप्रद गोमय का रूप धारण करते हैं। उपनिषद् गोमूत्र है। इन तीनों से ही श्रेष्ठ भस्म तैयार की जाती है॥५॥

पंचाक्षर मन्त्र से धेनु को अभिमन्त्रित करके १०८ बार पंचाक्षर मन्त्र से ही अभिमन्त्रित जल और तृण उसे पान और भोजन के लिये दे॥६॥ शुक्ल पक्ष अथवा

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उपोष्य च चतुर्दश्यां शुक्ले कृष्णेऽथवा व्रती ।
परेद्युः प्रातरुत्थाय शुचिर्भूत्वा समाहितः ॥७॥
कृतस्नानो धौतवस्त्रः पयोऽर्थं विसृजेच्च गाम् ।
उत्थाप्य गां प्रयत्नेन गायत्र्या मूत्रमाहरेत् ॥८॥
सौवर्णे राजते ताम्रे धारयेन्मृण्मये घटे ।
पौष्करेऽथ पलाशे वा पात्रे गोशृङ्ग एव वा ॥९॥
आददीत हि गोमूत्रं मूलमन्त्रेण गोमयम् ।
अभूमिपातं गृह्णीयात् पात्रे पूर्वोदिते गृहे ॥१०॥
गोमयं शोधयेद् विद्वान् मूलमन्त्राष्टकेन च ।
दशजप्तेन मन्त्रेण गोमूत्रं शोधयेत् तथा ॥११॥
भवाय नममन्त्रेण गोमूत्रं गोमये क्षिपेत् ।
शर्वाय नम इत्येवं पिण्डानां च चतुर्दश ॥१२॥
कुर्यात् संशोष्य किरणैः सप्तमूलेन चाहरेत् ।
विदध्यादथ पूर्वोक्तपात्रे गोमयपिण्डकान् ॥१३॥

कृष्ण पक्ष की चतुर्दशी को उपवास रख कर व्रती साधक दूसरे दिन प्रातःकाल उठकर पवित्र और एकाग्रचित्त होकर॥७॥ स्नान कर के उपासक धुले हुए पवित्र वस्त्र धारण कर दूध दुहने के लिये गाय को उद्यत करे। पहले गाय को उठाकर प्रयत्नपूर्वक गायत्री मन्त्र से गोमूत्र का ग्रहण करे॥८॥ सुवर्ण के, चांदी के, ताम्र के अथवा मिट्टी के पात्र में अथवा कमलदल, पलाशपत्र आदि से बनाये गये पात्र में, अथवा गोशृंग में गोमूत्र को मूल पंचाक्षरी मन्त्र का उच्चारण करते हुए ग्रहण करे। इसी प्रकार अपने घर में ही पूर्वोक्त पात्रों में से किसी एक में जमीन पर गिरने से पहले ही गोमय का भी संग्रह करे॥९-१०॥ विद्वान् साधक मूल पंचाक्षरी मन्त्र का आठ बार उच्चारण कर गोमय को तथा इसी तरह से दस बार मन्त्र का जप करते हुए गोमूत्र को सुसंस्कृत करे॥११॥ 'भवाय नमः' [1]मन्त्र से गोमूत्र को गोमय में मिलाना चाहिये। इसी तरह से 'शर्वाय नमः' [2]मन्त्र से गोमय के चौदह पिण्ड बनावे॥१२॥ फिर सूर्य की किरणों से उनको सुखा कर सात बार पंचाक्षर मन्त्र का उच्चारण करते हुए गोमय के पिंडों को उठा कर पहले बताये गये सोने, चांदी आदि के पात्र में रखना चाहिये॥१३॥

---

१. महानारायणोपनिषत्, १४.६

२. महानारायणोपनिषत्, १४.७

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आहुतिविधानम्

शैवागमोक्तविधिना प्रतिष्ठाप्याग्निमर्चयेत् ।
पिण्डांश्च निक्षिपेत् तत्र चाद्यन्तप्रणवेन तु ॥१४॥
षडक्षरस्य मन्त्रस्य व्यावृत्तस्य तथाऽक्षरैः ।
स्वाहान्तैर्जुहुयात् तत्र वर्णैर्गोमयपिण्डकान् ॥१५॥
मूलेनैवाज्यभागौ च प्रक्षिपेदेव संयतः ।
ततो निधनपतये त्रयोविंशं जुहोति च ॥
होतव्याः पञ्चब्रह्माख्या नमो देवाय शम्भवे ॥१६॥
इति सर्वाहुतीर्हुत्वा चतुर्थ्यन्तैश्च मन्त्रकैः ।
भवः शर्वो मृडो रुद्रो हरः शम्भुर्महेश्वरः ॥१७॥
एतैश्च जुहुयाद् विद्वान् मूलमन्त्राष्टकं तथा ।
शिवाय त्रयहोमश्च स्विष्टकृन्मूलमन्त्रतः ॥१८॥

तब शैवागमों में बताई गई विधि से [३]अग्नि की स्थापना कर उसका पूजन करना चाहिये। इसके बाद मूल पंचाक्षर मन्त्र के आदि और अन्त में प्रणव का उच्चारण करते हुए उन गोमय पिण्डों को अग्नि में रखना चाहिये॥१४॥ षडक्षर मन्त्र के वर्णों का क्रम से और विपरीत [४]क्रम से उच्चारण करते हुए अन्त में स्वाहा पद को जोड़ कर इन गोमय पिंडों को अग्नि में रखना चाहिये॥१५॥ इसके अनन्तर संयतेन्द्रिय साधक को षडक्षर मन्त्र से आज्य भाग की आहुति देनी चाहिये। तब 'निधनपतये' [५]मन्त्र से २३वीं आहुति देकर 'पंचब्रह्म' [६]मन्त्रों से तथा 'नमो देवाय शम्भवे' मन्त्र से घृत की आहुतियां देनी चाहिये॥१६॥ इस तरह से ऊपर बताई गई आहुतियों को देने के बाद भव, शर्व, मृड़, रुद्र, हर, शम्भु, महेश्वर और शिव—इन आठ नामों के साथ [७]चतुर्थी

---

३. अग्निस्थापन की विधि अजितागम क्रियापाद के २१ वें पटल में विस्तार से दी गई है। वीरशैव-दीक्षाविधि (पृ० ९६-१०२) भी देखिये।

४. "ॐ नमः शिवाय" यह षडक्षर मन्त्र का अनुलोम क्रम है। विलोम क्रम मे "य वा शि मः न ॐ" यह मन्त्राक्षरों का क्रम होगा।

५. "निधनपतये नमः। निधनपतान्तिकाय नमः" (महाना० १४.१)

६. "सद्योजातं प्रपद्यामि, वामदेवाय नमः, अघोरेभ्योऽथ घोरेभ्यः, तत्पुरुषाय विद्महे, ईशानः सर्व-विद्यानाम्" (तैत्तिरीय आरण्यक, १०। ४३-४७) ये पांच मन्त्र पंचब्रह्म के नाम से शैव शास्त्रों में प्रसिद्ध हैं। महाना० १५-१९ अनुवाद भी देखिये।

७. मन्त्रक्रम इस प्रकार होगा—भवाय शिवाय नमः, शर्वाय शिवाय नमः, मृडाय शिवाय नमः, रुद्राय शिवाय नमः, हराय शिवाय नमः, शम्भवे शिवाय नमः, महेश्वराय शिवाय नमः, शिवाय शिवाय नमः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इत्थं शेषं तु निर्वर्त्य पूर्णपात्रोदकं तथा ।
अष्टोत्तरशतेनाथ तर्पयेच्छुद्धमानसः ॥१९॥

पुलकाहरणम्

पञ्चब्रह्मेण मन्त्रेण तज्जलं शिरसि क्षिपेत् ।
दशवारं तु जप्तेन दिक्षु तोयं विनिक्षिपेत् ॥
शैवानां दक्षिणां दत्वा शान्त्यै पुलकमाहरेत् ॥२०॥
शैवानामाहरिष्यामि सर्वेषां कर्मगुप्तये ।
जातवेदसमेनं त्वां पुलकैश्छादयाम्यहम् ॥२१॥
मन्त्रेणानेन तं वह्निं पुलकैश्छादयेत् ततः ।
त्रिदिनं ज्वलनस्थित्यै छादनं पुलकं स्मृतम् ॥
ब्राह्मणान् भोजयेद् भक्त्या स्वयं भुञ्जीत वाग्यतः ॥२२॥
दिनत्रयेण यदि वा प्रथमे दिवसेऽथवा ।
द्वितीये वा तृतीये वा प्रातः स्नात्वा सिताम्बरः ॥२३॥
शुक्लभास्वद्यज्ञसूत्रः शुद्धभस्मानुलेपनः ।
मूलमन्त्रं समुच्चार्य पुलकं भस्म सन्त्यजेत् ॥२४॥

विभक्ति जोड़कर और प्रत्येक चतुर्थ्यन्त मन्त्र के साथ पंचाक्षर मन्त्र का उच्चारण करते हुए आहुतियां देनी चाहिये। तब पंचाक्षर मन्त्र से शिव के लिये स्विष्टकृद्[८] होम की तीन आहुतियां दे॥१७-१८॥ इसी तरह से अन्य सारी क्रियाओं को पूरा करके शुद्ध मन वाला साधक १०८ बार मूल मन्त्र का उच्चारण कर जल से तर्पण करे॥१९॥

तब पंचब्रह्म मन्त्र से उस जल को अपने सिर पर छिड़के । दस बार अभिमन्त्रित जल को क्रमशः दशों दिशाओं में छिड़के । तब शैवाचार्यों को दक्षिणा देकर शान्ति के लिये पुलक[९] का आहरण करे॥२०॥ सभी शैव भक्तों के द्वारा सम्पादित कर्मों की रक्षा के लिये मैं पुलक का आहरण करता हूँ। हे अग्निदेव! अब मैं तुमको इन पुलकों से ढंक रहा हूँ॥२१॥ इस मन्त्र का उच्चारण करते हुए पुलक से वह्नि को ढंक दे। तीन दिन तक अग्नि जलती रहे, इसके लिये साधनभूत विधि को ही पुलक कहा जाता है। इसके बाद भक्तिभावपूर्वक ब्राह्मणों को भोजन करावे और मौन धारण कर स्वयं भी भोजन करे॥२२॥ तीन दिन बाद अथवा पहले दिन, दूसरे दिन या तीसरे दिन प्रातः स्नान कर शुक्ल वस्त्र धारण करे॥२३॥ उज्ज्वल शुक्ल यज्ञोपवीत धारण

---

८. स्विष्टकृद् होम वीरशैवलिंगीब्राह्मणदशकर्मपद्धति के वीरशैव दीक्षाविधि प्रकरण (पृ० ११९) में देखिये ।

९. पुलक शब्द का प्रयोग यहां धान की भूसी के लिये हुआ है, जिसकी धीमी आंच में रखकर अभिमन्त्रित गोबर के गोलों को पकाकर भस्म तैयार की जाती है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ततश्चावाहनमुखानुपचारांस्तु षोडश ।
कृत्वाऽऽहृत्य तथा शैवं ततोऽग्निमुपसंहरेत् ॥२५॥

सद्यादिमन्त्रेण भस्मशुद्धीकरणम्

सद्यादिकेन मन्त्रेण गृह्णीयाद् भस्म चोत्तमम् ।
तदनन्तरमन्त्रेण प्रमृज्य च ततः परम् ॥
संयोज्य गन्धसलिलैः कपिलामूत्रकेण वा ॥२६॥
चन्द्रकुङ्कुमकस्तूरीमुशीरं चन्दनं तथा ।
अगरुद्वितयं चैव चूर्णयित्वा तु सूक्ष्मतः ॥२७॥
प्रणवेनाहरेद् विद्वान् बृहतो वटकानथ ।
अघोरमन्त्रतश्चाथ दशजप्तेन मूलतः ॥२८॥

भस्मसम्पादनस्य विधानान्तरम्

विधान्तरं प्रवक्ष्यामि भस्मसंपादनं लघु ।
सद्येन गोशकृद् ग्राह्यं वामेन त्वभिमन्त्रयेत् ॥२९॥
अघोरेण दहेत् पिण्डं ग्राह्यं तत्पुरुषेण तु ।
नित्यमीशानमन्त्रेण स्वाङ्गे धार्यं प्रयत्नतः ॥३०॥

कर और शुद्ध भस्म का अनुलेपन कर साधक पंचाक्षर मन्त्र का उच्चारण करते हुए पुलक की भस्म को हटावे॥२४॥ तब आवाहन आदि सोलह उपचारों से अग्नि का पूजन कर वहां से हटाकर उस [१०]शैव अग्नि का विसर्जन कर दे॥२५॥

अब [११]सद्योजात मन्त्र से उस उत्तम भस्म को लेकर बाद के वामदेव मन्त्र से उसका चूर्ण बना कर इसके बाद उसमें सुगन्धित जल या कपिला गौ का मूत्र मिलावे॥२६॥ कपूर, कुंकुम, कस्तूरी, उशीर, चन्दन और दोनों तरह की अगुरु का सूक्ष्म चूर्ण बना कर उसमें मिलाना चाहिये॥२७॥ इसके बाद विद्वान् साधक ॐकार का उच्चारण करते हुए अघोर मन्त्र का और पंचाक्षर मन्त्र का दस बार उच्चारण करते हुए भस्म के बड़े गोले बनावे॥२८॥

भस्म बनाने की एक दूसरी संक्षिप्त विधि भी मैं तुमको बताता हूँ। इसके अनुसार सद्योजात मन्त्र से गोमय का ग्रहण तथा वामदेव मन्त्र से उसको अभिमन्त्रित करते हुए उसे सुखावे॥२९॥ अघोर मन्त्र से गोमयपिंड का दहन करे और तत्पुरुष

---

१०. ऊपर तीसरी टिप्पणी में प्रदर्शित अजितागम के २१ वें पटल (श्लो. ६७-८४) में अग्नि के संस्कार की विधि प्रदर्शित है। इन संस्कारों से संस्कृत अग्नि को शैव अग्नि कहा जाता है ।

११. सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः ॥ (तै० आ० १०.४३.१. तथा महाना० १५ अनु.)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भस्मत्रैविध्यम्

शान्तिकं पौष्टिकं भस्म कामदं च त्रिधा भवेत् ।
गोमयं योनिसम्बद्धं यद्धस्तेनैव गृह्यते ॥
ब्रह्ममन्त्रैश्च संदग्धं तच्छान्तिकमिहोच्यते ॥३१॥
सावधानेन गोयोनिनिस्सृतं गोमयं तु यत् ।
अन्तरिक्षे गृहीत्वा तं षडङ्गेन दहेत् ततः ॥
पौष्टिकं तु समाख्यातं कामदं तु ततः शृणु ॥३२॥
सुशुद्धे भूतले दैवात् पतितं गोमयं तु यत् ।
प्रसादेन दहेदेवमेतत् कामदमुच्यते ॥३३॥

भस्मधारणम्

शिवाग्निजनितं भस्म शस्तं स्याच्छिवयोगिनाम् ।
विरजानलजं चैव धार्यं भस्म महामुनेः ॥३४॥
औपासनसमुत्पन्नं गृहस्थानां विशिष्यते ।
समिदग्निसमुत्पन्नं शस्तं वै ब्रह्मचारिणाम् ॥३५॥
त्रैवर्णिकानां सर्वषामग्निहोत्रसमुद्भवम् ।
शूद्राणां श्रोत्रियागारपचनाग्निसमुद्भवम् ॥
अन्येषामपि सर्वेषां धार्यं दावानलोद्भवम् ॥३६॥

मन्त्र से उसका ग्रहण कर ईशान मन्त्र से प्रयत्नपूर्वक अपने शरीर पर उसे धारण करे॥३०॥

यह भस्म शान्तिक, पौष्टिक और कामद के भेद से तीन प्रकार की होती है। गोयोनि से निकलते समय ही गोमय को हाथ में लेकर उसे पंचब्रह्म मन्त्रों से संदग्ध कर जो भस्म बनाई जाती है, वह शान्तिक भस्म कहलाती है॥३१॥ गोयोनि से निःसृत गोमय को पृथ्वी पर गिरने से पहले ही सावधानी से बीच में ही लेकर षडंग मन्त्रों से उसे संदग्ध कर जो भस्म बनाई जाती है, वह पौष्टिक भस्म कहलाती है॥३२॥ अनायास पवित्र भूमि पर गिरे गोमय को लेकर प्रसाद मन्त्र से उसे संदग्ध कर बनाई गई भस्म कामद कहलाती है॥३३॥

शिवयोगियों के लिये शिवाग्नि से तैयार की गई भस्म प्रशस्त है। मुनियों के लिये विरजानल से तैयार की गई भस्म धारणीय मानी गई है॥३४॥ [१२]औपासन अग्नि से उत्पन्न भस्म गृहस्थों के लिये और समिधा से उत्पन्न भस्म ब्रह्मचारियों के लिये प्रशस्त है॥३५॥ सभी त्रैवर्णिकों के लिये अग्निहोत्र से उत्पन्न भस्म और शूद्रों

---

१२. औपासनाग्नि गृह्याग्नि का ही दूसरा नाम है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भस्मस्नानोद्धूलनविधि:

भस्मस्नानविधिं वक्ष्याम्यशेषाघौघनाशनम् ।
भस्ममुष्टिं समादाय संहितामन्त्रमन्त्रितम् ॥
मस्तकात् पादपर्यन्तं भस्मस्नानं समाचरेत् ॥३७॥
ईशेन पञ्चधा भस्म विकिरेन्मूर्ध्नि यत्नतः ।
मुखे चतुस्तत्पुरुषेणाघोरेणाष्टधा हृदि ॥३८॥
वामेन गुह्यदेशे तु त्रिदशधा ततः पुनः ।
अष्टधा सद्यमन्त्रेण पादमुद्धूल्य यत्नतः ॥
सर्वाङ्गोद्धूलनं कुर्यात् पञ्चभिर्ब्रह्मभिः पुनः ॥३९॥

त्रिविधं भस्मधारणम्

उद्धूलनं ततश्चैवमवगुण्ठनमेव च ।
त्रिपुण्ड्रं चेति विख्यातं त्रिविधं भस्मधारणम् ॥४०॥

के लिये श्रोत्रिय के रसोई घर की अग्नि से उत्पन्न भस्म श्रेष्ठ है। इसी तरह से ऊपर निर्दिष्ट चार वर्णों से भिन्न सभी व्यक्तियों के लिये दावानल से उत्पन्न भस्म धारणीय मानी गई है।॥३६॥

अब मैं समस्त पापसमूह का नाश कर देने वाली भस्मस्नान की विधि बताऊँगा। संहिता में बताये मन्त्रों से अभिमन्त्रित भस्म को मुष्टि में लेकर उससे मस्तक से पाद पर्यन्त स्नान करना चाहिये।॥३७॥ ईशान मन्त्र से मस्तक पर पांच बार यत्नपूर्वक भस्म डाले, तत्पुरुष मन्त्र से मुख पर चार बार और अघोर मन्त्र से हृदय पर आठ बार भस्म डाले।॥३८॥ वामदेव मन्त्र से तेरह बार गुह्य देश पर भस्म डाले और तब सद्योजात मन्त्र से आठ बार पैर पर भस्म का यत्नपूर्वक उद्धूलन[13] करके तत्पश्चात् पुनः पंचब्रह्म मन्त्र से एक साथ सारे शरीर पर भस्म को डालकर भस्मस्नान की विधि को सम्पन्न करे।॥३९॥

उद्धूलन, अवगुण्ठन और त्रिपुण्ड्र के भेद से भस्म धारण की तीन विधियां विख्यात है।॥४०॥ पंचब्रह्म मन्त्रों से अथवा पंचाक्षर मन्त्र से अभिमन्त्रित कर बिना जल की भस्म को पैर से लेकर सिर तक सारे शरीर पर लगाना ही उद्धूलन कहलाता है।॥४१॥ अभिमन्त्रित भस्म का जल के साथ अनुलेपन करना अवगुण्ठन कहलाता

१३. भस्मधारण की तीन विधियां हैं— भस्मस्नान, भस्मोद्धूलन और त्रिपुण्ड्र धारण। भस्मस्नान में वाम हस्त पर भस्म लेकर उसे दाहिने हाथ से चुटकी के सहारे मस्तक से लेकर शरीर के विभिन्न अंगों पर डाला जाता है। उद्धूलन में शरीर के विभिन्न अंगों पर पड़े भस्मकणों को वहीं मला जाता है। त्रिपुण्ड्र धारण की विधि तो सर्वत्र प्रसिद्ध है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पञ्चभिर्ब्रह्मभिर्वाऽपि मूलमन्त्रेण वा पुनः ।
सम्मन्त्र्य निर्जलं भस्म तेन लिम्पेत् सुसंयतः ॥
सर्वाङ्गमापादशिखमुद्धूलनमिदं स्मृतम् ॥४१॥
भस्मना मन्त्रितेनैव सजलेनानुलेपनम् ।
अवगुण्ठनमाख्यातं त्रिपुण्ड्रमथ कथ्यते ॥४२॥

त्रिपुण्ड्रधारणद्वात्रिंशत्स्थानानि

त्रिपुण्ड्रं कारयेद्धीमान् ब्रह्मविष्णुशिवात्मकम् ।
मध्याङ्गुलिभिरादाय त्रिसृभिर्मूलमन्त्रितम् ॥४३॥
द्वात्रिंशत्स्थानके वाथ षोडशस्थानकेऽथवा ।
अष्टस्थाने तथा चैवं पञ्चस्थाने च योजयेत् ॥४४॥
उत्तमाङ्गे ललाटे च कर्णयोर्नेत्रयोर्द्वयोः ।
नासावक्त्रगलेष्वेवमंसद्वयम् अनन्तरम् ॥४५॥
कूर्परे मणिबन्धे च हृदये पार्श्वयोर्द्वयोः ।
नाभौ गुह्यद्वये चैव ऊर्वोः स्फिग्बिम्बजानुषु ॥
जङ्घाद्वये पादयोश्च द्वात्रिंशत् स्थानमुत्तमम् ॥४६॥
अष्टमूर्त्यष्टविद्येशदिक्पालवसवोऽधिपाः ।
एतेषां नाममात्रेण त्रिपुण्ड्रं धारयेद् बुधः ॥४७॥

है। इसके बाद त्रिपुण्ड्र का स्वरूप कहा जा रहा है।॥४२॥

त्रिपुण्ड्र की तीन रेखाएं ब्रह्मा, विष्णु और शिवमय हैं। मध्य की तीन अंगुलियों से पंचाक्षर मन्त्र से अभिमन्त्रित भस्म लगानी चाहिये।॥४३॥ ३२ स्थानों पर, १६ स्थानों पर, आठ स्थानों पर अथवा पांच स्थानों पर त्रिपुण्ड्र धारण करना चाहिये।॥४४॥ उत्तमांग (सिर) पर, ललाट पर, दोनों कानों और नेत्रों पर, दोनों नासिका, मुख और गले पर तथा बाद में दोनों कन्धों पर, कोहनियों पर, कलाईयों पर, हृदय और दोनों पसलियों पर, नाभि पर, गुदा पर और लिंग पर, दोनों नितम्बों पर, दोनों जांघों पर, दोनों घुटनों पर, पिंडलियों पर और चरणों पर इन ३२ स्थानों पर त्रिपुण्ड्र धारण करना उत्तम पक्ष है।॥४५-४६॥ इन बत्तीस स्थानों के [१४]अष्टमूर्ति शिव, [१५]आठ विद्येश,

---

१४. अष्टमूर्ति शिव के आठ नाम महिम्नस्तोत्र में इस प्रकार हैं—"भवः शर्वो रुद्रः पशुपतिरथोग्रः सह महांस्तथा भीमेशानाविति यदभिधानाष्टकमिदम्" (श्लो० २८)। सिद्धान्तशिखामणि (१०.४८-५४) के अष्टमूर्तिनिरसन स्थल में शिव की आठ मूर्तियों (पंचभूत, चन्द्र, सूर्य और यजमान) की चर्चा है। उन्हीं के ये नाम हैं।

१५. प्रथम पटल की पहली टिप्पणी देखिये ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

षोडशस्थानानि

विदध्यात् षोडशस्थाने त्रिपुण्ड्रं च समाहितः ।
शीर्षके च ललाटे च कर्णे चांसद्वयेऽपि च ॥४८॥
कूर्परे मणिबन्धे च हृदये नाभिपार्श्वयोः ।
पृष्ठे चैवं प्रतिष्ठायां जपेत् तत्राधिदैवतम् ॥४९॥
शिवं शक्तिं च सादाख्यमीशं रुद्राख्यमेव च ।
नासत्यो दस्रकश्चैवमश्विनौ द्वौ समीरितौ ॥
वामादिनवशक्तीश्च एताः षोडश देवताः ॥५०॥
अथवा मूर्ध्नि वक्त्रे च कर्णयोर्घ्राणके तथा ।
बाहुद्वये च हृदये नाभ्यामूर्वोर्युगे तथा ॥
जानुद्वये च पदयोः पृष्ठभागे च षोडश ॥५१॥
शिवः स्कन्दश्च चन्द्रार्कौ विघ्नेशो विष्णुरेव च ।
श्रीश्चैव हृदये तद्वत् तथा नाभौ प्रजापतिः ॥५२॥

---

[१६]आठ दिक्पाल और [१७]आठ वसु अधिपति (देवता) माने जाते हैं। इनके नामों का उच्चारण करते हुए विद्वान् साधक को त्रिपुण्ड्र धारण करना चाहिये।।४७।।

इसी तरह से सोलह स्थानों पर भी सावधानी से त्रिपुण्ड्र धारण किया जाता है। वे स्थान हैं — शिर, ललाट, दोनों कान, दोनों कन्धे, दोनों कोहनी, दोनों कलाई, हृदय, नाभि, उभय पार्श्व, पृष्ठ भाग और प्रतिष्ठा (नितम्ब)। इन सोलह स्थानों के देवताओं के नाम इस प्रकार हैं — शिव, शक्ति, सदाशिव, ईश्वर, रुद्र, नासत्य और दस्र नामक दोनों अश्विनीकुमार और वामा[१८] आदि नौ शक्तियां । उक्त सोलह स्थानों पर त्रिपुण्ड्र लगाते समय इन सोलह देवताओं का ध्यान करना चाहिये।।४८-५०।। अथवा सिर, मुख, दोनों कान, नाक, बाहुद्वय, हृदय, नाभि, जंघायुगल, जानुद्वय और पैरों के साथ पृष्ठ भाग — इन १६ स्थानों पर त्रिपुण्ड्र धारण करे।।५१।। शिव, स्कन्द, चन्द्र, सूर्य, विघ्नेश और विष्णु के अतिरिक्त हृदयस्थान की श्री और नाभि के प्रजापति देवता हैं।।५२।। नागगण, नागकन्याएं, ऋषिगण और ऋषिकन्याएं ऊरुद्वय और

---

१६. प्रथम पटल की सातवीं टिप्पणी देखिये।

१७. प्रथम पटल की बारहवीं टिप्पणी देखिये।

१८. वामा आदि नौ शक्तियों के नाम इस प्रकार हैं — वामा, ज्येष्ठा, रौद्री, काली, कलविकरणी, बलविकरणी, बलप्रमथनी, सर्वभूतदमनी और मनोन्मनी । देखिये — सोमशम्भुपद्धति (कर्मकाण्डक्रमावली), पृ० १९-२०.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नागाश्च नागकन्याश्च ऋषयो ऋषिकन्यकाः ।
पादयोस्तु समुद्राश्च तीर्थं पृष्ठेऽपि च स्मृताः ॥५३॥

अष्टस्थानानि

एवं वा षोडशस्थानमष्टस्थानमथोच्यते ।
शिरः स्थानं ललाटं च कर्णद्वयमनन्तरम् ॥५४॥
अंसयुग्मं च हृदयं नाभिरित्यष्टमं भवेत् ।
ब्रह्मा च ऋषयः सप्त देवताश्च प्रकीर्तिताः ॥५५॥
अथवा निटिलं बाहू हृदयं नाभिरेव च ।
भस्मस्थानानि कथ्यन्ते पञ्चब्रह्माणि देवताः ॥५६॥
यथासंभवमाकुर्याद् देशकालाद्यपेक्षया ।
उद्धूलनेऽप्यशक्तश्चेत् त्रिपुण्ड्रादीनि कारयेत् ॥५७॥

त्रिपुण्ड्रधारणविधिः

ऊर्ध्वपुण्ड्रं भवेत् साम मध्यपुण्ड्रं यजूंषि च ।
अधःपुण्ड्रमृचः साक्षात् तस्मात् पुण्ड्रं त्रियायुषम् ॥५८॥

जानुद्वय के, समुद्र चरणों के और तीर्थ पृष्ठ के देवता माने गये हैं।॥५३॥

इस तरह से सोलह स्थानों के दो पक्ष यहां बताये गये हैं। अब आठ स्थानों का वर्णन किया जा रहा है। वे हैं — शिर:स्थान, ललाट, दोनों कान, दोनों कन्धे, हृदय और नाभि । ब्रह्मा और [१९]सात ऋषि इनके देवता कहे गये हैं।॥५४-५५॥ अथवा ललाट, दोनों बाहु, हृदय, नाभि — इन पांच स्थानों पर त्रिपुण्ड्र धारण किया जाता है। पंचब्रह्म ही इनके अधिपति माने जाते हैं।॥५६॥ भस्म धारण की उक्त तीनों विधियों का देश और काल के अनुसार यथाशक्ति अनुष्ठान करे। जो साधक उद्धूलन क्रिया में असक्त है, उसे त्रिपुण्ड्र आदि का अनुष्ठान करना चाहिये।॥५७॥

त्रिपुण्ड्र कीं ऊर्ध्व रेखा सामवेद का, मध्य रेखा यजुर्वेद का और नीचे की रेखा ऋग्वेद का साक्षात् प्रतिनिधित्व करती हैं, अतः [२०]त्र्यायुष मन्त्र से, जाबालोपनिषद् के [२१]अग्निरिति भस्म इत्यादि सभी मन्त्रों से सभी साधकों को सजल भस्म से उद्धूलन

---

१९. पुराणों के अनुसार प्रत्येक मन्वन्तर के सप्तर्षि भिन्न भिन्न होते हैं । वर्तमान वैवस्वत मन्वन्तर के सात ऋषि ये हैं — वसिष्ठ, कश्यप, अत्रि, जमदग्नि, गौतम, विश्वामित्र एवं भारद्वाज ।

२०. "त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् । यद् देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम्॥" (माध्य.३.६२)

२१. "अग्निरिति भस्म। वायुरिति भस्म। जलमिति भस्म। स्थलमिति भस्म। व्योम इति भस्म। सर्वं वा इदं भस्म" (भस्मजाबालोपनिषद्, १.३)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अग्निरित्यादिभिर्मन्त्रैर्जाबालोपनिषद्गतैः ।
सर्वैरुद्धूलनं कार्यं भस्मना सजलेन च ॥५९॥
त्रियायुषेण मन्त्रेण बुधैस्तिर्यक्त्रिपुण्ड्रकम् ।
धार्यं सदा द्विजश्रेष्ठैर्धार्मिकैर्वेदपारगैः ॥६०॥
मेधावीत्यादिना वाऽपि ब्रह्मचारी दिने दिने ।
भस्मना सजलेनैव धारयेच्च त्रिपुण्ड्रकम् ॥६१॥
त्रियम्बकेन मन्त्रेण प्रणवेन शिवेन च ।
गृहस्थश्च वनस्थश्च धारयेच्च त्रिपुण्ड्रकम् ॥६२॥
ॐकारेण त्रिरुक्तेन सहंसेन त्रिपुण्ड्रकम् ।
धारयेद् भिक्षुको नित्यमित्येतच्छिवशासनम् ॥६३॥

भस्ममहिमा

भस्म ज्योतिः समाम्नातमवश्यं तस्य धारणात् ।
संसारसागरं तीर्त्वा कैवल्यफलमश्नुते ॥६४॥
भस्मसंधारणादेव सर्वतीर्थफलं भवेत् ।
भस्मसंधारणात् सर्वं भस्मीभवति किल्बिषम् ॥६५॥
भस्मेदं शाम्भवं ज्योतिस्तद्ध्यानाद् ध्यात ईश्वरः ।
भस्मसंदर्शनादेव शिवदर्शनमश्नुते ॥६६॥

करना चाहिये॥५८-५९॥ द्विजश्रेष्ठ, धार्मिक, वेदों में पारंगत विद्वानों को त्र्यायुष मन्त्र से सदा तिर्यक् त्रिपुण्ड्र धारण करना चाहिये॥६०॥ ब्रह्मचारी को चाहिये कि वह 'मेधावी'[२२] इत्यादि मन्त्र से प्रतिदिन सजल भस्म से त्रिपुण्ड्र धारण करे॥६१॥ गृहस्थ और वानप्रस्थ को चाहिये कि वह [२३]त्र्यम्बक मन्त्र से, प्रणव मन्त्र से अथवा अव्यक्त मूल मन्त्र से त्रिपुण्ड्र धारण करे॥६२॥ हंस मन्त्र के साथ तीन बार ॐ कार का (ॐ हं सः) उच्चारण करते हुए भिक्षुक नित्य त्रिपुण्ड्र धारण करे, यही शिवशास्त्र का विधान है॥६३॥

शास्त्रों में भस्म का ज्योति के रूप में वर्णन है। उसके धारण से साधक अवश्य ही संसार सागर से उत्तीर्ण होकर कैवल्य फल को प्राप्त करता है॥६४॥ केवल भस्म को धारण से ही सभी तीर्थों की यात्रा का फल प्राप्त हो जाता है। भस्म को धारण करने मात्र से सारे पाप भस्म हो जाते हैं॥६५॥ यह भस्म भगवान् शम्भु की साक्षात्

२२. "मह्यं मेधां वद मह्यं श्रियं वद। मेधावी भूयासमजराजरिष्णु॥" (ऋ.खिल. १०. १५१।६)।
२३. 'त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्॥" (तै. सं. १/८/६/२)।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भूतप्रेतपिशाचाश्च महारोगाश्च दुस्सहाः ।
भस्मदर्शनमात्रेण पलायन्ते न संशयः ॥६७॥
भूतविद्रावणे पापसंहृतौ मुक्तिसाधने ।
न भस्मनोऽन्यत् सदृशमित्येतच्छिवशासनम् ॥६८॥
भस्मनो महिमाऽगण्यस्तं वक्तुं केन शक्यते ।
तथापि कश्चिद् गदितः किमन्यच्छ्रोतुमिच्छसि ॥६९॥

*इति श्रीचन्द्रज्ञानागमे उत्तरभागेऽनन्तरुद्रबृहस्पति–
संवादे शिवशासने क्रियापादे भस्मस्वरूप–
निरूपणं नाम षष्ठः पटलः ॥६॥*

ज्योति है। इसका ध्यान करने से शिव का ध्यान अपने आप हो जाता है। इसका दर्शन करने से शिव के दर्शन का फल प्राप्त होता है॥६६॥ भूत, प्रेत, पिशाच और दुःसह महारोग—ये सब भस्म को देखते ही भाग खड़े होते हैं, इसमें कोई सन्देह नहीं है॥६७॥ भूतों को भगा देने में, पापों का नाश करने में और मुक्ति की प्राप्ति के साधनों में भस्म से बढ कर दूसरा कोई उपाय नहीं है, यही शिव का आदेश है॥६८॥ भस्म की महिमा अपार है। उसको गिना नहीं जा सकता। तो भी मैंने तुम्हें उसकी थोड़ी सी महिमा सुनाई है। अब आगे तुम क्या सुनना चाहते हो॥६९॥

इस प्रकार अनन्तरुद्र और बृहस्पति के संवाद के रूप में प्रस्तुत इस चन्द्रज्ञानागम के उत्तर भाग क्रियापाद का भस्म के स्वरूप का निरूपण करने वाला यह छठा पटल समाप्त हुआ॥६॥

❋ ❋ ❋

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सप्तमः पटलः

बृहस्पतिरुवाच

अपारमहिमाधार करुणाभरणोज्ज्वल ।
धन्योऽस्मि भस्मनोऽचिन्त्यमहिम्नः परिवेदनात् ॥१॥
रुद्राक्ष महिमानं च विबोध्य कृपया विभो ।
शिष्यं मामनुगृह्णीष्व सुरासुरनमस्कृत ॥२॥

अनन्तरुद्र उवाच

रुद्राक्षस्वरूपं महिमा च

गीष्पते ते प्रवक्ष्यामि रुद्राक्षाणां यथोदयम् ।
धारणं महिमानं च शृणुष्वैकाग्रमानसः ॥३॥

रुद्राक्षोत्पत्तिः

त्रिपुराणां वधार्थाय विभुना शम्भुना पुरा ।
उन्मीलितानि चक्षूंषि दिव्यं वर्षसहस्त्रकम् ॥४॥
उभाभ्यां चारुपक्ष्मभ्यां पतिता जलबिन्दवः ।
त एव बिन्दवो जाता महारुद्राक्षवृक्षकाः ॥
स्थावरत्वम् अनुप्रापुर्भक्तानुग्रहकारणात् ॥५॥

बृहस्पति प्रश्न करते हैं—

हे अपार महिमा के आधार, करुणा रूपी आभरण (अलंकार) से सुशोभित अनन्तरुद्र देव! भस्म की अचिन्त्य महिमा को जानकर मैं धन्य हो गया हूँ॥१॥ हे सुरों और असुरों के द्वारा नमस्कृत स्वामी! आप मुझ शिष्य को रुद्राक्ष की महिमा बताकर अनुगृहीत कीजिये॥२॥

अनन्तरुद्र उत्तर देते हैं—

हे बृहस्पति! रुद्राक्ष की उत्पत्ति कैसे हुई, उसको धारण करने की विधि क्या है और उसकी महिमा कैसी है? यह सब मैं तुमको बताता हूँ। तुम सावधान होकर एकाग्र चित्त से उसे सुनो॥३॥

प्राचीन काल की बात है कि [1]त्रिपुर का संहार करने के लिये सर्वव्यापी भगवान् शिव ने एक हजार वर्ष तक बिना पलक छपकाये उन त्रिपुरों के मिलन के क्षण को देखते रहे ॥४॥ ऐसी अवस्था में दोनों आखों से आँसू टपकने लगे। इन अश्रु बिन्दुओं

---

१. त्रिपुरसंहार की कथा शिवपुराण की द्वितीय रुद्रसंहिता के पंचम युद्ध खण्ड के १-१२ अध्यायों में विस्तार से वर्णित है ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रुद्राक्षमहिमा

श्रोत्रियाय सवत्साया धेनोर्दानेन यत्फलम् ।
तत्फलं लक्षगुणितं दर्शनाल्लभते नरः ॥६॥
पुनस्तु कोटिगुणितं फलं तत्स्पर्शनाद् भवेत् ।
तस्य कोटिशतं पुण्यं लभते धारणान्नरः ॥७॥
लक्षकोटिसहस्राणि लक्षकोटिशतानि च ।
तज्जपाल्लभते पुण्यं रुद्राक्षैर्भक्तिमान्नरः ॥८॥

रुद्राक्षभेदाः

रुद्राक्षाणां तु सद्भक्त्या धारणे स्यान्महाफलम् ।
धात्रीफलप्रमाणं तु श्रेष्ठमेतदुदाहृतम् ॥९॥
बदरीफलमात्रं तु मध्यमं प्रोच्यते बुधैः ।
अधमं चणमात्रं स्यादिति विद्धि बृहस्पते ॥१०॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चेति शिवाज्ञया ।
वृक्षा जाताः पृथिव्यां तु तज्जातीयाः शुभाक्षकाः ॥११॥
श्वेतास्तु ब्राह्मणा ज्ञेयाः क्षत्रिया रक्तवर्णकाः ।
पीता वैश्यास्तु विज्ञेयाः कृष्णाः शूद्रा उदाहृताः ॥१२॥

से ही रुद्राक्ष के वृक्ष उत्पन्न हो गये, भक्तों पर अनुग्रह करने के लिये इन्होंने स्थावर रूप धारण कर लिया।।५।।

श्रोत्रिय विद्वान् को सवत्सा गौ के दान का जो फल होता है, उससे लाखों गुना बढकर पुण्य रुद्राक्ष के दर्शन मात्र से मनुष्य को मिल जाता है।।६।। इससे भी बढकर कोटिगुणित फल रुद्राक्ष का स्पर्श करने पर मिलता है और इसका शतकोटि बढ कर पुण्य उनके धारण करने से मनुष्य को प्राप्त होता है।।७।। भक्तिमान् पुरुष को इससे भी बढ कर लक्षकोटिशत और शतलक्षकोटिसहस्र गुणित पुण्य रुद्राक्ष की माला से जप करने से मिलता है।।८।।

सच्ची भक्ति से जो भक्त रुद्राक्ष को धारण करता है, उसे महान् पुण्य की प्राप्ति होती है। धात्रीफल (आँवला) के आकार वाले रुद्राक्ष श्रेष्ठ माने जाते हैं।।९।। बदरीफल (बेर) के बराबर प्रमाण (आकार) वाले रुद्राक्ष मध्यम कोटि के माने जाते हैं और चने के बराबर आकार वाले अधम, ऐसा विद्वानों का कहना है। हे बृहस्पति! इस बात को तुम ठीक से जान लो।।१०।। शिव की आज्ञा के अनुसार ब्राह्मण, क्षत्रिय, वैश्य और शूद्र जाति के रुद्राक्ष के वृक्ष पृथ्वी पर उत्पन्न हुए हैं। इन वृक्षों से उसी जाति के रुद्राक्ष उत्पन्न होते हैं।।११।। इनमें श्वेत वर्ण के ब्राह्मण, रक्त वर्ण के क्षत्रिय,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ब्राह्मणो बिभृयाच्छ्वेतान् रक्तान् राजा तु धारयेत् ।
पीतान् वैश्यस्तु बिभृयात् कृष्णान् शूद्रस्तु धारयेत् ॥१३॥

वर्ज्या रुद्राक्षाः

ताम्राः स्निग्धा दृढाः स्थूलाः कण्टकैः संयुताः शुभाः ।
क्रिमिदष्टं छिन्नभिन्नं कण्टकैर्हीनमेव च ॥
व्रणयुक्तमवृत्तं च षड् रुद्राक्षान् विवर्जयेत् ॥१४॥

उत्तमादिभेदाः

स्वयमेव कृतद्वारं रुद्राक्षं स्यादिहोत्तमम् ।
यत्तु पौरुषयत्नेन कृतं तन्मध्यमं भवेत् ॥१५॥
समान् स्निग्धान् दृढान् वृत्तान् क्षौमसूत्रेण धारयेत् ।
सर्वगात्रेण साम्येन सामान्यानि विचक्षणः ॥१६॥
निकषे हेमरेखेव यस्य रेखा प्रदृश्यते ।
तदक्षमुत्तमं विद्यात् तद्धार्यं शिवपूजकैः ॥१७॥

रुद्राक्षधारणस्थलानि संख्या च

शिखायामेकरुद्राक्षं त्रिंशत्तु शिरसा वहेत् ।
द्वात्रिंशत्तु गले दद्याद् बाह्वोः षोडश षोडश ॥१८॥

पीत वर्ण के वैश्य और कृष्ण वर्ण के रुद्राक्ष शूद्र कहे गये हैं॥१२॥ ब्राह्मण को श्वेत रुद्राक्ष, राजा को रक्त रुद्राक्ष, वैश्य को पीत रुद्राक्ष और शूद्र को कृष्ण रुद्राक्ष धारण करना चाहिये॥१३॥

ताम्र वर्ण के, चिकने, मजबूत, आकार में बड़े और कंटकों से संयुक्त रुद्राक्ष शुभ माने जाते हैं। इसके विपरीत कीड़ों के द्वारा खाये गये, छिन्न-भिन्न, कंटकों से रहित, व्रण से युक्त और बेडौल आकार के—इन छः प्रकार के रुद्राक्षों को उपयोग में नहीं लाना चाहिये॥१४॥

अपने आप जिसमें सूत्र पिरोने का द्वार बन गया है, वह रुद्राक्ष श्रेष्ठ माना जाता है। पुरुष के प्रयत्न से जिसमें छिद्र किया जाता है, वह रुद्राक्ष मध्यम माना जाता है॥१५॥ समान आकार के, चिकने, मजबूत और गोलाकार रुद्राक्ष के दानों को रेशम के डोरे में पिरोकर विद्वान् साधक पहने। सामान्य रूप से सब कोई समान रूप से इनको धारण कर सकते हैं॥१६॥ कसौटी के पत्थर पर सुवर्ण की रेखा के समान जिसकी रेखा दिखाई पड़ती है, वह रुद्राक्ष उत्तम माना जाता है। शिव के उपासकों को उसी को धारण करना चाहिये॥१७॥

शिखा में एक रुद्राक्ष धारण करे, सिर पर तीस, गले में बत्तीस और दोनों बाहुओं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

द्वादशं मणिबन्धे च स्कन्धे पञ्चशतं वहेत् ।
अष्टोत्तरशतैर्मालां जपयज्ञे प्रकल्पयेत् ॥१९॥
द्विसरं त्रिसरं वाऽपि सराणां पञ्चकं तु वा ।
सराणां सप्तकं वाऽपि बिभृयात् कण्ठदेशतः ॥२०॥
मकुटे कुण्डले चैव कर्णिकाहारकेषु च ।
केयूरे कटके चैव कुक्षिबन्धे विशेषतः ॥
सुप्ते पीते सदा कालं रुद्राक्षान् धारयेन्नरः ॥२१॥
त्रिशतं त्वधमं पञ्चशतं मध्यममुच्यते ।
सहस्रमुत्तमं प्रोक्तमेवं भेदेन धारयेत् ॥२२॥

मन्त्रपुरस्सरं रुद्राक्षधारणम्

शिरसीशानमन्त्रेण कण्ठे तत्पुरुषेण च ।
अघोराख्येन मन्त्रेण करयोर्धारयेत् सुधीः ॥
पञ्चाशदक्षसहितां व्योमव्यापीति चोदरे ॥२३॥

में सोलह-सोलह रुद्राक्ष धारण करने चाहिये॥१८॥ मणिबन्ध (बाजू) में बारह और कन्धे पर पांच सौ रुद्राक्ष धारण करे। जपयज्ञ के लिये १०८ रुद्राक्षों की माला बनावे॥१९॥ दो लड़ी की, तीन लड़ी की अथवा पांच लड़ी की और सात लड़ी की माला कंठदेश में धारण करे॥२०॥ मनुष्य को चाहिये कि वह अपने मुकुट, कुण्डल, कर्णफूल, हार, केयूर और कटक के रूप में, विशेष कर कुक्षिबन्ध (करधनी) के रूप में सोते-जागते, खाते-पीते सभी अवस्थाओं में रुद्राक्षों को धारण करे॥२१॥ तीन सौ रुद्राक्ष धारण करना अधम, पांच सौ धारण करना मध्यम और एक सहस्र रुद्राक्ष धारण करना उत्तम पक्ष है। तदनुसार ही रुद्राक्षों को धारण करे॥२२॥

विद्वान् व्यक्ति को चाहिये कि वह सिर पर ईशान मन्त्र से, कण्ठ में तत्पुरुष मन्त्र से दोनों हाथों में अघोर मन्त्र से रुद्राक्ष धारण करे और व्योमव्यापी मन्त्र से पचास दानों वाली माला उदर पर धारण करे॥२३॥ [२]पंचब्रह्म मन्त्रों से और [३]षडंग मन्त्रों

---

२. सद्योजात, वामदेव, अघोर, तत्पुरुष और ईशान नामक पाँच मन्त्र (सद्योजातं प्रपद्यामि इत्यादि) शैव शास्त्रों में पंचब्रह्म के नाम से प्रसिद्ध हैं ।

३. "ॐ हृदयाय नमः" इत्यादि छः अंग मन्त्र हैं । प्रपंचसार में इनका इस प्रकार वर्णन मिलता है—"हृदयशिरसोः शिखायां कवचाक्ष्यस्त्रेषु सह चतुर्थीषु । नत्या हुत्या च वषड्-हुँ-वौषट्-फट्पदैः षडङ्गविधिः ॥" (६।६)। सिद्धान्त शैवशास्त्र के ग्रन्थों मे मन्त्रों की संख्या ११ बताई गई है। वहां इन्हीं पांच ब्रह्म-मन्त्रों तथा षडंग-मन्त्रों से यह संख्या पूरी होती है। देखिये—अष्टप्रकरण में स्थित रत्नत्रय (श्लो० ९१-११९)।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पञ्चब्रह्मभिरङ्गैश्च त्रिमाला पञ्च सप्त च ।
अथवा मूलमन्त्रेण सर्वाण्यक्षाणि धारयेत् ॥२४॥

मुखभेदेन रुद्राक्षमहिमा

एकवक्त्रं तु रुद्राक्षं परतत्त्वस्वरूपकम् ।
तद्धारणात् परे तत्त्वे लीयते विजितेन्द्रियः ॥२५॥
द्विवक्त्रं चैव रुद्राक्षमर्धनारीश्वरात्मकम् ।
धारणादर्धनारीशः प्रीयते तस्य नित्यशः ॥२६॥
त्रिवक्त्रमनलः साक्षात् स्त्रीहत्यां दहति क्षणात् ।
त्रिमुखं चैव रुद्राक्षमग्नित्रयमुदाहृतम् ॥
तद्धारणेन हुतभुक् तुष्यति स्फुटकामदः ॥२७॥
चतुर्मुखं तु रुद्राक्षं ब्रह्मरूपमुदाहृतम् ।
पञ्चवक्त्रं तु रुद्राक्षं पञ्चब्रह्मस्वरूपकम् ॥२८॥
पञ्चवक्त्रं स्वयं ब्रह्म ब्रह्महत्यां व्यपोहति ।
तस्य धारणमात्रेण संतुष्यति सदाशिवः ॥२९॥
षड्वक्त्रं तु रुद्राक्षं कार्तिकेयाधिदैवतम् ।
विनायकाधिदैवं च दत्तेऽविघ्नं श्रियं वराम् ॥३०॥

से तीन, पांच अथवा सात माला धारण करे अथवा मूल पंचाक्षरी मन्त्र से सभी रुद्राक्षों को धारण करना चाहिये॥२४॥

एक मुख वाला रुद्राक्ष साक्षात् पर तत्त्व (परब्रह्म या परशिव) ही है। उसको धारण करने से जितेन्द्रिय व्यक्ति परम तत्त्व में लीन हो जाता है॥२५॥ दो मुख वाला रुद्राक्ष साक्षात् अर्धनारीश्वर स्वरूप है। उसको नित्य धारण करने से भगवान् अर्धनारीश्वर प्रसन्न होते हैं॥२६॥ तीन मुख वाला रुद्राक्ष साक्षात् अग्निस्वरूप है। इसके धारण करने से स्त्रीहत्या का पाप तत्क्षण नष्ट हो जाता है। तीन मुख का रुद्राक्ष तीन अग्नियों (दक्षिणाग्नि, गार्हपत्य और आहवनीय) का स्वरूप माना गया है। इसको धारण करने से अग्नि देवता प्रसन्न होकर धारक की कामना पूरी करते हैं॥२७॥ चतुर्मुख रुद्राक्ष ब्रह्मा का स्वरूप तथा पांच मुख की रुद्राक्ष पंचब्रह्म स्वरूप माना गया है॥२८॥ पांच मुख वाला रुद्राक्ष स्वयं ब्रह्मस्वरूप ही है। इसको धारण करने से ब्रह्महत्या का पाप दूर हो जाता है। भगवान् सदाशिव इसके धारण करने मात्र से सन्तुष्ट हो जाते हैं॥२९॥ छः मुख वाले रुद्राक्ष के देवता कार्तिकेय एवं विनायक हैं। इसको धारण करने से कोई विघ्न पास में नहीं आता और श्रेष्ठ लक्ष्मी प्राप्त होती है॥३०॥ सात मुख वाले रुद्राक्ष की देवता ब्राह्मी, वैष्णवी आदि सात मातृकाएं हैं। सात मातृकाएं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सप्तवक्त्रं तु रुद्राक्षं सप्तमात्रधिदैवतम् ।
तद्धारणेन सुप्रीता जयं ददति मातरः ॥३१॥
अष्टवक्त्रं तु रुद्राक्षं दिगधीशाधिदैवतम् ।
वस्वष्टकप्रियं चैव गङ्गाप्रीतिकरं शुभम् ॥
तद्धारणादिमे प्रीता ददते तस्य वाञ्छितम् ॥३२॥
नववक्त्रं तु रुद्राक्षं नवशक्त्यधिदैवतम् ।
तस्य धारणमात्रेण प्रीयन्ते नवशक्तयः ॥३३॥
दशवक्त्रं तु रुद्राक्षं यमदैवमुदाहृतम् ।
तथाऽस्य प्रीतिजनकं धारणे नात्र संशयः ॥३४॥
एकादशमुखं चाक्षं रुद्रैकादशदैवतम् ।
तदिन्द्रदैवतं प्रोक्तं सदा सौभाग्यवर्धनम् ॥३५॥
रुद्राक्षं द्वादशमुखं महाविष्णुस्वरूपकम् ।
द्वादशादित्यदैवं च देवताप्रीतिवर्धनम् ॥३६॥
त्रयोदशमुखं चाक्षं कामदं शुद्धिदं शुभम् ।
तस्य धारणमात्रेण कामदेवः प्रसीदति ॥३७॥

इसको धारण करने वाले के ऊपर प्रसन्न होकर सर्वत्र विजय प्राप्त कराती हैं॥३१॥ आठ मुख का रुद्राक्ष [४]दिक्पाल देवता स्वरूप है। आठ वसुओं को और गंगा को भी यह शुभ रुद्राक्ष प्रिय है। इसको धारण करने से सब देवता प्रसन्न होकर धारक की वांछित कामना पूरी करते हैं॥३२॥ नौ मुख के रुद्राक्ष के अधिपति देवता [५]वामा आदि नौ शक्तियां हैं। इसको धारण करने मात्र से ये नौ शक्तियां प्रसन्न हो उठती हैं॥३३॥ दस मुख के रुद्राक्ष के देवता यम हैं। इसको धारण करने से यमराज प्रसन्न होते हैं, इसमें कोई संशय नहीं है॥३४॥ ग्यारह मुख का रुद्राक्ष [६]एकादश रुद्रों का स्वरूप है। इसके देवता इन्द्र हैं। इसको धारण करने से सदा सौभाग्य की वृद्धि होती है॥३५॥ बारह मुख का रुद्राक्ष महाविष्णु का स्वरूप है । बारह आदित्य [७] इसके देवता हैं। यह इन देवताओं की प्रीति को बढाता है॥३६॥ तेरह मुख का रुद्राक्ष सभी कामनाओं को देने वाला, पवित्रता को देने वाला और शुभकारी है। इसके धारण करने मात्र से कामदेव प्रसन्न हो उठते हैं॥३७॥ चौदह मुख का रुद्राक्ष रुद्र के नेत्रों से उत्पन्न हुआ है। यह सभी प्रकार की व्याधियों को दूर करने वाला और सदा आरोग्य को

४. आठ दिक्पालों के नाम प्रथम पटल की ७ वीं टिप्पणी में देखिये ।

५. षष्ठ पटल की १८ वीं टिप्पणी देखिये ।

६. एकादश रुद्रों की नामावली प्रथम पटल १३वीं टिप्पणी में देखिये ।

७. बारह आदित्यों की नामावली प्रथम पटल की ११वीं टिप्पणी में देखिये ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चतुर्दशमुखं चाक्षं रुद्रनेत्रसमुद्भवम् ।
सर्वव्याधिहरं चैव सदारोग्यमवाप्नुयात् ॥३८॥
तन्मुखं रुद्रमित्याहुस्तद्बिन्दुः सर्वदेवताः ।
रुद्राक्षधारणात् सद्यः सर्वपापैः प्रमुच्यते ॥३९॥

संख्यानिरूपणम्

रुद्राक्षधारणं पुण्यं केन वा सदृशं भवेत् ।
सहस्रं धारयेद् यस्तु रुद्राक्षाणां धृतव्रतः ॥
सुरासुरा नमन्त्येनं यथा रुद्रस्तथैव सः ॥४०॥
अभावे तु सहस्रस्य बाह्वोः षोडश षोडश ।
एकं शिखायां करयोर्द्वादश द्वादश द्वयोः ॥४१॥
द्वात्रिंशत् कण्ठदेशे तु प्रत्येकं कर्णयोश्च षट् ।
उरस्यष्टोत्तरशतं चत्वारिंशच्च मस्तके ॥
धारयेद् यस्तु रुद्राक्षं रुद्रवत् पूज्यते सदा ॥४२॥

मुक्तादिना सह रुद्राक्षधारणम्

मुक्ताप्रवालस्फटिकरौप्यवैडूर्यकाञ्चनैः ।
धारयेद् यस्तु रुद्राक्षान् स रुद्रो नात्र संशयः ॥४३॥
केवलं वाऽपि रुद्राक्षान् रुद्रमुद्रान् बिभर्ति यः ।
तं न स्पृशन्ति पापानि तमांसीव विभावसुम् ॥४४॥

देने वाला है॥३८॥ रुद्राक्ष का मुख रुद्रस्वरूप है और उस पर विद्यमान बिन्दुओं में सारे देवता निवास करते हैं। ऐसे रुद्राक्ष को धारण करने से व्यक्ति तत्काल सभी पापों से मुक्त हो जाता है॥३९॥

रुद्राक्ष को धारण करने से जो पुण्य होता है, उसकी बराबरी कौन कर सकता है? अर्थात् उसकी बराबरी का दूसरा कोई पुण्यकर्म नहीं है। जो व्यक्ति नियमपूर्वक सहस्र रुद्राक्षों को धारण करता है, उसको सुर और असुर सभी नमन करते हैं। वह साक्षात् रुद्र हो जाता है॥४०॥ एक हजार रुद्राक्षों के अभाव में दोनों भुजाओं में सोलह सोलह, एक शिखा में तथा दोनों हाथों में बारह बारह रुद्राक्ष धारण करे॥४१॥ ३२ रुद्राक्ष कण्ठ देश में, छः छः प्रत्येक कान में, १०८ वक्षस्थल पर और ४० मस्तक पर धारण करे। जो व्यक्ति इस तरह से रुद्राक्ष धारण करता है, वह सदा रुद्र के समान पूजा जाता है॥४२॥

मुक्ता, प्रवाल, स्फटिक, रजत, वैडूर्य और सुवर्ण के साथ जो रुद्राक्षों को धारण करता है, वह साक्षात् रुद्र ही है, इसमें कोई संशय नहीं है॥४३॥ साक्षात्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रुद्राक्षमहिमा

रुद्राक्षमालया जप्तो मन्त्रोऽनन्तफलप्रदः ।
अरुद्राक्षजपः पुंसां तावन्मात्रफलप्रदः ॥४५॥
यस्याङ्गे नास्ति रुद्राक्ष एकोऽपि बहुपुण्यदः ।
तस्य जन्म निरर्थं स्यात् त्रिपुण्ड्ररहितं यथा ॥४६॥
मूर्ध्नि विन्यस्य रुद्राक्षं यः स्नाति मतिमान्नरः ।
गङ्गास्नानफलं तस्य जायते नात्र संशयः ॥४७॥
पूजयेद्यस्तु रुद्राक्षं कृत्वा तोयाभिषेचनम् ।
यत्फलं लिङ्गपूजायां तदेवाप्नोति निश्चितम् ॥४८॥
रुद्राक्षमहिमाऽपारः कश्चिदुक्तो मयाऽनघ ।
गोपनीयः प्रयत्नेन किमतः श्रोतुमिच्छसि ॥४९॥

इति श्रीचन्द्रज्ञानागमे उत्तरभागेऽनन्तरुद्रबृहस्पति-
संवादे शिवशासने क्रियापादे रुद्राक्षस्वरूप-
निरूपणं नाम सप्तमः पटलः॥७॥

रुद्रमुद्रास्वरूप केवल इन रुद्राक्षों को मुक्ता, प्रवाल आदि के बिना जो धारण करता है, उसके पास पाप उसी तरह से नहीं फटकते, जैसे कि भगवान् सूर्य के सामने अन्धकार नहीं आ सकता है॥४४॥

रुद्राक्ष की माला की सहायता से जपा गया मन्त्र अनन्त फल को देने वाला है। पुरुष यदि रुद्राक्ष की माला से जप नहीं करता, तो उसे जप की संख्या के अनुसार ही फल मिलता है॥४५॥ जिस व्यक्ति के शरीर पर अनन्त पुण्य देने वाला एक भी रुद्राक्ष नहीं है, उसका जन्म उसी तरह से निरर्थक हो जाता है, जैसा कि त्रिपुण्ड्र धारण न करने वाले का होता है॥४६॥ जो बुद्धिमान् मनुष्य रुद्राक्ष को सिर पर रख कर स्नान करता है, उसको गंगास्नान का फल मिल जाता है, इसमें कोई संदेह नहीं है॥४७॥ जो व्यक्ति जल से अभिषेक कर रुद्राक्ष का पूजन करता है, उसे निश्चित रूप से लिंगपूजा का फल मिल जाता है॥४८॥ रुद्राक्ष की महिमा तो अपार है । हे निष्पाप बृहस्पति! उसमें से थोड़ा बहुत मैंने तुमको सुनाया है। इसको प्रयत्नपूर्वक गुप्त रखना चाहिये । अब इसके बाद आगे तुम क्या सुनना चाहते हो॥४९॥

इस प्रकार अनन्तरुद्र और बृहस्पति के संवाद के रूप में प्रस्तुत
इस चन्द्रज्ञानागम नामक शिवशास्त्र के क्रियापाद का
रुद्राक्ष के स्वरूप का निरूपण करने वाला
यह सातवाँ पटल समाप्त हुआ॥

❋ ❋ ❋

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अष्टमः पटलः

बृहस्पतिरुवाच

अनुत्तरज्ञाननिधे परानन्दसुधाम्बुधे ।
श्रीमदीयमुखाम्भोजान्मकरन्दमिव सृतम् ॥१॥
महिमानमिहाकर्ण्य रुद्राक्षाणामनुत्तमम् ।
संतृप्तो विवशश्चास्मि धन्योऽस्मि सुरसन्नुत ॥२॥
श्रीमत्पञ्चाक्षरस्यापि विधानं महिमोन्नतिम् ।
उपदिश्य कृपादृष्ट्या विलोक्यानुगृहाण माम् ॥३॥

अनन्तरुद्र उवाच

अधुना ते प्रवक्ष्यामि पञ्चाक्षरमहामनोः ।
स्वरूपं महिमानं च पुरश्चर्याविधिं क्रमात् ॥४॥

पञ्चाक्षरमन्त्रस्वरूपं महिमा च

आदौ नमः प्रयोक्तव्यं शिवायेति ततः परम् ।
सैषा पञ्चाक्षरी विद्या सर्वश्रुतिशिवागता ॥५॥
शब्दजातस्य सर्वस्य बीजभूता समासतः ।
आदौ शिवमुखोद्गीर्णा सा तस्यैवात्मवाचिका ॥६॥

बृहस्पति प्रश्न करते हैं—

हे परमश्रेष्ठ ज्ञान के निधिस्वरूप, परमानन्द सुधा (अमृत) के सागर अनन्तरुद्र देव! आपके मुखरूपी कमल से निकलने वाली मकरन्द के समान रुद्राक्ष की श्रेष्ठ महिमा को सुनकर मैं तृप्त हो गया हूँ। हे सुरों के द्वारा पूजित अनन्तरुद्र! मैं धन्य हो गया हूँ, विवश हो गया हूँ॥१-२॥ श्रीमत् पंचाक्षर मन्त्र का विधान, उसकी महिमा और उसके जप से प्राप्त होने वाली उन्नति को बता कर आप मुझे अनुगृहीत कीजिये॥३॥

अनन्तरुद्र उत्तर देते हैं—

अब मैं तुम्हें पंचाक्षर महामन्त्र का स्वरूप, उसकी महिमा और पुरश्चरण की विधि बताऊँगा॥४॥

प्रथमतः 'नमः' पद को रखना चाहिये, इसके बाद 'शिवाय' पद को। इसी को पंचाक्षर विद्या कहा जाता है। सभी श्रुतियों मे शीर्ष भाग कें इसका स्थान है॥५॥ संक्षेप में यह पंचाक्षरी विद्या सभी प्रकार के शब्दों की जननी है। सृष्टि के प्रारंभ में शिव के मुख से निकली यह विद्या भगवान् शिव के निज स्वरूप का ही बोध कराती है॥६॥ यह पंचाक्षरी विद्या तपे हुए सोने के समान स्वरूप वाली, पीन और उन्नत पयोधरों

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तप्तचामीकरप्रख्या पीनोन्नतपयोधरा ।
चतुर्भुजा त्रिनयना बालेन्दुकृतशेखरा ॥७॥
पद्मोत्पलधरा सौम्या वरदाऽभयपाणिका ।
सर्वलक्षणसंपन्ना सर्वाभरणभूषिता ॥८॥
सिद्धपद्मासनासीना नीलकुञ्चितमूर्धजा ।
इयं प्रणवपूर्वा तु षडक्षरीति कथ्यते ॥९॥

षडक्षरी विद्या

द्विजैरियं तु जप्तव्या नित्यं प्रणवपूर्विका ।
स्त्रीभिः शूद्रैश्च जप्तव्या नमोऽन्ता प्रणवं विना ॥१०॥

ऋष्यादिन्यासः

वामदेव ऋषिश्चास्य पङ्क्तिश्छन्द उदाहृतः ।
देवता स शिवः साक्षात् प्रणवो बीज उच्यते ॥
उमा शक्तिरिति प्रोक्ता न्यासश्चैवं षडक्षरैः ॥११॥

जपविधानम्

ध्यात्वा संपूज्य मनसि बाह्ये वा परमेश्वरम् ।
जपं कुर्यात् प्रयत्नेन ध्यायन् साम्बं त्रियम्बकम् ॥१२॥

वाली, चार भुजा और तीन नयनों वाली है। इसके भाल पर बाल चन्द्रमा विराजमान है।॥७॥ पद्म और उत्पल (नील कमल) धारण करने वाली, सौम्य स्वरूप वाली, वर और अभय मुद्रा धारण करने वाली, सभी लक्षणों से संपन्न और सभी प्रकार के आभूषणों को धारण करने वाली है।॥८॥ यह पंचाक्षरी विद्या सिद्धासन अथवा पद्मासन से विराजमान और नीले घुंघराले बालों वाली है। इसके प्रारंभ में प्रणव (ॐ) को जोड़ने पर यह षडक्षरीविद्या कहलाती है।॥९॥

द्विजों को प्रणव के साथ इसका नित्य जप करना चाहिये। स्त्री और शूद्रों को प्रणव के बिना नमः शब्द को अन्त में रख कर इस पंचाक्षरी विद्या का जप करना चाहिये।॥१०॥

इस मन्त्र के वामदेव ऋषि और छन्द पंक्ति कहा गया है। शिव ही साक्षात् इसके देवता हैं। प्रणव बीज, और उमा शक्ति है। इन्हीं छः अक्षरों से न्यास किया जाता है।॥११॥

मन में अथवा बाहर परमेश्वर का ध्यान-पूजन कर साम्ब सदाशिव का ध्यान करने हुए इस मन्त्र का जप करे।॥१२॥ एक हजार बार, पांच सौ बार अथवा सौ बार मन्त्र का जप करे। जो ऐसा प्रतिदिन करता है, वह साक्षात् शिव ही है, इसमें कोई सन्देह नहीं है।॥१३॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सहस्रं वा तदर्धं वा शतं वाऽथ जपेन्मनुम् ।
एवं यः कुरुते नित्यं स शिवो हि न संशयः ॥१३॥

वर्णादिनिरूपणम्

अस्याः पञ्चविधा वर्णाः प्रस्फुरद्रश्मिमण्डलाः ।
पीतः श्वेतस्तथा रक्तो हरितो नील एव च ॥१४॥
पृथक् प्रोज्या यद्येते बिन्दुनादविभूषिताः ।
अर्धचन्द्राकृतिर्बिन्दुर्नादो दीपशिखाकृतिः ॥१५॥
पञ्चब्रह्ममुखान्याहुः स्थानं तेषां सुरोत्तम ।
पूर्वादि चोर्ध्वपर्यन्तं नकारादि यथाक्रमम् ॥१६॥

नामान्तराणि

[1]मूलं विद्या शिवं चैव सूत्रं पञ्चाक्षरस्तथा ।
नामान्यस्य विजानीयादोङ्कारो हृदयं मतम् ॥१७॥

मन्त्राङ्गानि

नकारः शिर उच्येत मकारस्तु शिखोच्यते ।
शिकारः कवचं तद्वद्वाकारो नेत्रमुच्यते ॥१८॥
यकारोऽस्त्रं नमः स्वाहा वषट् हुं वौषडित्यपि ।
फडित्यपि च वर्णानां मन्त्राङ्गत्वं यथा तथा ॥१९॥

इस विद्या के वर्ण रश्मिमण्डल की आभा को बिखेरते हुए पीत, श्वेत, रक्त, हरित और नील कान्ति वाले हैं॥१४॥ इनका अलग अलग उच्चारण यदि बिन्दु और नाद के साथ किया जाता है, तो उस समय बिन्दु का स्वरूप अर्धचन्द्र की तरह और नाद का दीपशिखा की तरह होता है॥१५॥ हे सुरोत्तम! उस स्थिति में पञ्चब्रह्म के पांच मुखों में इनका स्थान माना गया है। पूर्व मुख से लेकर ऊर्ध्व मुख पर्यन्त नकार आदि की यथाक्रम स्थिति मानी गई है॥१६॥

इस पंचाक्षर मन्त्र के मूल, विद्या, शिव, (शैव) सूत्र, पंचाक्षर ये पांच नाम हैं और ॐ कार इसका हृदय है॥१७॥

इसका नकाराक्षर शिर, मकार शिखा, शिकार कवच और इसी तरह वाकार नेत्र कहा गया है॥१८॥ यकार अक्षर अस्त्र कहा जाता है। नमः, स्वाहा, वषट्, हुँ, वौषट्, फट्—ये छः शब्द भी यथायोग्य योजना के अनुसार मन्त्र के अंग माने जाते हैं॥१९॥ वर्ण, देवता, शक्ति, आधार, छन्द, ऋषि, स्थान, ब्रह्म, आयुध, कला, गुण,

---

१. इस श्लोक का पूर्वार्ध सिद्धान्तशिखामणि (८।२३) में भी उपलब्ध है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वर्णं दैवं तथा शक्तिराधारं छन्द एव च ।
ऋषिः स्थानं ब्रह्म चाथ आयुधं तु तथैव च ॥२०॥
कला गुणश्च चक्रं च प्रकाशः करणं तथा ।
वायुर्ज्ञानेन्द्रियं चैवं षोडशैते क्रमोदिताः ॥२१॥

नकारस्य षोडशरूपता

नकारं पीतवर्णं स्याद् ब्रह्मा तत्राधिदैवतम् ।
सावित्री शक्तिरित्युक्ता चाधारं पृथिवी तथा ॥२२॥
अनुष्टुप्छन्दसा युक्तं वासिष्ठार्षं तथैव हि ।
स्थानं पश्चिमतो वक्त्रं सद्योजातं तु ब्रह्मकम् ॥२३॥
आयुधं वज्रमेवोक्तं कला निवृत्तिरेव च ।
गुणः कठिन एवोक्तःश्चक्रं तु चतुरश्रकम् ॥२४॥
ज्वलदग्नेः प्रकाशस्तु करणं मन एव च ।
प्राणवायुसमायुक्तं घ्राणं ज्ञानेन्द्रियं भवेत् ॥
इत्येवं षोडशानां तु नकाराक्षरमुच्यते ॥२५॥

मकारस्य षोडशरूपता

मकारं जलरूपं च दैवं विष्णुस्तथैव च ।
लक्ष्मीः शक्तिरिति प्रोक्ता चाधारं जलमेव च ॥२६॥
त्रिष्टुप्छन्दः समायुक्तं विश्वामित्र ऋषिस्तथा ।
स्थानमुत्तरतो वक्त्रं ब्रह्म वै वामदेवकम् ॥२७॥

चक्र, प्रकाश, करण, वायु और ज्ञानेन्द्रिय—इन सोलह विषयों का यहां क्रमशः वर्णन किया जा रहा है कि शिवपंचाक्षरी मन्त्र के मकार आदि के साथ ये किस प्रकार संयोजित होते हैं॥२०-२१॥

नकार पीत वर्ण का है। इसके देवता ब्रह्मा हैं। इसकी शक्ति सावित्री मानी गई है। पृथिवी इसका आधार है॥२२॥ इसका छन्द अनुष्टुप् और ऋषि वसिष्ठ हैं। पश्चिम मुख (वक्त्र) इसका स्थान और ब्रह्म सद्योजात नामक है॥२३॥ इसका आयुध वज्र, इसकी कला का नाम निवृत्ति और गुण कठिन माना गया है। चक्र चतुरस्र (चौकोर) आकार का है॥२४॥ इसका प्रकाश जलती हुई अग्नि के समान है। करण मन और वायु प्राण है। ज्ञानेन्द्रिय घ्राण मानी गई है। इस प्रकार नकार नामक अक्षर के ये सोलह विषय यहां वर्णित हैं॥२५॥

मकार का वर्ण जल के समान (श्वेत) है। इसके देवता विष्णु, शक्ति लक्ष्मी और आधार जल कहा गया है॥२६॥ छन्द त्रिष्टुप्, ऋषि विश्वामित्र, स्थान उत्तर वक्त्र

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आयुधं पद्ममेवोक्तं प्रतिष्ठाख्यकलायुतम् ।
गुणस्तु द्रवसंयुक्तश्चक्रमर्धसुधाकरः ॥२८॥
सोमस्यैव प्रकाशश्च करणं बुद्धिरेव च ।
अपानवायुसंयुक्तं जिह्वा ज्ञानेन्द्रियं भवेत् ॥
इत्येवं षोडशानां तु मकाराक्षरमुच्यते ॥२९॥

शिकारस्य षोडशरूपता

शिकारं वह्निरूपं तु रुद्रस्तत्राधिदैवतम् ।
गौरीशक्ति समायुक्तमाधारं चाग्निरेव च ॥३०॥
उष्णिक्छन्द समायुक्तं जमदग्निर्ऋषिस्तथा ।
स्थानं दक्षिणतो वक्त्रमघोरं ब्रह्म चैव हि ॥३१॥
स्वस्तिकायुधमेवोक्तं विद्यानाम कलाऽपि च ।
गुणो दीप्त्यनुसंयुक्तश्चक्रं त्यश्रकमेव च ॥३२॥
तटितां तु प्रकाशश्च करणं त्वहमाकृतिः ।
व्यानवायुसमायुक्तं नेत्रं ज्ञानेन्द्रियं भवेत् ॥
इत्येवं षोडशानां तु शिकाराक्षरमुच्यते ॥३३॥

वाकारस्य षोडशरूपता

वाकारं वायुरूपं स्यादधिदैवतमीश्वरम् ।
अम्बिका स्यान्महाशक्तिर्वायुश्चाधारमेव च ॥३४॥

और ब्रह्म वामदेव नाम के हैं।॥२७॥ आयुध पद्म कहा गया है। कला प्रतिष्ठा नाम की है। इसका गुण द्रव स्वभाव का और चक्र चन्द्रार्ध आकार वाला है॥२८॥ इसका प्रकाश चन्द्रमा के प्रकाश के सदृश है। करण बुद्धि और वायु अपान है। ज्ञानेन्द्रिय जिह्वा मानी गई है। इस प्रकार मकार अक्षर के ये सोलह विषय माने गये हैं॥२९॥

शिकार का वर्ण वह्निसदृश रक्त है। इसके देवता रुद्र, शक्ति गौरी और आधार अग्नि है ॥३०॥ इसका छन्द उष्णिक्, ऋषि जमदग्नि, स्थान दक्षिण वक्त्र और ब्रह्म अघोर है॥३१॥ आयुध स्वस्तिक कहा गया है। कला का नाम विद्या और गुण दीप्ति-संवलित है। चक्र त्र्यक्ष (त्रिकोणाकार) माना गया है॥३२॥ इसका प्रकाश बिजली के जैसा है। करण अहंकार, वायु व्यान और ज्ञानेन्द्रिय नेत्र है। इस प्रकार यह शिकार इन सोलह विषयों से संयुक्त है ॥३३॥

वाकार का वर्ण वायुसदृश हरित, देवता ईश्वर, अम्बिका महाशक्ति और वायु आधार है॥३४॥ इसका छन्द बृहती, ऋषि कश्यप, स्थान पूर्व वक्त्र और ब्रह्म तत्पुरुष है॥३५॥ आयुध बिन्दुस्वरूप, कला शान्ति नामक और गुण स्पर्श कहा गया है। चक्र

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बृहतीच्छन्दसा युक्तं ऋषिः काश्यप एव च ।
स्थानं पूर्वाननं प्रोक्तं ब्रह्म तत्पूरुषं भवेत् ॥३५॥
आयुधं बिन्दुरूपं तु कला शान्तिस्तथैव च ।
गुणः स्पर्श इति प्रोक्तं षडश्रं चक्रमेव च ॥३६॥
प्रकाश इन्द्रनीलस्य चित्तं तु करणं भवेत् ।
उदानवायुसंयुक्तं चर्म ज्ञानेन्द्रियं भवेत् ॥
इत्येवं षोडशानां तु वाकाराक्षरमुच्यते ॥३७॥

यकारस्य षोडशरूपता

यकारं व्योमरूपं तु दैवं चैव सदाशिवः ।
उन्मनी शक्तिरेवोक्ता आधारं व्योम चोच्यते ॥३८॥
जगतीच्छन्दसा युक्तं भरद्वाज ऋषिस्तथा ।
स्थानमूर्ध्वमुखं विद्याद् ब्रह्म चेशानमेव च ॥३९॥
आयुधं चैव शूलं स्याच्छान्त्यतीता कलाऽपि च ।
गुणस्तु शून्य एव स्यात् प्रकाशश्चन्द्रिकामणेः ॥४०॥
करणं प्रकृतिः प्रोक्तं समानो वायुरेव च ।
श्रोत्रं ज्ञानेन्द्रियं प्रोक्तमित्येते षोडश क्रमात् ॥
यकाराक्षरमित्युक्तं न भूतो न भविष्यति ॥४१॥

षडश्र आकार वाला है॥३६॥ इसका प्रकाश इन्द्रनील मणि के समान, करण चित्त नामक, वायु उदान और ज्ञानेन्द्रिय स्पर्श नाम की है। इस तरह से वाकार के ये सोलह विषय यहाँ परिगणित हैं॥३७॥

याकार का वर्ण व्योमसदृश नीला, देवता सदा शिव, शक्ति उन्मनी और आधार व्योम (आकाश) है॥३८॥ छन्द जगती, ऋषि भरद्वाज, स्थान ऊर्ध्वमुख (वक्त्र) और ब्रह्म ईशान नामक माना गया है॥३९॥ इसका आयुध त्रिशूल, कला शान्त्यतीता और गुण शून्य माना गया है। इसका प्रकाश चन्द्रमणि के समान है॥४०॥ इसका कारण प्रकृति कही गई है। समान नामक वायु और ज्ञानेन्द्रिय श्रोत्र है। इस प्रकार क्रमशः यकाराक्षर से संबद्ध सोलह विषयों का विवरण यहां दिया गया है। इस तरह का वर्णन न कभी पहले हुआ है और न आगे ही होगा॥४१॥

एकमात्र प्रधान ही काम्यसिद्धियों के विविध प्रयोगों का सम्पादन कराने के लिये प्रत्यक्ष पंचाक्षर मनु का स्वरूप धारण कर लेता है॥४२॥ इसीका १२० प्रकार का प्रस्तार शास्त्रों में वर्णित है। इस तरह से पंचाक्षर मन्त्र की यह उत्पत्ति गुरु के मुख

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पञ्चाक्षरोत्पत्तिः

एकमेव प्रधानं तु पञ्चाक्षरमिति स्मृतम् ।
काम्यसिद्धिप्रयोगेण प्रत्यक्षं पञ्चधा भवेत् ॥४२॥
ततः प्रस्तारकं प्रोक्तं विंशत्येकशतं भवेत् ।
एवं पञ्चाक्षरोत्पत्तिर्गुरोर्वक्त्रेण लभ्यते ॥४३॥
मन्त्रं पञ्चविधं प्रोक्तं कर्म चाष्टविधाम् ।
परे पञ्चात्तरोत्पत्तिः पुनस्तत्रैव लीयते ॥४४॥
सप्तकोटिमहामन्त्रा रूपवक्त्रैरनेकधा ।
पञ्चाक्षरे प्रलीयन्ते पुनस्तस्माद् विनिर्गताः ॥४५॥
आज्ञाहीनं क्रियाहीनं श्रद्धाहीनं बृहस्पते ।
अजप्तं दक्षिणाहीनं सदा जप्तं च निष्फलम् ॥४६॥
आज्ञासिद्धं क्रियासिद्धं श्रद्धासिद्धमिदं तथा ।
दक्षिणासिद्धमपि च मन्त्रमेतन्महाफलम् ॥४७॥

पुरश्चरणक्रमः

दीक्षापूर्वं गुरोर्लब्ध्वा मन्त्रमाज्ञां समाहितः ।
संकल्प्य च जपेन्नित्यं पुरश्चरणपूर्वकम् ॥४८॥
यावज्जीवं जपेन्नित्यमष्टोत्तरसहस्त्रकम् ।
अनश्नंस्तत्परो भूत्वा स याति परमां गतिम् ॥४९॥

से ही प्राप्त की जा सकती है।॥४३॥ मन्त्र पांच प्रकार के होते हैं। कर्म आठ प्रकार का होता है। पंचाक्षर मन्त्र की उत्पत्ति परतत्त्व (पंचब्रह्म) से होती है और पुन: वह वहीं विलीन हो जाता है।॥४४॥ नाना रूप और आकार वाले सात करोड़ महामन्त्र उस पंचाक्षर मन्त्र से ही निकलते हैं और उसी में लीन हो जाते हैं।॥४५॥ हे बृहस्पति! आज्ञा से हीन, क्रिया से हीन, श्रद्धा से हीन और दक्षिणा से हीन मन्त्र सफल नहीं होते। इसी तरह से कभी न जपा गया और बिना विधि के जपा गया मन्त्र भी निष्फल होता है।॥४६॥ आज्ञासिद्ध, क्रियासिद्ध, श्रद्धासिद्ध और दक्षिणासिद्ध यह पंचाक्षर मन्त्र महान् फल को देता है।॥४७॥

समाहित चित्त वाले व्यक्ति को गुरु से दीक्षा ग्रहण कर मन्त्र तथा उसके उपयोग की आज्ञा भी लेनी चाहिये। ततः पुरश्चरण पूर्वक मन्त्र का संकल्प के अनुसार नित्य जप करना चाहिये।॥४८॥ जो व्यक्ति बिना भोजन किये सावधानी के साथ जीवन पर्यन्त १००८ बार नित्य पंचाक्षर मन्त्र का जप करता है, वह परम गति को प्राप्त करता

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जपेदक्षरलक्षं वै चतुर्गुणितमादरात् ।
युक्ताशी संयमी यः स पौश्चरणिकः स्मृतः ॥५०॥
यः पुरश्चरणं कृत्वा नित्यजापी भवेत् पुनः ।
तस्य नास्ति समो लोके स सिद्धः सिद्धिदो भवेत् ॥५१॥

मन्त्रजपविधिः

स्नानं कृत्वा शुचौ देशे बद्ध्वा रुचिरमासनम् ।
शङ्करं हृदि संचिन्त्य स्वगुरुं तद्गुरूंस्तथा ॥५२॥
प्राङ्मुखोदङ्मुखो वापि मौनी चैकाग्रमानसः ।
विशोध्य पञ्चतत्त्वानि दहनप्लावनादिभिः ॥५३॥
मन्त्रन्यासादिकं कृत्वा सकलीकृतविग्रहः ।
देवं देवीयुतं ध्यायेत् प्राणापानौ नियम्य च ॥५४॥

है।।४९।। मन्त्र के [2]प्रत्येक अक्षर को चार गुना करके उतने लाख बार आदर पूर्वक आहार-विहार में संयम बरतता हुआ जो जप करता है, उसे पौरश्चरणिक कहा जाता है।।५०।। इस प्रकार पुरश्चरण करके जो व्यक्ति उस मन्त्र का नित्य जप करता है, उसके समान इस लोक में कोई नहीं है। ऐसा व्यक्ति स्वयं सिद्ध होकर दूसरों को भी सिद्धि देने में समर्थ हो जाता है।।५१।।

स्नान करने के उपरान्त पवित्र स्थान पर सुखासन, पद्मासन आदि में से कोई एक अपनी सुविधा का आसन लगाकर भगवान् शंकर का हृदय में ध्यान कर, अपने गुरु का और पूरी गुरुपरम्परा का ध्यान करे।।५२।। पूर्वाभिमुख या उत्तराभिमुख हो मौन व्रत धारण कर एकाग्र चित्त से [3]दहन, प्लावन आदि की प्रक्रिया से पांच तत्त्वों का शोधन करे।।५३।। मन्त्रन्यास आदि की सहायता से अपने शरीर को शिव की कलाओं से सम्पन्न कर, प्राण और अपान, अर्थात् श्वासप्रश्वास की प्रक्रिया पर नियन्त्रण स्थापित कर अपनी देवी (शक्ति) से संयुक्त देव (भगवान् शिव) का ध्यान करे।।५४।। विद्या, स्थान, स्वर, रूप, ऋषि, छन्द, देवता, बीज, शक्ति तथा वाच्य ईश्वर

---

२. पंचाक्षर मन्त्र के पांच अक्षरों को चार से गुणा करने पर यह संख्या २० होती है। इस मन्त्र का पुरश्चरण करने के लिये २० लाख बार इसका जप अपेक्षित है। पुरश्चरण की पूरी प्रक्रिया पर ग्रन्थ के उपोद्घात में प्रकाश डाला जायगा।

३. "शिवो भूत्वा शिवं यजेत्" यह शास्त्रवचन अनेक स्थलों पर उद्धृत है। शिवभाव की प्राप्ति के लिये भूतशुद्धि और प्राणप्रतिष्ठा की विधि शास्त्रों में निर्दिष्ट है। प्राणायाम के द्वारा शोषण, दाह और आप्यायन की पद्धति से यह प्रक्रिया सम्पन्न होती है। इससे पांचभौतिक स्थूल शरीर में स्थित पापपुरुष के भस्मीभाव के बाद नूतन विद्याशरीर मे प्रादुर्भाव की भावना की जाती है। इस पूरी प्रक्रिया का पालन यहां करना पड़ता है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विद्यां स्थानं स्वरं रूपं ऋषिं छन्दोऽधिदैवतम् ।
बीजं शक्तिं तथा वाच्यं स्मृत्वा पञ्चाक्षरं जपेत् ॥५५॥

त्रिविधो जपः

उत्तमो मानसः प्रोक्त उपांशुर्मध्यमस्तथा ।
अधमो वाचिकः प्रोक्त इत्येतच्छिवशासनम् ॥५६॥
यदुच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः ।
मन्त्रमुच्चारयेद्वाचा वाचिकोऽयं जपः स्मृतः ॥५७॥
जिह्वामात्रपरिस्पन्दादीषदुच्चारितोऽपि वा ।
अपरैरश्रुतः स्वेन श्रुतश्चोपांशुरुच्यते ॥५८॥
धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात्पदम् ।
शब्दार्थचिन्तनं भूयः कथ्यते मानसो जपः ॥५९॥
वाचिकस्त्वेक एव स्यादुपांशुः शतमुच्यते ।
सहस्रं मानसं प्रोक्तं सगर्भस्तच्छताधिकः ॥६०॥

का स्मरण कर पंचाक्षर मन्त्र का जप करे॥५५॥

मानस जप उत्तम कहा गया है। उपांशु जप मध्यम तथा वाचिक जप अधम कहा गया है। यही शिव का शासन है॥५६॥ [४]उच्च, नीच और स्वरित स्वरों में जिस मन्त्र के शब्दों का, पदों और अक्षरों का वाणी से स्पष्ट उच्चारण किया जाता है, वह वाचिक जप कहलाता है॥५७॥ जिसमें केवल जिह्वा हिलती है अथवा मन्त्राक्षरों का धीरे से उच्चारण होता है, किन्तु उसे कोई दूसरा सुन नहीं सकता, केवल जपकर्ता अपने ही सुन पाता है, वह जप उपांशु कहलाता है॥५८॥ अक्षरों का क्रम केवल बुद्धि में ही एक वर्ण से दूसरे वर्ण तक और एक पद से दूसरे पद तक चलता है और प्रधानतः शब्दार्थ की चिन्ता में ध्यान केन्द्रित रहता है, वह जप [५]मानस कहलाता है॥५९॥ वाचिक जप की अपेक्षा उपांशु जप का शतगुण फल होता है और मानस जप का सहस्रगुण फल कहा गया है। सगर्भ जप का फल इससे भी सौ गुना अधिक माना गया है॥६०॥

---

४. "उच्चैरुदात्तः, नीचैरनुदात्तः, समाहारः स्वरितः" (१। २। २९-३१) पाणिनि की अष्टाध्यायी के ये तीन सूत्र यहां स्मरणार्ह हैं।

५. आगम-तन्त्रशास्त्र के ग्रन्थों में ही नहीं, मनुस्मृति (२। ८५) में भी इस त्रिविध जप का गुणगान किया गया है। सिद्धान्तशिखामणि (८। २७-३२) भी देखिये।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सगर्भोऽगर्भश्च जप:

प्राणायाम समायुक्तः सगर्भो जप उच्यते ।
प्राणायामेन रहितो ह्यगर्भो जप उच्यते ॥६१॥
चत्वारिंशत्समावृत्तिं प्राणायामं तु संस्मरेत् ।
मन्त्रं मन्त्रार्थविधिमानशक्तः शक्तितो जपेत् ॥६२॥
पञ्चकं त्रिकमेकं वा प्राणायामं समाचरेत् ।
अगर्भं वा सगर्भं वा सगर्भस्तु प्रशस्यते ॥६३॥
सगर्भादपि साहस्रं सध्यानो जप उच्यते ।
एषु पञ्चविधेष्वेव कर्तव्यः शक्तितो जपः ॥६४॥

अङ्गुल्यादिषु जपफलभेदः

अङ्गुल्या जपसंख्यानादेकमेकमुदाहृतम् ।
रेखयाऽष्टगुणं विद्यात् पुत्रजीवैर्दशाधिकम् ॥६५॥
शतं स्याच्छङ्खमणिभिः प्रवालैस्तु सहस्रकम् ।
स्फटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते ॥६६॥
पद्माक्षैर्दशलक्षं तु सौवर्णैः कोटिरुच्यते ।
कुशग्रन्थ्या च रुद्राक्षैरनन्तफलमुच्यते ॥६७॥

प्राणायाम के साथ जो जप किया जाता है, उसे सगर्भ कहते हैं। बिना प्राणायाम के किया गया जप अगर्भ कहलाता है॥६१॥ सगर्भ जप की मन्त्रार्थ की विधि के जानकार समर्थ व्यक्ति को एक प्राणायाम के साथ मन्त्र की ४० आवृत्ति करनी चाहिये। जो ऐसा करने में असमर्थ है, वह अपनी सामर्थ्य के अनुसार मन्त्रार्थ का स्मरण करते हुए जप करे॥६२॥ जपकर्ता को पांच, तीन अथवा एक सगर्भ अथवा अगर्भ प्राणायाम अवश्य करना चाहिये। इनमें सगर्भ प्राणायाम प्रशंसनीय माना गया है॥६३॥ सगर्भ जप की अपेक्षा भी सध्यान जप हजार गुना श्रेष्ठ माना गया है। इन पांच (वाचिक, उपांशु, मानस, सगर्भ और सध्यान) प्रकार के जपों में से अपनी शक्ति के अनुसार जप करना चाहिये॥६४॥

अंगुली से जप करने पर उसका जप की संख्या के अनुसार ही फल मिलता है। अंगुली की रेखा पर जप करने पर आठ गुना और पुत्रजीव की माला से दस गुना फल मिलता है॥६५॥ शंख की मणि की माला से सौ गुना, प्रवाल की माला से हजार गुना, स्फटिक की माला से १० हजार गुना और मुक्ता की माला से लाख गुना फल मिलता है॥६६॥ पद्माक्ष (कमलगट्टे) की माला से १० लाख गुना और सुवर्ण की माला से करोड़ गुना फल मिलता है। कुशा की ग्रन्थि और रुद्राक्ष की माला से जप करने पर अनन्त फल प्राप्त होता है॥६७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जपमाला

त्रिंशदक्षैः कृता माला धनदा जपकर्मणि ।
सप्तविंशतिसंख्याकैरक्षैः पुष्टिप्रदा भवेत् ॥६८॥
पञ्चविंशतिसंख्याकैः कृता मुक्तिं प्रयच्छति ।
अक्षैस्तु पञ्चदशभिरभिचारफलप्रदा ॥६९॥
अङ्गुष्ठं मोक्षदं विद्यात्तर्जनी शत्रुनाशिनी ।
मध्यमा धनदा शांतिं करोत्येव ह्यनामिका ॥
कनिष्ठाऽऽकर्षणे प्रोक्ता जपकर्मणि गीष्पते ॥७०॥
अङ्गुष्ठेन जपेज्जप्यमन्यैरङ्गुलिभिः सह ।
अङ्गुष्ठेन विना जप्यं कृतं तदफलं यतः ॥७१॥

स्थानादिभेदेन फलभेदः

गृहे जपं समं विद्याद् गोष्ठे शतगुणं भवेत् ।
पुण्यारण्ये तथाऽऽरामे सहस्त्रगुणमुच्यते ॥७२॥
अयुतं पर्वते रम्ये नद्यां लक्षमुदाहृतम् ।
कोटिं देवालये विद्यादनन्तं शिवसन्निधौ ॥७३॥
यदिष्टलिङ्गं संपश्यन् वामहस्तस्थितं परम् ।
जपते तत्फलं वक्तुं न मया शक्यते गुरो ॥७४॥

जप करने के लिये तीस रुद्राक्ष के दानों से बनाई गई माला धन देने वाली है। २७ रुद्राक्ष के दानों की माला पुष्टि देने वाली है॥६८॥ पचीस रुद्राक्ष के दानों से बनाई गई माला मुक्ति को देने वाली है। पन्द्रह रुद्राक्ष के दानों की माला मारण-मोहन आदि अभिचार कर्म की सिद्धि को देने वाली होती है॥६९॥ हे बृहस्पति! जपकर्ता को मोक्ष की प्राप्ति के लिये अंगुष्ठ का, शत्रु को नाश के लिये तर्जनी का, धन की प्राप्ति के लिये मध्यमा का, शान्ति की प्राप्ति के लिये अनामिका का और आकर्षण के लिये कनिष्ठा का उपयोग प्रधान रूप से करना चाहिये॥७०॥ माला से जप करते समय उसमें अन्य अंगुलियों के साथ अँगूठे का उपयोग अवश्य करे। बिना अँगुठे के किया गया जप निष्फल हो जाता है॥७१॥

घर में जप करने का सामान्य फल मिलता है। गोष्ठ (गायों का बाड़ा) में जप करने से सौगुना और पवित्र वन अथवा उद्यान में जप करने से हजार गुना फल मिलता है॥७२॥ रमणीय पर्वत पर किये गये जप का फल १० हजार गुना, नदी मे तट पर लाख गुना, देवालय में करोड़ गुना और शिव की संनिधि कें किये गये जप का अनन्त गुण फल मिलता है॥७३॥ हे बृहस्पति! अपने वाम हस्त में स्थित श्रेष्ठ इष्टलिंग को

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सूर्यस्याग्नेर्गुरोरिन्दोर्दीपस्य च जलस्य च ।
विप्राणां च गवां चैव सन्निधौ शस्यते जपः ॥७५॥
तत्पूर्वाभिमुखं वश्यं दक्षिणं चाभिचारिकम् ।
पश्चिमं धनदं विद्यादुत्तरं शान्तिदं भवेत् ॥७६॥

जपकाले वर्ज्यम्

उष्णीषी कञ्चुकी नग्नो मुक्तकेशो गलावृतः ।
अपवित्रकरोऽशुद्धो विलपन्न जपेत् क्वचित् ॥७७॥
क्रोधं मदं क्षुधां तन्द्रां निष्ठीवनविजृम्भणे ।
दर्शनं च श्वनीचानां वर्जयेज्जपकर्मणि ॥७८॥
आचामेत् सम्भवे तेषां स्मरेत् साम्बं त्रियम्बकम् ।
ज्योतींषि च प्रपश्येद्वा कुर्याद्वा प्राणसंयमम् ॥७९॥
अशानश्च शयानश्च गच्छन्नुत्थित एव वा ।
रथ्यायामशिवे स्थाने न जपेत्तिमिरान्तरे ॥८०॥
प्रसार्य न जपेत् पादौ कुक्कुटासन एव वा ।
यानशय्याधिरूढो वा चिन्ताव्याकुलितोऽपि वा ॥
सदाचारो चपन् जुह्वन् ध्यायन् भद्रं समश्नुते ॥८१॥

देखते हुए जो जप किया जाता है, उसके फल का वर्णन करने में मैं असमर्थ हूँ।॥७४॥ सूर्य, अग्नि, गुरु, चन्द्र, दीपक, जल, विप्र और गौ की संनिधि में जप करना प्रशंसनीय माना गया है।॥७५॥ पूर्वाभिमुख जप वशीकरण कारक और दक्षिणाभिमुख आभिचारिक सिद्धि को देने वाला है। पश्चिमाभिमुख होकर जप करने से धन की और उत्तराभिमुख से शान्ति की प्राप्ति होती है।॥७६॥

जिसने पगड़ी अथवा कुर्ता आदि सिला वस्त्र धारण कर रखा है, नग्न है, खुले केश वाला है, गले में कपड़ा लपेटे हुए है, जिसका हाथ अथवा शरीर अपवित्र है, विलाप कर रहा है, ऐसा व्यक्ति कभी जप न करे।॥७७॥ जप करते समय क्रोध न करे, नशा न करे। क्षुधा अथवा तन्द्रा से ग्रस्त व्यक्ति जप न करे। जप करते समय थूँकना अथवा जंभाई लेना वर्जित है। इसी प्रकार से श्वान नीच आदि का दर्शन भी वर्जित है।॥७८॥ इनकी संभावना होने पर आचमन कर साम्ब शिव का स्मरण करे अथवा सूर्य, चन्द्र, तारका आदि ज्योतियों का दर्शन करे अथवा प्राणायाम द्वारा अपने को पवित्र करे।॥७९॥ भोजन करता हुआ, सोया हुआ, चलता हुआ अथवा खडा हुआ, गली में अपवित्र स्थान पर और अन्धकार से पूरित स्थान पर जप न करे।॥८०॥ पैर फैला कर अथवा उकडू बैठकर जप न करे। किसी सवारी पर अथवा शय्या पर बैठकर

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रहस्यमन्यद्वक्ष्यामि गोपनीयमिदं शृणु ।
न वाच्यं यस्य कस्यापि नास्तिकस्याथवा पशोः ॥८२॥

पञ्चाक्षरमन्त्रमहिमा

सदाचारविहीनस्य पतितस्यान्त्यजस्य वा ।
पञ्चाक्षरात् परं नास्ति परित्राणं कलौ युगे ॥८३॥
गच्छतस्तिष्ठतो वापि स्वेच्छया कर्म कुर्वतः ।
अशुचेर्वा शुचेर्वापि मन्त्रोऽयं न च निष्फलः ॥८४॥
अनाचारवतां पुंसामविशुद्धषडध्वनाम् ।
अनादिष्टेऽपि गुरुणा मन्त्रोऽयं न च निष्फलः ॥८५॥
अन्त्यजस्यापि मूढस्य मूर्खस्य पतितस्य च ।
निर्मर्यादस्य नीचस्य मन्त्रोऽयं न च निष्फलः ॥८६॥
सर्वावस्थांगतस्यापि मयि भक्तिमतः सदा ।
सिद्ध्यत्येष न सन्देहो नापरस्य तु कस्यचित् ॥८७॥
न कदाचन कस्यापि रिपुरेष महामनुः ।
सिद्धो वाऽथ सुसिद्धो वा साध्यो वाऽथ भविष्यति ॥८८॥

जप न करे। चिन्ता से व्याकुल व्यक्ति भी जप न करे। सदाचारसम्पन्न व्यक्ति ही जप करके, होम करके और शिव का ध्यान करके कल्याण को प्राप्त करता है॥८१॥ अब मैं एक रहस्य की बात तुम्हें बता रहा हूँ, उसे तुम सुनो! इसको गुप्त रखना चाहिये, जिस किसी को नहीं बता देना चाहिये। विशेष कर नास्तिक अथवा पशु (अज्ञानी) को इसे कभी नहीं बताना चाहिये॥८२॥

जो व्यक्ति सदाचार से विहीन है, पतित है अथवा अन्त्यज है, उसके लिये इस कलियुग में पंचाक्षर मन्त्र से बढ कर कोई त्राण देने वाला नहीं है॥८३॥ चलते हुए, खड़े हुए अथवा अपनी इच्छा के अनुसार कर्म करते हुए, पवित्र अथवा अपवित्र अवस्था में भी इस पंचाक्षर मन्त्र का जप निष्फल नहीं होता॥८४॥ जो व्यक्ति आचारवान् नहीं है, जिनके षडध्वों की शुद्धि दीक्षा व्यापार द्वारा नहीं हुई है, जिनको गुरु द्वारा इसका उपदेश नहीं हुआ है, ऐसे व्यक्ति के लिये भी यह मन्त्र निष्फल नहीं होता, अर्थात् ऐसे व्यक्तियों के द्वारा जपे जाने पर भी यह अवश्य फलदायी होना है॥८५॥ भले ही व्यक्ति अन्त्यज हो, जड़ बुद्धि का हो, मूर्ख हो, पतित हो, मर्यादा का पालन न करता हो, नीच हो, तो भी यह मन्त्र उसके लिये निष्फल नहीं होता॥८६॥ जिस किसी भी अवस्था को प्राप्त हुआ व्यक्ति यदि मेरा भक्त है, तो उसको यह मन्त्र अवश्य सिद्धि प्रदान करता है, इसके सिवाय किसी दूसरे को नहीं॥८७॥ यह महामन्त्र

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सिद्धेन गुरुणाऽऽदिष्टः सुसिद्ध इति कथ्यते ।
असिद्धेनापि वा दत्तः सिद्धः साध्यस्तु केवलम् ॥८९॥
असाधितः साधितो वा सिद्धयत्येष न संशयः ।
श्रद्धातिशययुक्तस्य शिवे मन्त्रे तथा गुरौ ॥९०॥

पञ्चाक्षरीविद्यामाश्रयेत्

तस्मान्मन्त्रान्तरांस्त्यक्त्वा सापायानधिकारतः ।
आश्रयेत् परमां विद्यां हृद्यां पञ्चाक्षरीं बुधः ॥९१॥
मन्त्रान्तरेषु सिद्धेषु मन्त्र एष न सिद्धयति ।
अस्मिन् सिद्धे महामन्त्रे तेऽपि सिद्धा भवन्ति हि ॥९२॥
अपारो महिमा शैवपञ्चाक्षरमहामनोः ।
न वक्तुं विधिना शक्यः संक्षिप्योक्तो मयानघ ॥९३॥

आवरणाष्टकप्रकरणोपसंहारः

इदं हि शैवदीक्षाया महदावरणाष्टकम् ।
प्रथितं सर्वविद्यासु प्रत्येकमपि मुक्तिदम् ॥९४॥

कभी भी किसी का भी रिपु नहीं बन सकता। सिद्ध, सुसिद्ध अथवा साध्य ही यह हो सकेगा॥८८॥ सिद्ध गुरु के द्वारा उपदिष्ट मन्त्र सुसिद्ध कहलाता है। असिद्ध गुरु के द्वारा उपदिष्ट मन्त्र सिद्ध और अपने से आराधित मन्त्र साध्य कहलाता है॥८९॥ यह मन्त्र असाधित हो या साधित, जिसकी शिव, मन्त्र और गुरु के प्रति अपार श्रद्धा है, उसको अवश्य ही सिद्ध हो जाता है, इसमें किसी प्रकार का सन्देह नहीं है॥९०॥

इस लिये अन्य मन्त्रों को छोड़ कर, जो कि अधिकार के भेद के कारण प्रत्यवाय का जनक भी हो सकते हैं, इस मनो हारिणी श्रेष्ठ पंचाक्षरी विद्या का आश्रय विद्वान् व्यक्ति को लेना चाहिये॥९१॥ दूसरे मन्त्रों के सिद्ध हो जाने पर भी यह पंचाक्षर मन्त्र सिद्ध नहीं हो पाता, पिन्तु इस महामन्त्र के सिद्ध हो जाने पर अन्य मन्त्र अपने आप सिद्ध हो जाते हैं॥९२॥ इस शैव पंचाक्षर मन्त्र की महिमा अपार है। ब्रह्मा भी इसकी महिमा का वर्णन नहीं कर सकते। हे निष्पाप देवगुरु! मैने इसकी महिमा तुमको संक्षेप में बताई है॥९३॥

शैव दीक्षा के ये ही आठ महान् आवरण हैं। सभी शास्त्रों में ये प्रसिद्ध हैं। इनमें से प्रत्येक आवरण मुक्ति प्रदान करने में समर्थ हैं॥९४॥ हे समस्त देवताओं कुल

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गदितं त्वयि संप्रीत्या भुवनानुजिधृक्षया।
वृन्दारककुलाचार्य किमन्यच्छ्रोतुमिच्छसि ॥९५॥

इति श्रीचन्द्रज्ञानागमे उत्तरभागेऽनन्तरुद्रबृहस्पति-
संवादे शिवशासने क्रियापादे पञ्चाक्षरस्वरूप-
निरूपणं नामाष्टमः पटलः॥

के आचार्य बृहस्पति! तुम्हारे ऊपर प्रीति होने के कारण तथा संसार के प्राणियों पर अनुग्रह करने की इच्छा से यह अष्टावरण का स्वरूप मैंने तुमको बताया है। अब आगे तुम क्या सुनना चाहते हो॥९५॥

इस प्रकार अनन्तरुद्र और बृहस्पति के संवाद के रूप में प्रस्तुत इस
चन्द्रज्ञानागम के उत्तर भाग के क्रिया पाद का पंचाक्षर
मन्त्र के स्वरूप का निरूपण करने वाला
यह आठवाँ पटल समाप्त हुआ।

❋ ❋ ❋

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नवमः पटलः

बृहस्पतिरुवाच

सर्वागमार्थसारज्ञ सर्वभूतदयापर ।
जगदुद्धरणोन्निद्रानन्तरुद्र नमोऽस्तु ते ॥१॥
अष्टावरणमाहात्म्यमनन्तश्रुतिचोदितम् ।
श्रीमन्मुखादिहाकर्ण्य परां तृप्तिमवाप्नुवम् ॥२॥
आचाराणां च पञ्चानां स्वरूपं विनिबोध्य माम् ।
अनुगृह्णीष्व कृपया सुरासुरनमस्कृत ॥३॥

अनन्तरुद्र उवाच

पञ्चाचारनिरूपणम्

लिङ्गाचारः सदाचारः शिवाचारस्तथैव च ।
भृत्याचारो गणाचारः पञ्चाचाराः प्रकीर्तिताः ॥४॥
गुरुणा दत्तलिङ्गाद्वै नास्ति दैवं महीतले ।
इति भावानुसन्धानं लिङ्गाचारः स उच्यते ॥५॥
धर्मार्जितेन द्रव्येण यत् सन्तर्पणमन्वहम् ।
गुरुलिङ्गजङ्गमानां सदाचार इति स्मृतः ॥६॥
शिव एव परं ब्रह्म पञ्चकृत्यपरायणम् ।
न ततोऽन्या गतिरिति शिवाचारो हि कीर्तितः ॥७॥

बृहस्पति प्रश्न करते हैं—

हे सभी आगमों के अर्थ के सार को जानने वाले, सभी प्राणियों पर दया करने वाले, जगत् के उद्धार के लिये निद्रा को भी त्याग देने वाले अनन्तरुद्र! मैं आपको प्रणाम करता हूँ॥१॥ अनेक श्रुतियों में वर्णित अष्टावरण के माहात्म्य को आपके मुख से सुनकर हैं परम तृप्त हो गया हूँ॥२॥ सुरों और असुरों के द्वारा नमस्कृत हे अनन्तरुद्र! अब आप पांच आचारों के स्वरूप को बताकर कृपया मुझे अनुगृहीत कीजिये॥३॥

अनन्तरुद्र उत्तर देते हैं—

लिंगाचार, सदाचार, शिवाचार, गणाचार और भृत्याचार—ये ही पांच प्रकार के आचार कहे गये हैं॥४॥ गुरु के द्वारा प्रदत्त इष्टलिंग से बढकर इस पृथ्वी पर दूसरा कोई देवता नहीं हैं, इस प्रकार के भाव का अनुसन्धान करना ही *लिंगाचार* कहलाता है॥५॥ धर्म का पालन करते हुए अर्जित किये गये धन से प्रतिदिन गुरु, लिंग और जंगम को भोजन, वस्त्र आदि से सन्तुष्ट करना *सदाचार* कहलाता है॥६॥ सृष्टि, स्थिति, संहार, निग्रह और अनुग्रह नामक पाँच कृत्यों में संलग्न शिव ही पर ब्रह्म हैं। इनके

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शिवस्य शिवभक्तस्य शिवधर्मादिकस्य च ।
न शृणोति च यन्निन्दां च गणाचार उच्यते ॥८॥
शिवभक्तजनाः सर्वे वरिष्ठाः पृथिवीतले ।
तेषां भृत्योऽहमिति यद् भृत्याचार इति स्मृतः ॥९॥
इहोक्तानां च पञ्चानामाचाराणां सुरोत्तम ।
प्रकारान्तरमस्त्यत्र वक्ष्ये तदपि च शृणु ॥१०॥

१. लिङ्गाचारः

लिङ्गाचारं प्रवक्ष्यामि प्रथमं मङ्गलालयम् ।
क्रियावेधामन्वभिख्यदीक्षान्तर्गतमूर्तयः ॥
एकविंशतिदीक्षाश्च लिङ्गाचार इति स्मृतः ॥११॥

सप्तविधा दीक्षा

आज्ञोपमा च कलशैरभिषेकस्ततः परम् ।
स्वस्तिकारोहणं भूतिपट्टमायत्तमेव च ॥
स्वायत्तमिति सप्तैताः क्रियादीक्षान्तरा मताः ॥१२॥
समयश्चाप्यसंसारस्तत्त्वं ज्ञानमनुग्रहः ।
अध्यात्मशुद्धविद्ये च सप्त वेधान्तराः स्मृताः ॥१३॥

अतिरिक्त अन्य कोई शरण्य नहीं है, इस भावना को ही ***शिवाचार*** कहा गया है।।७।। शिव की, शिवभक्त की और शिवधर्म की निन्दा को न सुनना ही ***गणाचार*** कहलाता है।।८।। इस पृथ्वी तल पर शिवभक्त मनुष्य ही सर्व श्रेष्ठ हैं, मैं उनका भृत्य हूँ। ऐसे संकल्प को ही ***भृत्याचार*** कहा गया है।।९।। हे सुरोत्तम बृहस्पति! यहां बताये गये इन पांच आचारों का एक दूसरा भी स्वरूप है। उसे मैं बता रहा हूँ। उसे भी तुम सावधानी से सुनो।।१०।।

मैं सबसे पहले मंगलदायक लिंगाचार का वर्णन कर रहा हूँ। [१]क्रिया, वेधा और मनु(मन्त्र) नामक दीक्षा के अन्तर्गत आने वाले सात सात उपविभागों के साथ २१ प्रकार की दीक्षाएं लिङ्गाचार के अन्तर्गत आती हैं।।११।।

आज्ञा, उपमा, कलशाभिषेक, स्वस्तिकारोहण, भूतिपट्ट, आयत्त और स्वायत्त- ये सात भेद क्रिया रीक्षा के माने गये हैं।।१२।। समय, असंसार, तत्त्व, ज्ञान, अनुग्रह, अध्यात्म और शुद्धविद्या- ये सात भेद वेधा दीक्षा के हैं।।१३।। दृढ संकल्प, अहिंसा,

---

१. क्रिया, वेधा और मन्त्र नामक त्रिविध दीक्षाओं का विवरण सिद्धान्तशिखामणि (६.१२-१५) में भी देखिये ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दृढव्रतमहिंसा च तस्मै पञ्चेन्द्रियार्पणम् ।
एकाग्रचित्तसंपत्तिः परतत्त्वे सदा रतिः ॥१४॥
लिङ्गे निजमनोलीनं सद्योमुक्तिश्च शाश्वती ।
एवं सप्तविधा दीक्षा मनुदीक्षान्तराः स्मृताः ॥१५॥

२. सदाचारः

सदाचारं प्रवक्ष्यामि सावधानमनाः शृणु ।
[२]आचार एव सर्वेषामलङ्काराय कल्पते ॥
आचारहीनः पुरुषो लोके भवति निन्दितः ॥१६॥
ज्ञानेनाचारयुक्तेन प्रसीदति महेश्वरः ।
तस्मादाचारवान् ज्ञानी भवेदादेहपातनम् ॥१७॥
शिवस्य भक्तिराधार आचारः सर्वदेहिनाम् ।
आचारः परमो धर्म आचारः परमं धनम् ॥१८॥
ज्ञानमाचारहीनं चेन्न तद्भवति सिद्धये ।
शृणु तस्मिन् सदाचारे शीलमष्टविध भवेत् ॥१९॥

सदाचारेऽष्टविधं शीलम्

अङ्कुरं प्रथमं ज्ञेयमुत्पन्नं च द्वितीयकम् ।
द्विदलं च तृतीयं स्यात् प्रवृद्धं च चतुर्थकम् ॥२०॥

भगवन्निमित्र पंचेन्द्रियार्पण, चित्त एकाग्रता की सम्पत्ति, पर तत्त्व में सदा अनुराग, लिंग में अपने मन का लय और नित्य सद्योमुक्ति—ये सात भेद मनु दीक्षा के हैं।।१४-१५।।

अब मैं सदाचार को कहता हूँ, उसे तुम सावधानी से सुनो। इस लोक में आचार ही सबका अलंकरण माना गया है। आचारहीन पुरुष की लोक में निन्दा होती है।।१६।। आचार से सम्पन्न ज्ञान से ही भगवान् शंकर प्रसन्न होते हैं। अतः ज्ञानी व्यक्ति को मृत्युपर्यन्त सदाचार से संपन्न रहना चाहिये।।१७।। शिव की प्राप्ति में जैसे भक्ति प्रधान आधार है, उसी तरह से सभी जीवधारियों के जीवन का आचार ही प्रधान आधार है। आचार ही परम धर्म है और आचार ही श्रेष्ठ धन है।।१८।। ज्ञान यदि आचार से हीन है, तो वह ज्ञान कभी सिद्धिप्रद नहीं हो सकता। हे बृहस्पति! तुम सुनो कि इस सदाचार में आठ प्रकार के शील का आचरण करना पड़ता है।।१९।।

'इनमें अंकुर पहला, उत्पन्न दूसरा, द्विदल तीसरा, प्रवृद्ध चौथा, सप्रकाण्ड पांचवां, सशाख छठा, सपुष्प सातवां और सफल आठवां शील है।।२०-२१।। यह

---

२. यहां के दो श्लोक सिद्धान्तशिखामणि (१६। १३-१४) में भी मिलते हैं ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सप्रकाण्डं पञ्चमं स्यात् सशाखं षष्ठमुच्यते ।
सपुष्पं सप्तमं ज्ञेयं सफलं चाष्टमं भवेत् ॥२१॥
सदाचारोऽष्टशीलाढ्यः सेवितः कल्पपादपः ।
सद्भक्तानां सुमनसां ददातीष्टफलं महत् ॥२२॥

अङ्कुरादिशीललक्षणम्

अङ्कुराख्यं प्रवक्ष्यामि बीजभूतं समासतः ।
गुरुकारुण्यकलितषडध्वन्यासशोभिता ॥
तनुः स्वीया प्राकृतेति भावोऽङ्कुर इतीर्यते ॥२३॥
दीक्षितैरेव दाराद्यैः सहवासो य आत्मनः ।
शीलमुत्पन्नमित्युक्तं ग्राह्यमेतद्विचक्षणैः ॥२४॥
लाञ्छनानां हि शैवानां भस्मादीनामनारतम् ।
धारणं त्वप्रमादेन द्विदलं शीलमुच्यते ॥२५॥
यन्नित्यं शिवधर्माणां माहात्म्यस्य विभावनम् ।
प्रवृद्धं शीलमित्युक्तं भक्तेर्वृद्धिकरं श्रुतम् ॥२६॥
इष्टलिङ्गमनभ्यर्च्य स्थीयते यदभोजनम् ।
सप्रकाण्डमिदं शीलं विज्ञेयं भक्तिसाधनम् ॥२७॥

सदाचार आठ शीलों से संयुक्त है। इस सदाचार का जो पालन करते हैं, ऐसे प्रसन्न मन वाले सद्भक्तों के लिये यह कल्पवृक्ष के समान मनोवांछित महान् फल को देता है।।२२।।

पहले मैं अंकुर नामक शील का स्वरूप बताता हूँ। संक्षेप में यह सभी शीलों का मूल कारण है। गुरु की करुणा से जो [३]षडध्वन्यास की विधि से सुशोभित है, अर्थात् दिव्य भाव को प्राप्त हो गई है, ऐसी मेरी यह काया (शरीर) ही समस्त आराधना ही मूल प्रकृति है, इस भाव की उदय होना ही अंकुर नामक शील कहलाता है।।२३।। दीक्षित स्त्रीपुत्र आदि के साथ ही अपना निवास रखना उत्पन्न शील कहलाता है। विद्वान् व्यक्तियों को इसका आचरण अवश्य करना चाहिये।।२४।। भस्म इत्यादि शैव लांछनों को निरन्तर बिना प्रमाद के धारण करना द्विदल शील कहलाता है।।२५।। शिवधर्म की महिमा का निरन्तर चिन्तन ही प्रवृद्ध शील कहलाता है। यह भक्ति की वृद्धि करने वाला है, ऐसा सुना जाता है।।२६।। इष्टलिंग का पूजन किये बिना भोजन

---

३. षडध्वन्यास का प्रकार वीरशैवलिङ्गीब्राह्मण-दशकर्मपद्धति के वीरशैव-दीक्षाविधिप्रकरण (पृ० ८१-८३) में विस्तार से दिया गया है। षडध्वशोधन की प्रक्रिया को बताते हुए यहां क्रमशः भुवनाध्व, पदाध्व, वर्णाध्व, कलाध्व, तत्त्वाध्व और मन्त्राध्व न्यास वर्णित हैं ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इष्टलिङ्गानर्पितस्य द्रव्यस्याग्रहणं हि यत् ।
शीलं सशाखमित्युक्तमवर्ज्यं भक्तितत्परैः ॥२८॥
शिवार्पितप्रसादस्य यत् परित्यागवर्जनम् ।
सपुष्पं शीलमित्युक्तं विज्ञेयं चैतदुत्तमम् ॥२९॥
गुरुजङ्गमलिङ्गानां यदेकत्वेन भावनम् ।
सफलं शीलमित्युक्तं सद्यः सिद्धिकरं परम् ॥३०॥
यः सदाचारमष्टाङ्गं भक्तिनिष्ठो निषेवते ।
स सद्यः सिद्धिमाप्नोति परां शम्भोरनुग्रहात् ॥३१॥

३. शिवाचारः

शिवाचारमतो वक्ष्ये शृणुष्वावहितो मुने ।
द्रव्यक्षेत्रगृहादीनां षोडशानां विशोधनम् ॥
शिवशास्त्रोक्तमार्गेण शिवाचार इति स्मृतः ॥३२॥

षोडश शुद्धयः

भक्तहस्तगतं वापि भस्मना वा विशोधितम् ।
फलमूलादिकं ग्राह्यं द्रव्यशुद्धिरियं मता ॥३३॥
नन्दिमुद्राङ्कितशिलादार्वादिपरिशोभितम् ।
क्षेत्रं भक्तिपरैर्ग्राह्यं क्षेत्रशुद्धिः प्रकीर्तित ॥३४॥

न करने का संकल्प ही सप्रकाण्ड शील कहलाता है। इसको भी शिवभक्ति का साधन माना गया है॥२७॥ इष्टलिंग को अर्पित किये बिना किसी भी द्रव्य को ग्रहण न करना ही सशाख शील कहलाता है। भक्ति में लगे व्यक्ति को इस शील का पालन अवश्य करना चाहिये॥२८॥ शिव को अर्पित किये गये प्रसाद का कभी परित्याग न करना सपुष्प शील कहलाता है। शीलों में यह श्रेष्ठ माना गया है॥२९॥ गुरु, लिंग और जंगम में एकत्व की भावना सफल शील कहलाता है। यह तत्काल सिद्धि देने वाले श्रेष्ठ शील है॥३०॥ जो भक्तिनिष्ठ व्यक्ति इस आठ अंग वाले सदाचार का पालन करता है, वह भगवान् शिव के अनुग्रह से तत्काल श्रेष्ठ सिद्धि को प्राप्त करता है॥३१॥

अब मैं शिवाचार को कहूँगा हे बृहस्पति! तुम सावधान होकर सुनो। द्रव्य, क्षेत्र, गृह आदि १६ पदार्थों को शिवशास्त्र विहित पद्धति से परिशुद्ध करना ही शिवाचार कहलाता है॥३२॥

भक्त मनुष्य के हाथ से अथवा भस्म द्वारा विशोधित फल, मूल आदि का ही ग्रहण करना चाहिये। इसी को द्रव्य शुद्धि कहा जाता है॥३३॥ नन्दी की मुद्रा से अंकित शिला, काष्ठ आदि से शोभित क्षेत्र ही शास्त्रों में क्षेत्र शुद्धि के नाम से वर्णित है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भक्तैस्तु निर्मितं वापि शिवलिङ्गाङ्कितं तु वा ।
वेश्म भक्तैः परिग्राह्यं गृहशुद्धिः समीरिता ॥३५॥
भक्तेन निर्मितं वापि शिवलिङ्गाङ्कितं तु वा ।
भाण्डजातं परिग्राह्यं भाण्डशुद्धिः प्रकीर्तिता ॥३६॥
भक्तलोकसमानीतं भस्मना संस्कृतं तु वा ।
तृणादिकं परिग्राह्यं तृणशुद्धिरितीरिता ॥३७॥
भक्तियुक्तसमानीतं विभूत्या संस्कृतं तु वा ।
काष्ठं व्रतस्थैः संग्राह्यं काष्ठशुद्धिः समीरिता ॥३८॥
भक्तारामे समुत्पन्नैर्भस्मना संस्कृतैस्तु वा ।
भक्तैस्तु साधितेनाऽपि विभूत्या संस्कृतेन वा ॥३९॥
नागवल्लीदलैः पूगैश्चूर्णेन च समन्वितम् ।
ग्राह्यं भक्तैर्हि ताम्बूलं वीटिकाशुद्धिरीरिता ॥४०॥
शिवदीक्षान्वितैः पक्वमभक्तानवलोकितम् ।
भोज्यं भक्तैः परिग्राह्यं पाकशुद्धिरियं मता ॥४१॥
घृतं दधि पयस्तक्रं माहिषं चाविकं त्यजेत् ।
गव्यं तु सर्वदा ग्राह्यं रसशुद्धिरियं मता ॥४२॥

शिवभक्तों के चाहिये कि वे इस ऐसे ही क्षेत्रों का ग्रहण करे॥३४॥ भक्त मनुष्यों के द्वारा निर्मित अथवा शिवलिंग से अंकित घर ही शिव भक्तों लिये ग्राह्य है। इसे ही गृहशुद्धि कहा जाता है॥३५॥ शिवभक्त के द्वारा निर्मित अथवा शिवलिंग से अंकित भाण्ड का ग्रहण ही भाण्डशुद्धि कहलाती है॥३६॥ भक्तजनों के द्वारा लाये गये अथवा भस्म द्वारा संस्कृत तृण आदि का ग्रहण ही तृणशुद्धि कहलाती है॥३७॥ भक्तियुक्त मनुष्यों के द्वारा समानीत अथवा विभूति से संस्कृत काष्ठ का ही ग्रहण व्रती जनों को करना चाहिये। इसे काष्ठशुद्धि कहा जाता है॥३८॥ भक्त मनुष्यों के बगीचे में लगे हुए अथवा भस्म द्वारा शोधित अथवा भक्तों के द्वारा साधित विभूति से संस्कृत नागवल्ली के दलों (पान) से, सुपारी से और चूर्ण (चूने) से समन्वित ताम्बूल ही भक्तों के द्वारा ग्राह्य होता है। यही वीटिकाशुद्धि कहलाती है॥३९-४०॥ शिवदीक्षा से संपन्न व्यक्ति के द्वारा पकाया गया और अभक्त व्यक्तियों के द्वारा न देखा गया भोजन ही भक्तों के द्वारा ग्राह्य होता है। इसे ही पाकशुद्धि कहते हैं॥४१॥ घी, दही, दूध, मट्ठा यदि भैंस अथवा बकरी का है, तो उसका परित्याग करना और यदि गौ का है, तो उसे ग्रहण करना ही रसशुद्धि कहलाती है॥४२॥ पुनर्जन्म के कारणभूत काम्य

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुनर्भवनिदानोक्तकाम्यकर्मविसर्जनात् ।
जन्मराहित्यसम्पत्तिर्भवशुद्धिर्निगद्यते ॥४३॥
सर्वभूतदयालुत्वं पाञ्चभौतिकसंस्कृतिः ।
भूतदूषणराहित्यं भूतशुद्धिः समीरिता ॥४४॥
सर्वकामान् समुज्झित्य शिवभावानुभावनम् ।
चेतसा यत् सर्वकालं भावशुद्धिः समीरिता ॥४५॥
पद्भ्यां पिपीलिकादीनां न यथा हिंसनं भवेत् ।
गमनं हि परिग्राह्यं मार्गशुद्धिरियं मता ॥४६॥
शास्त्रसंचोदिते काले निःशब्दे च मनोरमे ।
शिवलिङ्गाराधनं यत् कालशुद्धिरिहोदिता ॥४७॥
अनृतं परुषं कुत्सं बीभत्सं दाम्भिकं च यत् ।
विसर्जनं तद्वचसो वाक्शुद्धिरिति कथ्यते ॥४८॥
आसने शयने याने गोष्ठ्यां सर्वत्र सर्वदा ।
सद्भक्तजनसाङ्गत्यं जनशुद्धिः समीरिता ॥४९॥
विद्वन्नयं शिवचारः सर्वशास्त्रेषु गोपितः ।
एतदाचरणान्मर्त्यः शिवसायुज्यमश्नुते ॥५०॥

कर्मों का परित्याग करने से जो जन्म–परम्परा का विच्छेद हो जाता है, इसे ही भवशुद्धि कहा गया है।।४३।। सभी प्राणियों के प्रति दयाभाव रखना, पाँच भौतिक पदार्थों का संस्कार करना, पंचभूतों के दोषों का वर्जन करना ही भूतशुद्धि कहलाती है।।४४।। सभी प्रकार की कामनाओं का परित्याग करके मन से केवल शिवभाव की सदा भावना करना ही भावशुद्धि कही गई है।।४५।। मार्ग में पैरों से चींटी जैसे क्षुद्र प्राणियों की भी हिंसा न हो, इस तरह सावधानी से चलना ही मार्गशुद्धि मानी गई है। शिवभक्त को इसका पालन करना चाहिये।।४६।। निःशब्द, मनोहारी, शास्त्रनिर्दिष्ट काल (ब्राह्म मुहूर्त) में शिवलिंग की आराधना करना ही कालशुद्धि कहलाती है।।४७।। असत्य, कठोर, कुत्सित, बीभत्स और दंभ से भरे वचन का परित्याग ही वाक्–शुद्धि कहलाती है।।४८।। आसन, शयन, यान(सवारी), गोष्ठी आदि में सर्वत्र सदा सद्भक्तों की संगति ही जनशुद्धि कही गई है।।४९।। हे विद्वान् बृहस्पति! शिवांचार का यह स्वरूप शास्त्रों में गुप्त रखा गया है। इस आचार का पालन करने से मनुष्य शिवसायुज्य को प्राप्त करता है।।५०।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

४. गणाचारः

गणाचारमतो वक्ष्ये भोगमोक्षैकसाधनम् ।
अनुष्ठितो भक्तगणैर्गणाचार इतीरितः ॥५१॥

चतुष्षष्टिशीलानि

सर्वोत्तमे गणाचारे सद्यःसिद्धिकरे परे ।
शीलानि तु चतुःषष्टिर्वर्तन्ते तानि संशृणु ॥५२॥

तत्र सप्तकायिकशीलानि

भक्तिनिष्ठेन यद्वाचा यथार्थस्यैव भाषणम् ।
तत्सत्यं सर्वशास्त्रेषु प्रथमं शीलमुच्यते ॥५३॥
न वाच्यमप्रियं सत्यं नासत्यं च प्रियं वदेत् ।
ब्रूयात् प्रियं च यत्सत्यं द्वितीयं शीलमुच्यते ॥५४॥
वेदागमपुराणानां धर्मज्ञानैकबोधिनाम् ।
पठनं प्रत्यहं यत्तत्तृतीयं शीलमीरितम् ॥५५॥
शिवस्य शिवभक्तानां गुरोरपि विशेषतः ।
प्रशंसनं यदश्रान्तं चतुर्थं शीलमुच्यते ॥५६॥
अन्येषां चैव देवानां मानुषाणां च जातुचित् ।
प्रशंसावर्जनं यत्तत् पञ्चमं शीलमुच्यते ॥५७॥
कदाचित् कुत्रचिद्वा यदात्मस्तुतिविसर्जनम् ।
तत् षष्ठं शीलमित्युक्तं सर्वशास्त्रैकसम्मतम् ॥५८॥

अब में गणाचार का वर्णन करूँगा। यह भोग और मोक्ष का एकमात्र साधन है। भक्तगणों के द्वारा अनुष्ठित होने से इसको गणाचार कहते हैं।॥५१॥

तत्काल सिद्धि प्रदान करने वाले इस सर्वोत्तम गणाचार में ६४ शील होते हैं। उनको तुम सुनो।॥५२॥

भक्तिनिष्ठ व्यक्ति के द्वारा वाणी से यथार्थ भाषण करना ही सत्य कहलाता है। सभी शास्त्रों में इसे प्रथम शील कहा गया है।॥५३॥ अप्रिय सत्य नहीं बोलना चाहिये और किसी को खुश करने के लिये असत्य भी नहीं बोलना चाहिये। अतः जो प्रिय सत्य बोला जाता है, इसे ही द्वितीय शील कहते हैं।॥५४॥ धर्म और ज्ञान का बोध कराने वाले वेद, आगम और पुराणों का प्रतिदिन अभ्यास करना ही तृतीय शील है।॥५५॥ शिव की, शिवभक्तों की और विशेषकर गुरु की बिना थके निरन्तर प्रशंसा करना चतुर्थ शील है।॥५६॥ शिवभिन्न देवताओं की और मनुष्यों की कभी भी भूल कर भी प्रशंसा न करना पंचम शील है।॥५७॥ कहीं भी, कभी भी, स्वयं अपने आप

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

देवतानां मनुष्याणां निर्गुणानां च जातुचित् ।
गर्हाविसर्जनं यत्तत् सप्तमं शीलमुच्यते ॥५९॥
तदेतद्वाचिकं शीलमुक्तं सप्तविधं मया ।
अथ पाणिगतं यत्तु शीलं वक्ष्यामि तच्छृणु ॥६०॥

पञ्चविधं पाणिगतं शीलम्

गुरुजङ्गमलिङ्गानां क्रियते या नमस्कृतिः ।
शीलमष्टममित्युक्तमखिलागमबोधितम् ॥६१॥
पूजापरिकराणां यत्संपादनमहर्निशम् ।
शीलं नवममित्युक्तं शिवप्रीत्येककारणम् ॥६२॥
रुद्राक्षमालया नित्यं मूलमन्त्रजपोऽन्वहम् ।
दशमं शीलमित्युक्तमखिलाघविशोधनम् ॥६३॥
गुरोर्माहेश्वराणां च भवानीवल्लभस्य च ।
आराधनं प्रत्यहं तच्छीलमेकादशं स्मृतम् ॥६४॥
गुरवे जङ्गमेभ्यश्च शिवधर्माय भक्तितः ।
यथाशक्ति कृतं दानं द्वादशं शीलमुच्यते ॥६५॥
एवं पञ्चविधं शीलं पाणिसम्बद्धमीरितम् ।
अथ पादगतं वक्ष्ये शीलं पापौघनाशनम् ॥६६॥

अपनी प्रशंसा न करना षष्ठ शील कहलाता है। यह सभी शास्त्रों में मान्य है ॥५८॥ सभी देवताओं की, मनुष्यों की, यहां तक कि निर्गुण व्यक्तियों की भी निन्दा न करना सप्तम शील है॥५९॥ ऊपर जिन सात प्रकार के शीलों का वर्णन मैंने तुमसे किया है, वे सब वाचिक शील कहलाते हैं। अब मैं तुम्हें पाणिगत शीलों को बताऊँगा, उसे सावधानी से सुनो॥६०॥

गुरु, जंगम और लिंग को जो श्रद्धा पूर्वक प्रणाम किया जाता है, वही आठवाँ शील है। समस्त आगमों में यह प्रतिपादित है॥६१॥ रात-दिन पूजा के साधनों को जुटाते रहना ही नवम शील है, जो कि शिव की प्रीति का एकमात्र कारण है॥६२॥ प्रतिदिन नियमानुसार रुद्राक्ष की माला से मूल (पंचाक्षर) मन्त्र का जप करना ही दशम शील है। इससे समस्त पापों का क्षालन हो जाता है॥६३॥ गुरु का, माहेश्वरों का और भवानी के वल्लभ भगवान् शिव का प्रतिदिन समाराधन ही ग्यारहवां शील है॥६४॥ गुरु के लिये, जंगमों के लिये और शिव धर्म की रक्षा के लिये, शक्ति के अनुसार भक्तिपूर्वक दिया गया दान बारहवाँ शील है॥६५॥ इस तरह से यह पाँच प्रकार का शील पाणि (हाथ) से संबद्ध है। अब मैं पापसमूह के नाशक पादगत शील को बताता हूँ॥६६॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चतुर्विधं पादगतं शीलम्

गुरोर्माहेश्वरस्याभिगमनं क्रियते हि यत् ।
तत् त्रयोदशमित्युक्तं शम्भुना सर्ववेदिना ॥६७॥
गुरोर्माहेश्वरस्यापि क्रियते यत् प्रदक्षिणम् ।
भक्तिभावयुतेनैव गदितं तच्चतुर्दशम् ॥६८॥
पूजापरिकराणां हि सम्पादनचिकीर्षया ।
भक्तेन गम्यते नित्यं तत् पञ्चदशकं मतम् ॥६९॥
गुरोरपीष्टलिङ्गस्य पूजार्थं स्थिरमासनम् ।
तत् षोडशकमित्युक्तं देवदेवेन शूलिना ॥७०॥
एवं पादगतं शीलं चतुर्विधमितीरितम् ।
त्वक्सम्बद्धमतो वक्ष्ये तच्छृणुष्वावधानतः ॥७१॥

त्वक्संबद्धं शीलम्

नित्यं यदिष्टलिङ्गस्य स्पर्शनं त्ववियोगतः ।
तत् सप्तदशकं प्रोक्तं वपुःसार्थकतास्पदम् ॥७२॥
इष्टलिङ्गस्पर्शजन्यरोमाञ्चसमलङ्कृतिः ।
अष्टादशं शीलमिति कथितं भवनाशकम् ॥७३॥
त्वक्सम्बद्धमिदं शीलं द्विविधं परिकीर्तितम् ।
चक्षुर्गतं प्रवक्ष्यामि शृणु तत्सावधानतः ॥७४॥

गुरु के और माहेश्वरों के पास जो भक्तिभाव पूर्वक जाया जाता है, सर्वज्ञ शंभु ने इस अभिगमन को १३वाँ शील कहा है।।६७।। गुरु की और माहेश्वरों की जो प्रदक्षिणा की जाती है, भक्तिभावपूर्वक की गई यह प्रदक्षिणा ही १४वाँ शील है।।६८।। पूजा के उपकरणों को इकट्ठा करने के लिये भक्तगण का नदी, उपवन आदि स्थानों में जाना ही १५वाँ शील है।।६९।। गुरु की और इष्टलिंग की पूजा के लिये स्थिर आसन से जो बैठा जाता है, उसे ही देवों के देव त्रिशूलधारी शिव के द्वारा १६वाँ शील कहा गया है।।७०।। इस तरह से यह पादगत शील चार प्रकार का बताया गया है। अब मैं स्पर्श संबन्धी शीलों का वर्णन कर रहा हूँ। तुम उसे सावधानी से सुनो।।७१।।

इष्टलिंग को अपने शरीर से अलग किये बिना नित्य उसका जो स्पर्श ,शरीर से होता रहता है, यही १७ वाँ शील है। इससे मनुष्य का यह शरीर सार्थक हो जाता है।।७२।। इष्टलिंग के स्पर्श से शरीर में जो रोमांच होता है, वही १८वाँ शील है। वह इस संसार का नाश करने वाला है।।७३।। त्वचा से सम्बद्ध इन दो प्रकार के शीलों का कीर्तन करने के बाद अब मैं चक्षुगत शीलों को कहता हूँ। उसे तुम सावधानी से सुनो।।७४।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चक्षुर्गतं शीलम्

अश्रान्तं सानुरागं यदिष्टलिङ्गनिरीक्षणम् ।
एकोनविंशकं शीलमुक्तं भवभयाहपम् ॥७५॥
इष्टलिङ्गेक्षणोद्भूतानन्दबाष्पसमुद्गमः ।
विंशं शीलं विनिर्दिष्टं स्पष्टं चन्द्रार्धमौलिना ॥७६॥
एवं ते द्विविधं शीलं चक्षुःसम्बद्धमीरितम् ।
अथ जिह्वागतं वक्ष्ये शृणु श्रद्धासमन्वितः ॥७७॥

जिह्वागतं शीलम्

निवेदितप्रसादीयरसास्वादो यदन्वहम् ।
एकविंशकमित्युक्तमथ घ्राणगतं शृणु ॥७८॥

घ्राणगतं शीलम्

निर्माल्यगन्धपुष्पादिसौरभाघ्राणनं परम् ।
द्वाविंशकं समाख्यातमतः श्रोत्रगतं शृणु ॥७९॥

श्रोत्रगतं शीलम्

गुरोः शिवस्य भक्तानां स्तोत्राकर्णनमन्वहम् ।
तत् त्रयोविंशकं प्रोक्तं मोक्षसम्प्राप्तिकारणम् ॥८०॥
गुरोः शिवस्य भक्तानां निन्दानाकर्णनं हि यत् ।
तच्चतुर्विंशकं प्रोक्तं कायिकं तु ततः शृणु ॥८१॥

बिना थके अनुरागपूर्वक इष्टलिंग का अवलोकन ही १९वाँ शील है। यह संसार के भय को भगा देने वाला है॥७५॥ इष्टलिंग को देखते देखते जो आनन्दाश्रु गिरने लगते हैं, उसे चन्द्रार्धधारी शिव २०वाँ शील बताते हैं॥७६॥ इस तरह से चक्षु से सम्बद्ध दो प्रकार के शील तुमको बताये गये। अब जिह्वागत शीलों को कहूँगा। तुम उसे श्रद्धापूर्वक सुनो॥७७॥

भगवान् शिव को निवेदित प्रसाद का प्रतिदिन स्वीकार करना ही २१वाँ शील है। अब घ्राणगत शील को सुनो॥७८॥

निर्माल्य गन्ध, पुष्प आदि की सौरभ की आघ्राण ही २२वाँ शील है। अब श्रोत्रगत शील को सुनो॥७९॥

गुरु, शिव और भक्तों के स्तोत्रों को प्रतिदिन सुनना ही २३वाँ शील है। इससे मोक्ष की प्राप्ति होती है॥८०॥ गुरु, शिव और भक्तों की निन्दा को न सुनना ही २४वाँ शील कहा गया है। अब तुम कायिक शील को सुनो॥८१॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कायिकं शीलम्

गुरोरपीष्टलिङ्गस्य चरस्यैव प्रसादतः ।
कायशोधनमेतद्धि शीलं स्यात् पञ्चविंशकम् ॥८२॥
निषिद्धविषयेभ्यश्च यदिन्द्रियविनिग्रहः ।
षड्विंशं शीलमित्युक्तं भवदोषनिवारणम् ॥८३॥
अस्पृश्यवस्तुसंस्पर्शे स्नानं नीरेण भस्मना ।
शौचं हि सप्तविंशं स्याच्छीलं दोषनिवारणम् ॥८४॥
आसने शयने गोष्ठ्यां भविसम्बन्धवर्जनम् ।
अष्टाविंशमिदं शीलं निर्दिष्टं शौचसाधनम् ॥८५॥
भूतिरुद्राक्षलिङ्गानां शरीरे धारणं सदा ।
एकोनत्रिंशकं शीलं मोक्षमार्गैकसाधनम् ॥८६॥
कायिकं पञ्चधा प्रोक्तं मुक्तिप्राप्त्येकसाधनम् ।
अथ मानसिकं वक्ष्ये शीलमेकमनाः शृणु ॥८७॥

मानसिकं शीलम्

निषिद्धभोगविषये यत् संकल्पविवर्जनम् ।
ब्रह्मचर्यं हि तच्छीलं त्रिंशमीश्वरचोदितम् ॥८८॥

गुरु, इष्टलिंग और जंगम के प्रसाद से अपने शरीर का शोधन करना ही २५वाँ शील है।।८२।। निषिद्ध विषयों से अपनी इन्द्रियों को निगृहीत करना ही २६वाँ शील है। यह सांसारिक दोषों का नाश करता है।।८३।। अस्पृश्य वस्तु का स्पर्श हो जाने पर जल से अथवा भस्म से स्नान कर शुद्ध हो जाता ही शौच नाम का २७वाँ शील है। यह समस्त दोषों को दूर करने वाला है।।८४।। आसन पर, शय्या पर अथवा विद्वद्गोष्ठी आदि के अवसरों पर [४]भवी, अर्थात् संसार में लिप्त जीवों के साथ संपर्क न रखना ही २८वाँ शील है। इससे साधक का मन निर्मल होता है।।८५।। भस्म, रुद्राक्ष और लिंग को सदा शरीर पर धारण करना २९वाँ शील है। यह मोक्ष मार्ग का एक मात्र साधन है।।८६।। इस प्रकार पाँच प्रकार के कायिक शीलों को यहां बताया गया है, जो कि मुक्ति की प्राप्ति के एकमात्र कारण हैं। अब मानसिक शीलों को कहूँगा, तुम सावधानी से सुनो।।८७।।

निषिद्ध भोगों के प्रति अपने संकल्प का भी परित्याग कर देना ब्रह्मचर्यनाम

---

४. वीरशैव मत में इष्टलिङ्ग को धारण न करने वाले सांसारिक जीव के लिये 'भवी' शब्द प्रयुक्त है, क्योंकि बिना इष्टलिङ्ग धारण किये कोई भी इस सांसारिक आवागमन से मुक्त नहीं हो सकता ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कामं भक्तिरसौकुर्यादविषयेषु न जातुचित् ।
एकत्रिंशमिदं शीलं निष्कामत्वं प्रकीर्तितम् ॥८९॥
वहेत् क्रोधमधर्मे तु न वैरिषु कदाचन ।
द्वात्रिंशकमिदं शीलमक्रोधं मुक्तिसाधनम् ॥९०॥
न धनादौ वहेल्लोभं शिवस्याराधने वहेत् ।
अलोभाख्यमिदं शीलं त्रयस्त्रिंशं समीरितम् ॥९१॥
मोहं भक्तजने कुर्यान्न कान्तायां सुतेषु वा ।
अमोहाख्यमिदं शीलं चतुस्त्रिंशं प्रकीर्तितम् ॥९२॥
मात्सर्यं करणेष्वेव न जनेषु वहेत् क्वचित् ।
अमात्सर्यमिदं शीलं पञ्चत्रिंशं समीरितम् ॥९३॥
मदं मायाजये कुर्यान्न धर्मे नाऽपि संपदि ।
अमदाख्यमिदं शीलं षट्त्रिंशमिति कीर्तितम् ॥९४॥
गुणागुणविमर्शस्य त्यागो यस्तु गुरौ चरे ।
सप्तत्रिंशं समाख्यातं शीलं पुण्यफलप्रदम् ॥९५॥
प्राणिनो यस्य कस्यापि न बाधाकरणं हि यत् ।
अहिंसाख्यमिदं शीलमष्टत्रिंशं समीरितम् ॥९६॥

का ३०वाँ शील है। ऐसा भगवान् के द्वारा उपदिष्ट है॥८८॥ शिवभक्ति की ही कामना रखनी चाहिये, विषयों की कामना कभी भी नहीं करनी चाहिये। इस प्रकार का भाव ही ३१वाँ शील कहा गया है॥८९॥ अधर्म के प्रति ही क्रोध करना, शत्रु के प्रति कभी क्रोध न करना ही अक्रोध नामक ३२वाँ शील कहा गया है। यह मुक्ति का साधन है॥९०॥ धन आदि के प्रति लोभ न रख कर शिव की आराधना में जो लोभ है, वही अलोभ नाम का ३३वाँ शील है॥९१॥ भक्तों के प्रति जिसको मोह रहता है, पत्नी-पुत्र आदि के प्रति नहीं, यही अमोह नाम का ३४वाँ शील कहलाता है॥९२॥ अपनी इन्द्रियों के प्रति ही जिसको [५]मात्सर्य रहता है, किसी व्यक्ति के प्रति नहीं, यही ३५वाँ अमात्सर्य नामक शील है॥९३॥ माया पर विजय पाने का ही जिसको मद (नशा) रहता है, धर्म के पालन से अथवा सम्पत्ति के अर्जन से नहीं, यही अमद नामका ३६वाँ शील है॥९४॥ गुरु और जंगम के प्रति गुण या अवगुण के विचार को जो त्याग देता है, यही ३७वाँ शील है। इससे पुण्य फल की प्राप्ति होती है॥९५॥ जिस किसी भी

५. मात्सर्य द्वेष वर्ग की एक मानसिक स्थिति है। महाकवि भारवि ने इस दशा का वर्णन इस प्रकार किया है- ''मात्सर्यरागोपहतात्मनां हि स्खलन्ति साधुष्वपि मानसानि'' (किरा० ३.५३)। इसका अभिप्राय यह है कि राग और द्वेष से भरा हुआ मनुष्य सज्जनों के साथ भी न्याय कहीं कर पाता।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्राणिदुःखस्य वीक्षायामक्षमत्वं दयाभिधम् ।
शीलं प्रसिद्धमेकोनचत्वारिंशं प्रकीर्तितम् ॥९७॥
क्रियायां वचने वापि यत्परस्मात् स्वतोऽपि वा ।
ह्रीर्या शीलमिदं प्रोक्तं चत्वारिंशं त्रिशूलिना ॥९८॥
रिपौ निजसुते वापि यद्वैषम्यविवर्जनम् ।
आर्जवाख्यं शीलमेकचत्वारिंशमुदाहृतम् ॥९९॥
आगमे निगमे चैव विश्वासो यद्गुरूदिते ।
श्रद्धाख्यं शीलमेतद् द्विचत्वारिंशं समीरितम् ॥१००॥
आपद्यपि दुरन्तायां धर्मस्य यदवर्जनम् ।
धृत्याख्यं शीलमेतत् त्रिचत्वारिंशं प्रकीर्तितम् ॥१०१॥
अदूषणं वैरिजनेष्वपकारपरेष्वपि ।
शीलं क्षमाभिधं चतुश्चत्वारिंशं समीरितम् ॥१०२॥
भोगप्रयुक्तवाञ्छाया राहित्यं यद्धि मानसे ।
भोगासक्तिच्युतिः पञ्चचत्वारिंशं समीरितम् ॥१०३॥
क्रियायां वचने वापि प्रमादरहितस्थितिः ।
धीर्या शीलं तदिह षट्चत्वारिंशं विनिश्चितम् ॥१०४॥

प्राणी को बाधा न पहुंचाना ही अहिंसा नामक ३८वाँ शील है।।९६।। किसी भी प्राणि के दुःख को देखने से जो कातरता आ जाती है, ऐसी मानसिक स्थिति ही दया नाम का ३८वाँ शील कहा गया है।।९७।। दूसरों को गलतफहमी न हो, बुरा न लग जाय, इस अभिप्राय से किसी अच्छे काम को करने में अथवा कहने में भी दूसरों से अथवा स्वयं अपने आपमें भी जो संकोच की भावना आ जाती है, इसी भाव को भगवान् शिव ने ४०वाँ शील कहा है।।९८।। शत्रु हो अथवा अपना पुत्र, इन दोनों के प्रति भेदभाव का परित्याग ही आर्जव नामका ४१वां शील है।।९९।। गुरु के द्वारा उपदिष्ट आगम और निगम के प्रति विश्वास की भावना ही श्रद्धा नामक ४२वाँ शील कहा गया है।।१००।। कभी समाप्त न होने वाली आपत्तियों से घिर जाने पर भी धर्म का परित्याग न करना धृति नामक ४३वाँ शील है।।१०१।। अपकार करने में लगे हुए शत्रुजनों के प्रति भी कभी दोष दृष्टि न रखना क्षमा नाम का ४४वाँ शील कहा गया है।।१०२।। मन में भोगों के प्रति किसी प्रकार की इच्छा का उत्पन्न न होना ही भोगासक्तिच्युति नामका ४५वाँ शील है।।१०३।। किसी प्रकार के कार्य को करने में और अपने कहे गये वचन का पालन करने में जो कभी प्रमाद न करने वाली बुद्धि है, वही ४६वाँ शील निश्चित किया गया है।।१०४।। शिव के सिवाय अन्य किसी भी वस्तु को अपने

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शिवान्यवस्तुविषयसंकल्पपरिवर्जनम् ।
शीलं दमाभिधं सप्तचत्वारिंशं प्रकीर्तितम् ॥१०५॥
अन्यूनधर्मानुष्ठानं परद्रव्यापरिग्रहः ।
अस्तेयाख्यं शीलमष्टचत्वारिंशमुदाहृतम् ॥१०६॥
अलब्धवस्तुविषयव्यसनाभावसुस्थितिः ।
संतुष्टिः शीलमेकोन पञ्चाशत्कं विनिश्चिनु ॥१०७॥
पारमेश्वरयोर्नित्यं स्मरणं नामरूपयोः ।
जीवन्मुक्तिप्रदं शीलं पञ्चाशत्कं समीरितम् ॥१०८॥
शम्भुनामगुणादीनां चिन्तनं यदनारतम् ।
शीलं पाशहरं त्वेकपञ्चाशत्कं प्रकीर्तितम् ॥१०९॥
भाव्यमानं सदा शम्भोः पादसंवाहनादिकम् ।
पादसेवनमेतद् द्विपञ्चाशत्कमुदाहृतम् ॥११०॥
अर्चनं मानसं यत् स्याच्छम्भोरावाहनादिना ।
शीलं त्विदं गीष्पते त्रिपञ्चाशत्कमुदाहृतम् ॥१११॥
शम्भुपादाब्जयोर्नित्यं प्रणामो मानसो हि यत् ।
शीलमेतत्किल चतुःपञ्चाशं संप्रकीर्तितम् ॥११२॥

संकल्प में न लाना ही दम नाम का ४७वाँ शील है।।१०५।। धार्मिक कृत्यों के अनुष्ठान में किसी प्रकार की [६]कमी न रखना और दूसरों के द्रव्य का परिग्रह न करना अस्तेय नाम का ४८वाँ शील है।।१०६।। किसी वस्तु के उपलब्ध न होने पर बिना परेशानी के रह सकने की स्थिति ही सन्तुष्टि कहलाती है। हे बृहस्पति! इसी को तुम ४९वाँ शील समझो।।१०७।। परमेश्वर के नाम और रूप का नित्य स्मरण करना ही ५०वाँ शील कहा गया है। यह जीवन्मुक्ति को देने वाला है।।१०८।। भगवान् शिव के नाम, गुण आदि का निरन्तर चिन्तन करते रहना ही ५१वाँ शील है, जो कि शिवभक्त को संसार के पाशों से मुक्ति दिलाता है।।१०९।। भगवान् शिव के पादसंवाहन (पैर दबाना) आदि की सदा भावना करने रहना ही पादसेवन नामक ५२वाँ शील कहलाता है।।११०।। भगवान् शिव का आवाहन आदि उपचारों से जो मानसिक पूजन किया जाता है, हे

---

६. इसके लिये शास्त्रों में वित्तशाठ्य शब्द प्रयुक्त है। ऐसा देखा जाता है कि व्यक्ति तड़क-भड़क में तो अनाप-शनाप पैसा खर्च करता है, किन्तु धार्मिक अनुष्ठानों के समय द्रव्य और काल को भी बचाना चाहता है। आजकल यह प्रवृत्ति तेजी से बढ रही है। अनेक व्यक्ति कम खर्च और कम समय में धार्मिक अनुष्ठानों को पूरा करा लेना चाहते हैं। इसी प्रवृत्ति पर यहां अंकुश लगाया गया है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कैङ्कर्यकरणं शम्भोर्मनसा सर्वदा हि यत् ।
दास्यं शीलमिदं पञ्चपञ्चाशमिति भाषितम् ॥११३॥
शम्भोः कल्याणरूपस्य सखिताभावनं हि यत् ।
सख्याख्यं शीलमेतत् षट्पञ्चाशमिति निश्चितम् ॥११४॥
बन्धमोचनभारस्य कृत्स्नस्येशे समर्पणम् ।
आत्मार्पणमिदं सप्तपञ्चाशं सम्प्रचोदितम् ॥११५॥
यज्जपो मूलमन्त्रस्य मनसा क्रियते सदा ।
शीलमेतत् सेव्यमष्टपञ्चाशमवधारितम् ॥११६॥
शम्भोर्यद् दिव्यरूपानुसन्धानं क्रियते हृदि ।
ध्यानाख्यं शीलमेकोनषष्टिकं परिकीर्तितम् ॥११७॥
ध्रियते तैलधारावदविच्छिन्नं तदेव यत् ।
धारणाख्यं शीलमिदं षष्टिकं समुदाहृतम् ॥११८॥
निवातदीपवद् ध्याने चेतसो यदवस्थितिः ।
समाध्याख्यं शीलमेकषष्टिकं सम्प्रचोदिकम् ॥११९॥

बृहस्पति! वही ५३वाँ शील कहलाता है॥१११॥ भगवान् शिव के चरणकमलों में प्रतिदिन जो मानसिक प्रणाम किया जाता है, वही ५४वाँ शील प्रकीर्तित है॥११२॥ भगवान् शिव की मानसिक रूप से की गई सेवा ही दास्य नामक ५५वाँ शील कहा गया है॥११३॥ सबका कल्याण करने वाले भगवान् शिव के साथ सख्यभाव (मैत्रीभाव) रखना ही सख्य नामक ५६वाँ शील निश्चित किया गया है॥११४॥ बन्धन अथवा मोचन, अर्थात् बन्ध और मोक्ष का समस्त भार भगवान् के ऊपर छोड़ देना ही आत्मार्पण नामक ५७वाँ शील कहा गया है। भाव यह है कि भक्त स्वयं निरपेक्ष रहकर भगवान् मुझे अभी बन्धन में डालना चाहते हैं या मुक्त करना चाहते हैं, इसका सारा भार जब उन्हीं पर डाल देता है, तो इसे ही आत्मार्पण कहते हैं॥११५॥ मूल (पंचाक्षर) मन्त्र का जो सदा मानसिक जप किया जाता है, इसे ही भक्तों के लिये सेवनीय ५८वाँ शील निर्धारित किया गया है॥११६॥ भगवान् शिव के दिव्य रूपों का हृदय में जो सदा अनुसन्धान किया जाता है, यही ध्यान नाम का ५९वाँ शील कहा गया है॥११७॥ तैल की धारा के समान अविच्छिन्न रूप से चित्त में जो भगवान् का स्वरूप निरन्तर प्रवाहित होता रहता है, यही धारणा नाम का ६०वाँ शील है॥११८॥ पवन रहित स्थान में जैसे दीपक की लौ निरन्तर एक रस उठती रहती है, उसी तरह से ध्यान करते करते चित्त की जो अखण्ड स्थिति हो जाती है, उसे ही समाधि नामक ६१वाँ शील कहा गया है॥११९॥ ''वही मैं हूँ'' इस भावना के साथ विश्व के स्वामी भगवान् शिव का ध्यान करते हुए, जो कुछ भी मैं कर रहा हूँ,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सोऽहंभावेन विश्वेशं ध्यायन् कृत्यानि सर्वतः ।
तदिन्द्रियमुखेनैव क्रियमाणानि भावयन् ॥
यदाचरति तच्छीलं द्विषष्टिकमुदाहृतम् ॥१२०॥
अपरिच्छिन्नरूपानुसन्धानं यन्महेशितुः ।
शीलमुक्तं सुराचार्य त्रिषष्टिकमुदाहृतम् ॥१२१॥
अनन्तरूपं देवस्य भावयन्निजरुपतः ।
शिवानन्दवशाद्विश्वमात्मानं विस्मरन्नपि ॥
यस्तिष्ठत्यचलः शीलं चतुष्षष्टिकमीरितम् ॥१२२॥
यश्चतुष्पष्टिशीलाढ्यः शिव एव न चापरः ।
एतदभ्यासयोगेन शिवसायुज्यमश्नुते ॥
गणाचार इति प्रोक्तो भृत्याचारमतः शृणु ॥१२३॥

भृत्याचारः

भृत्यत्वं वीरभृत्यत्वं भृत्याचारो द्विधा मतः ।
गुरुलिङ्गजङ्गमानां कैङ्कर्याचरणं हि यत् ॥
भृत्यत्वमिति निर्दिष्टं देवदेवन शम्भुना ॥१२४॥

वह सब भगवान् के द्वारा ही संपादित हो रहा है, ऐसी भावना करता हुआ भक्त जो कुछ आचरण करता है, उन सबका ६२वाँ शील में समावेश माना गया है॥१२०॥ हे सुराचार्य बृहस्पति! भगवान् महेश्वर के अपरिच्छिन्न सर्वत्र व्याप्त रूप का अनुसन्धान ही ६३वाँ शील शास्त्रों में वर्णित है॥१२१॥ देवदेव भगवान् रुद्र के अनन्त रूपों की जो अपने स्वरूप से अभिन्न रूप में भावना करता है, उससे उत्पन्न हुए शिवानन्द से जो सारे विश्व को और स्वयं अपने को भी भूल बैठता है और शान्त अचल भाव में स्थिर हो जाता है, यही ६४वाँ शील कहा गया है॥१२२॥ इन ऊपर वर्णित ६४ प्रकार के शीलों से जो सम्पन्न है, वह स्वयं शिव ही हो जाता है, उससे भिन्न नहीं रह जाता। इनका आचरण करने से भक्त शिवसायुज्य को प्राप्त कर लेता है। इस प्रकार हे बृहस्पति! मैंने तुमको गणाचार का स्वरूप बताया है। अब आगे तुम भृत्याचार के स्वरूप को सुनो॥१२३॥

भृत्याचार दो प्रकार का माना गया है। एक तो भृत्यता और दूसरा वीरभृत्यता। इनमें से गुरु, लिंग और जंगम की सेवा करना ही देवों के देव भगवान् शिव के द्वारा भृत्यता कही गई है॥१२४॥ अपने देशिक (गुरु) के लिये शरीर, भगवान् शिव के लिये मन और जंगम के लिये अपना धन समर्पित करके भी जो महान् उत्साह से भरा हुआ हैं और मुक्ति की कामना से ही मात्र शरीर धारण किये हुए है, शिव के

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

देशिकाय तनुं चित्तं शम्भवे च धनं तथा ।
जङ्गमाय समर्प्यैवं महोत्साहसमन्वितः ॥१२५॥
मुक्तिमेव परां काङ्क्षमाणो यदवतिष्ठते ।
तन्मतं वीरभृत्यत्वं शिवानुग्रहसाधनम् ॥१२६॥
इत्येवं कथितस्तुभ्यं पञ्चाचारविनिर्णयः ।
निगमागमसारोऽयं मुक्तिप्राप्त्येकसाधनः ॥१२७॥
नाशिष्यायोपदेष्टव्यो नाभक्ताय कदाचन ।
नापुत्राय च वक्तव्यो न श्रद्धारहिताय च ॥
गोपनीयः प्रयत्नेन किमतः श्रोतुमिच्छसि ॥१२८॥

इति श्रीचन्द्रज्ञानागमे उत्तरभागेऽनन्तरुद्रबृहस्पतिसंवादे शिवशासने क्रियापादे पञ्चाचारस्वरूपनिरुपणं नाम नवमः पटलः ॥

अनुग्रह की प्रधान साधनभूत यह स्थिति ही वीरभृत्यता मानी गई है॥१२४-१२६॥ हे बृहस्पति! इस तरह से तुमको यह पंचाचार का विनिर्णीत स्वरूप बताया गया है। गिम और आगम का यह सारभूत तत्त्व है और मुक्ति की प्राप्ति का एम मात्र साधन है॥१२७॥ जो शिष्य नहीं है, जो शिव का भक्त नहीं है, जो पुत्रभाव को प्राप्त नहीं हुआ है और श्रद्धा का जिसमें अभाव है, उसे इसका उपदेश कभी नहीं करना चाहिये। उनके सामने इस विषय को प्रयत्न पूर्वक गुप्त रखना चाहिये। हे बृहस्पति! अब इसके आगे तुम क्या सुनना चाहते हो॥१२८॥

इस प्रकार अनन्तरुद्र और बृहस्पति के संवाद के रूप में प्रस्तुत इस चन्द्रज्ञानागम के उत्तर भाग के क्रिया पाद का पंचविध आचारों के स्वरूप को बताने वाला यह नवां पटल समाप्त हुआ ।

❋❋❋

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दशमः पटलः

बृहस्पतिरुवाच

सर्वभद्रगुणोपेत काद्रवेयपरिष्कृत ।
जनदुद्धरणोन्निद्रान्तरुद्र नमोऽस्तु ते ॥१॥
आगमेषु निगद्यन्ते शैवभेदास्त्वनेकधा ।
चत्वारः क्वचिदुच्यन्ते तथा सप्तेति हि क्वचित् ॥२॥
दशेति च क्वचित् प्रोक्ताः कथ्यन्ते क्वचिन्यथा ।
संगृह्य तानिह ब्रूहि परिष्कारमसंशयम् ॥३॥

अन्तरुद्र उवाच

अष्टविधाः शैवाः

अधुना ते प्रवक्ष्यामि शैवभेदमनुत्तमम् ।
अनादिशैवं प्रथममादिशैवं द्वितीयकम् ॥
पूर्वशैवं तृतीयं स्यान्मिश्रशैवं चतुर्थकम् ॥४॥
शुद्धशैवं पञ्चमं स्यात् षष्ठं वै मार्गशैवकम् ।
सामान्यं सप्तमं ज्ञेयं वीरशैवमथाष्टमम् ॥५॥

१. अनादिशैवलक्षणम्

अथ तल्लक्षणं वक्ष्ये यथावदनुपूर्वतः ।
अनादिशैवः शम्भुः स्यादाथ तस्य गणा अपि ॥

बृहस्पति प्रश्न करते हैं—

सभी कल्याणकारी गुणों से युक्त, सर्पों से भूषित, जगत् के उद्धार के लिये सदा सजग हे अनन्तरुद्र! आपको मैं नमस्कार करता हूँ॥१॥ आगमों में शैवों के अनेक भेद कहे जाते हैं। कहीं चार तथा कहीं इनके सात भेद किये जाते हैं॥२॥ कहीं कहीं इनके दस भेद भी कहे गये हैं और कहीं अधिक भी। उन सबको संगृहीत कर आप मुझे उनका सार भाग इस तरह से समझाइये कि मुझे किसी प्रकार का संशय न रह जाय॥३॥

अनन्तरुद्र उत्तर देते हैं—

अभी मैं तुमको श्रेष्ठ शैवों के भेदों का वर्णन करूँगा। इनमें पहला अनादिशैव, दूसरा आदिशैव, तीसरा पूर्वशैव, चौथा मिश्रशैव, पांचवा शुद्धशैव, छठा मार्गशैव, सातवां सामान्यशैव और आठवां भेद वीरशैव है॥४-५॥

अब मैं अनुपूर्वी से इनका लक्षण बताऊँगा। इनमें अनादिशैव स्वयं भगवान् शिव

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

२. आदिशैवलक्षणम्

आदिशैवास्तु विज्ञेयाः कौशिकाद्या महर्षयः ॥६॥
कौशिकः कश्यपश्चैव भरद्वाजात्रिगौतमाः ।
आदावेते महेशस्य पञ्चवक्त्रेषु दीक्षिताः ॥७॥
गुरोर्मुखाद्दीक्षिता हि तद्गोत्राश्चान्यगोत्रिणः ।
आगमान्तोक्तविधिना शाम्भवव्रतसेविनः ॥८॥
वेधामनुक्रियाभिख्यदीक्षात्रय विधानतः ।
लिङ्गत्रयपरिस्फूर्जदङ्गत्रितय शोभिनः ॥
आदिशैवा इति भुवि निगद्यन्ते बृहस्पते ॥९॥
महेशस्य प्रतिष्ठायामुत्सवे स्नपनादिषु ।
आचार्यत्वे ह्यधिकृता आदिशैवा जगन्नुताः ॥१०॥

३. पूर्वशैवलक्षणम्

पूर्वशैवा हि विज्ञेयाः कानीनास्तु शिवद्विजाः ।
अनूढासु हि कन्यासु प्रभूताः पञ्चगोत्रिणः ॥११॥
दीक्षाणामिह शैवीनां पूर्वभागोदितात्मनाम् ।
ग्रहणाग्रहणाभ्यां च द्विविधास्ते शिवद्विचः ॥१२॥
पूर्वकाण्डोक्तदीक्षाभिः संस्कृतास्ते ह्यलिङ्गिनः ।
स्वार्थे परार्थे यजनेऽधिकृतास्ते भवन्ति हि ॥१३॥

और उनके गण हैं। कौशिक आदि महर्षि आदिशैव कहलाते हैं।।६।। कौशिक, कश्यप, भरद्वाज, अत्रि, और गौतम–ये पाँच महर्षि सर्वप्रथम शिव के पांच वक्त्रों से दीक्षित हुए थे।।७।। इन पाँचों गोत्रों वाले अथवा इनसे भिन्न गोत्र वाले जो व्यक्ति आगमों के उत्तर भाग में प्रतिपादित विधि से गुरुमुख से दीक्षित हैं, शांभव व्रत का पालन करते हैं; वेधा, मनु और क्रिया नामक त्रिविध दीक्षा के विधान से जिनके त्रिविध लिंग (इष्ट, प्राण और भाव लिंग) और त्रिविध अंग (स्थूल, सूक्ष्म और कारण शरीर) सुशोभित हैं, हे बृहस्पते! ये सब पृथ्वी पर आदि-शैव के नाम से परिचित हैं।।८-९।। भगवान् शिव की प्रतिष्ठा, उत्सव, स्तपन आदि शुभ अवसरों पर जो आचार्यत्व ग्रहण करते हैं, वे आदिशैव सारे जगत् के नमन करने योग्य हैं।।१०।।

अविवाहित कन्याओं से उत्पन्न पांच गोत्र वाले शिवद्विज पूर्वशैव कहलाते हैं।।११।। आगमों के पूर्वभाग कें उपदिष्ट शैवी दीक्षाओं के ग्रहण करने और न करने के भेद से दो प्रकार के होते हैं।।१२।। पूर्वकाण्ड में उक्त दीक्षाओं के द्वारा संस्कृत. ये अलिंगी शैव स्वार्थ अथवा परार्थ यजल में अधिकृत होते हैं।।१३।। हे सुरार्चित

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अर्चकत्वे हि देवस्य कैङ्कर्यकरणेऽपि च ।
शिवागारपरिष्कारेऽधिकृतास्ते सुरार्चित ॥१४॥
नाचार्यत्वे ह्यधिकृतिः प्रतिष्ठादिषु कर्मसु ।
दीक्षितानामपि ह्येषां कानीनत्वादसंशयम् ॥१५॥

(देवलकलक्षणम्)

अथ येऽदीक्षिता एव परार्थयजने रताः ।
ते हि देवलकाः प्रोक्ताः सर्वकर्मविगर्हिताः ॥१६॥
शिवागारादन्यदेशे तेषां स्पर्शोऽपि दोषदः ।
शिवार्चकत्वादेतेषां शैवत्वं तु परिस्फुटम् ॥१७॥
शिवदीक्षाविदूरत्वात् शिवद्रव्यस्य भक्षणात् ।
शिवकैङ्कर्यविषयश्रद्धालोपादिदोषतः ॥
तन्मला इत्युदीर्यन्ते सर्वशास्त्रेषु गीष्पते ॥१८॥

४. मिश्रशैवलक्षणम्

मिश्रशैवमथो वक्ष्ये सुराचार्य समाशृणु ।
आदित्यमम्बिकां विष्णुं गणनाथं महेश्वरम् ॥१९॥
एकपीठे संनिवेश्य मिश्रीकृत्यार्चयन्ति ये ।
मिश्रशैवा इति हि ते प्रोच्यन्ते मिश्रपूजनात् ॥२०॥

बृहस्पति! ये भगवान् शिव की पूजा और सेवा में तथा शिवमन्दिर को साफ-सुथरा रखने में अधिकृत हैं।।१४।। कानीन होने के कारण दीक्षा प्राप्त कर लेने के उपरान्त भी ये प्रतिष्ठा आदि कार्यों के सम्पन्न कराने में आचार्य पदवी पर अधिकृत नहीं माने जाते ।।१५।।

इनके अतिरिक्त जो बिना दीक्षा प्राप्त किये ही परार्थ-पूजन आदि कार्यों में व्याप्त हो जाते हैं। उनको देवलक कहा जाता है। ये सभी शुभ कर्मों कें विगहित माने जाते हैं।।१६।। शिवालय के अतिरिक्त अन्य स्थानों में इनका स्पर्श भी दोषजनक माना गया है। शिव के अर्चक होने के कारण ही इनमें शिवत्व परिस्फुट होता है, अर्थात् इनका शैवों में अन्तर्भाव होता है।।१७।। इनकी शिवदीक्षा नहीं होती, शिव द्रव्य का ये भक्षण करते हैं, शिव की सेवा के प्रति इनमें श्रद्धा का अभाव रहता है, इन सब दोषों के कारण हे बृहस्पति ये मलिन पूर्वशैव कहलाते हैं।।१८।।

हे सुराचार्य! अब मैं मिश्रशैव का लक्षण बताऊँगा, तुम सुनो। सूर्य, शक्ति, विष्णु, गणेश और महेश्वर को एक ही आसन पर विराजमान कर, मिला कर जो इनकी पूजा करते हैं, वे मिश्रशैव कहलाते हैं, क्योंकि ये सब दोनों को मिलाकर उनकी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नैतेषां शिवदीक्षा स्यान्न शिवाधिक्यंभावना ।
भस्मरुद्राक्षधरणाच्छैवत्वं मिश्रपूजनात् ॥
मिश्रत्वं विद्यन्ते यस्मान्मिश्रशैवाः प्रकीर्तिताः ॥२१॥
अन्तश्शाक्तं बहिश्शैवं सभामध्ये तु वैष्णवम् ।
मिश्रितं दृश्यन्ते यस्मान्मिश्रशैवाः प्रकीर्तिताः ॥२२॥

५. शुद्धशैवलक्षणम्

शुद्धशैवमतो वक्ष्ये प्रसिद्धं सुमनोर्चित ।
भस्मरुद्राक्षधरणात्मक पौराणदीक्षया ॥
दीक्षिताः शिवलिङ्गैकपूजातत्परचेतसः ॥२३॥
शिवपारम्यविश्वासाः शिवभावानुभाविनः ।
शुद्धशैवा इति भुवि निगद्यन्ते बृहस्पते ॥२४॥

६. मार्गशैवलक्षणम्

मार्गशैवं प्रवक्ष्यामि मुक्तिसन्निधिमार्गकम् ।
वेदागमान्तगदितदीक्षात्रयपरिग्रहः ॥
षट्स्थलज्ञानसम्पत्तिः षट्कालशिवपूजनम् ॥२५॥

आराधना करते हैं।।१९-२०।। इनकी न तो शैवी दीक्षा होती है और न इनमें शिव के प्रति श्रेष्ठता की भावना ही होती है। भस्म, रुद्राक्ष का धारण करने से ये शैव है और सबकी मिला कर पूजा करने से ये मिश्र हैं। इसीलिये ये मिश्रशैव कहलाते हैं।।२१।। भीतर से ये शाक्त हैं, बाहर से शैव दिखाई पड़ते हैं और सभा के बीच में वैष्णव बन जाते हैं। दस प्रकार मिश्रित रूप वाले होने से ये मिश्र शैव कहलाते हैं।।२२।।

हे देवार्चित बृहस्पति! अब मैं प्रसिद्ध शुद्धशैव के लक्षण बताऊँगा। भस्म और रुद्राक्ष के धारण की [१]पौराणिक दीक्षा से जो सम्पन्न हैं, एकमात्र शिवलिंग की पूजा में जो मन से लगे रहते हैं, शिव की श्रेष्ठता में जो विश्वास रखते हैं, जो सदा शिवभाव की भावना कहते रहते हैं, हे बृहस्पति! इस पृथ्वी पर वे शुद्धशैव कहलाते हैं।।२३-२४।।

अब मैं मार्गशैव के लक्षण बताऊँगा, जो कि मुक्ति के पास ले जाने का मार्ग है वेदान्त (उपनिषद्) और आगमान्त (आगमों के उत्तर भाग) में उपदिष्ट त्रिविध

---

१. शिवपुराण जैसे शैव पुराणों में भस्म और रुद्राक्ष के धारण की विधि विस्तार से वर्णित है। उसी विधि को यहां पौराणिक दीक्षा कहा गया है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एकविंशतिसाहस्त्रयुतषच्छत संख्यया ।
षडक्षरीजपो नित्यं लिङ्गैक्यविभावनम् ॥
धर्मोऽयं मार्गशैवान्तमीश्वरेण प्रकीर्तिता: ॥२६॥
आदिशैवेन तौल्येऽपि दीक्षादीनां परिग्रहे ।
विशिष्टानां हि धमाणां शीघ्रमुक्तिप्रदायिनाम् ॥
निरन्तरानुष्ठानं यद्मार्गशैवे विशिष्यते ॥२७॥

७. सामान्यशैवलक्षणम्

सामान्यशैवं वक्ष्यामि तच्छृणुष्वावधानतः ।
शाक्ताद्याः सर्वं एवैते मतपञ्चकवर्तिनः ॥२८॥
अध्वशोधनसंस्काराद्गायत्रीग्रहणादपि ।
सामान्यशैवा इति हि निगद्यन्ते धरातले ॥२९॥

दीक्षा (वेधा, मनु और क्रिया) से जो सम्पन्न है, [२]षट्स्थल का जिसको ज्ञान है, [३]षट्काल में जो शिव का पूजन करता है, २१६०० बार जो प्रतिदिन षडक्षरी मन्त्र का जप करते हुए लिंग और अंग के ऐक्य की भावना करता है, ईश्वर द्वारा प्रतिपादित धर्माचार मार्ग का पालन करता है, वही मार्गशैव है॥२५-२६॥ आदिशैव से यह बहुत कुछ मिलता हुआ है, तो भी दीक्षा आदि के ग्रहण में और शीघ्र मुक्ति दिलाने वाले विशिष्ट धर्मों के निरन्तर अनुष्ठान में मार्गशैव की अपनी विशेषता है॥२७॥

अब मैं सामान्य शैव का वर्णन करूँगा, उसको तुम सावधानी से सुनो। ऊपर बताये गये शाक्त और सभी पांचों मतों को मानने वाले [४]अध्वशोधन की प्रक्रिया से संस्कृत होते हैं, गायत्री मन्त्र का ग्रहण करते हैं, अत: ये सब यहां सामान्य शैव कहलाते हैं॥२८-२९॥

---

२. भक्तस्थल, माहेश्वरस्थल, प्रसादिस्थल, प्राणलिङ्गस्थल, शरणस्थल, और ऐक्यस्थल नामक षड्विध स्थलों का सिद्धान्तशिखामणि जैसे वीरशैव धर्म-दर्शन के ग्रन्थों में विस्तार से वर्णन मिलता है ।

३. प्रात:काल, संगव, मध्याह्न, अपराह्न और सायाह्न—इस प्रकार दिन को पांच भागों में बांटा गया है। सूर्योदय से पांच नाड़ी तक का काल संगव कहा जाता है। इसको संगव इस लिये कहा गया है कि इस काल में गायों को दुहने के बाद चरने के लिये ले जाया जाता है। प्रस्तुत आगम में दिन को छ: भागों में विभक्त किया गया है,—अरुणोदय, सूर्योदय, संगव, मध्याह्न, सायाह्न और अर्धरात्रि (११.६४)।

४. षडध्वशोधन की प्रक्रिया पर प्रथम पटल की २२वीं टिप्पणी देखिये ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

८. वीरशैवलक्षणम्

वीरशैवं प्रवक्ष्यामि विदितं श्रुतितन्त्रयोः ।
श्रौतं स्वतन्त्रमिति च द्विविधं परिकीर्तितम् ॥३०॥
वर्णाश्रमीयधर्माढ्यं श्रौतमित्यभिधीयते ।
तदीयधर्मरहितं स्वतन्त्रमिति कथ्यते ॥३१॥
आगमोत्तरकाण्डोक्तदीक्षाणां यः परिग्रहः ।
समान आदिशैवेन विशेषमिह संशृणु ॥३२॥
इष्टलिङ्गवियोगे वा व्रतानां वा परिच्युतौ ।
तृणवत् प्राणसंत्याग इति वीरव्रतं मतम् ॥३३॥
भक्त्युत्साहविशेषोऽपि वीरत्वमिति कथ्यते ।
वीरव्रतसमायोगाद्वीरशैवं प्रकीर्तितम् ॥३४॥

वीरशैवभेदाः

पुनः त्रिविधमेतद्धि सामान्यादिप्रभेदतः ।
सामान्यश्च विशेषश्च निराभारीति च त्रिधा ॥३५॥

सामान्यवीरशैवलक्षणम्

अथ लक्षणमेतेषां क्रमाद् वक्ष्यामि संशृणु ।
इष्टादिलिङ्गत्रितयस्यैकीभावेन चार्चनम् ॥
गुरौ माहेश्वरे स्वेष्टलिङ्गे च समभावना ॥३६॥

अब मैं वेद और तन्त्र में प्रसिद्ध वीरशैव का लक्षण बताऊँगा। श्रौत वीरशैव और स्वतन्त्र वीरशैव के भेद से ये दो प्रकार के होते हैं।।३०।। वर्णाश्रम धर्म का पालन करने वाले श्रौत वीरशैव तथा वर्णाश्रम धर्मों का पालन करने वाले स्वतन्त्र वीरशैव कहलाते हैं।।३१।। आगमों के उत्तर काण्ड में प्रतिपादित दीक्षा की विधि इनकी तथा आदिशैवों की एक सरीखी है। इसके अतिरिक्त जो इनकी विशेषता है, उसे तुम सुनो।।३२।। इष्टलिंग का वियोग होने पर अथवा व्रत के पालन मे त्रुटि होने पर जो तृण के समान अपने प्राणों के त्याग करने का संकल्प है, वही वीर व्रत कहलाता है।।३३।। भक्ति के एक विशेष प्रकार के उत्साह को भी वीरव्रत कहते हैं। इस द्विविध वीरव्रत का पालन करने वाला ही वीरशैव कहलाता है।।३४।।

सामान्य आदि के भेद से यह पुनः तीन प्रकार का हो जाता है। उनके नाम हैं- सामान्य वीरशैव, विशेष वीरशैव और निराभारी वीरशैव।।३५।।

अब मैं इनके लक्षण क्रमशः बताऊँगा, तुम सुनो। इष्ट, प्राण और भाव नामक त्रिविध लिंगों की एक ही रूप में पूजा करना, गुरु, माहेश्वर और अपने इष्टलिंग पर

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्रिकालं लिङ्गपूजा च सम्भवद्भिः पदार्थकैः ।
सामान्यवीरशैवस्य धर्मोऽयं परिकीर्तितः ॥

विशेषवीरशैवलक्षणम्

विशेषधर्मानुष्ठानाद् विशेषश्च स एव हि ॥३७॥
एकं माहेश्वरं वापि द्वौ वा त्रीन् प्रतिवासरम् ।
भोजयित्वा हि तच्छेषं भुञ्जीयादप्रमादतः ॥
षट्कालं लिङ्गपूजा च नियतैस्तु पदार्थकैः ॥३८॥
द्रोणपुष्पं बिल्वपत्रं करवीरमथापि वा ।
मल्लिकोत्पलपुन्नागजात्यादिकुसुमानि वा ॥३९॥
एष्वेकं त्रीणि द्वौ वापि ह्यर्पयेन्नियमान्वितः ।
एवं चरिष्ये नियमानहमाप्राणसंचरात् ॥४०॥
नान्यथा बिभृयां प्राणानिति यो नियमः स्मृतः ।
इत्यादिनियमैर्युक्तो विशेष इति कथ्यते ॥४१॥

निराभारीवीरशैवलक्षणम्

तुरीयाश्रमसेवी तु निराभारीति चोच्यते ।
स्वतन्त्रे त्यक्तदारादिर्निराभारीति कथ्यते ॥४२॥

